This is a digital copy of a book that was preserved for generations on library shelves before it was carefully scanned by Google as part of a project to make the world's books discoverable online.

It has survived long enough for the copyright to expire and the book to enter the public domain. A public domain book is one that was never subject to copyright or whose legal copyright term has expired. Whether a book is in the public domain may vary country to country. Public domain books are our gateways to the past, representing a wealth of history, culture and knowledge that's often difficult to discover.

Marks, notations and other marginalia present in the original volume will appear in this file - a reminder of this book's long journey from the publisher to a library and finally to you.

**Usage guidelines**

Google is proud to partner with libraries to digitize public domain materials and make them widely accessible. Public domain books belong to the public and we are merely their custodians. Nevertheless, this work is expensive, so in order to keep providing this resource, we have taken steps to prevent abuse by commercial parties, including placing technical restrictions on automated querying.

We also ask that you:

+ *Make non-commercial use of the files* We designed Google Book Search for use by individuals, and we request that you use these files for personal, non-commercial purposes.
+ *Refrain from automated querying* Do not send automated queries of any sort to Google's system: If you are conducting research on machine translation, optical character recognition or other areas where access to a large amount of text is helpful, please contact us. We encourage the use of public domain materials for these purposes and may be able to help.
+ *Maintain attribution* The Google "watermark" you see on each file is essential for informing people about this project and helping them find additional materials through Google Book Search. Please do not remove it.
+ *Keep it legal* Whatever your use, remember that you are responsible for ensuring that what you are doing is legal. Do not assume that just because we believe a book is in the public domain for users in the United States, that the work is also in the public domain for users in other countries. Whether a book is still in copyright varies from country to country, and we can't offer guidance on whether any specific use of any specific book is allowed. Please do not assume that a book's appearance in Google Book Search means it can be used in any manner anywhere in the world. Copyright infringement liability can be quite severe.

**About Google Book Search**

Google's mission is to organize the world's information and to make it universally accessible and useful. Google Book Search helps readers discover the world's books while helping authors and publishers reach new audiences. You can search through the full text of this book on the web at http://books.google.com/

PK
2909
B48

UC-NRLF

$B 130 930

25

# LISTS

OF

# SANSKRIT MANUSCRIPTS

IN

## PRIVATE LIBRARIES IN THE BOMBAY PRESIDENCY.

---

*COMPILED UNDER THE SUPERINTENDENCE*

OF

R. G. BHANDARKAR, M.A., Ph.D., C.I.E.,

*PROFESSOR OF ORIENTAL LANGUAGES, DECCAN COLLEGE.*

---

## PART I.

---

Bombay:

PRINTED AT THE GOVERNMENT CENTRAL PRESS.

1893.

CARPENTIER

PK 2909
B48

# CATALOGUE OF MSS. BELONGING TO GOVIND S'ÂSTRÎ NIRANTAR OF NÂSIK.

## VEDAS.

**No. 1.** ग्रंथनाम, **ईशावास्यभाष्यस्य टीका.** Name: A Commentary on the Îs'âvâsyabhâshya.

पत्राणि ९, folios 9; पंक्तयः ९, lines 9; अक्षराणि ४८, letters 48.

कर्ता, **नरेंद्रपुरी.** Author, Narendrapurî.

आरंभः । येनात्मना परेणेशा व्याप्तं सर्वमशेषतः॥ सोहं देहद्वयी साक्षी वर्जितो देहतद्गुणैः ॥१॥ ईशावास्यमित्यादिमंत्रान् व्याचिख्यासुर्भगवान् भाष्यकारस्तेषां कर्मशेषत्वाशंकां तावद्व्युदस्यति ।

समाप्तिः। यस्मादर्थांतरं न संगच्छते तस्मादित्युपसंहारः ॥ ईशप्रभृतिभाष्यस्य शंकरस्य परात्मनः ॥ मंदोपकृतिसिद्ध्यर्थं प्रणीतं टिप्पणं स्फुटम् ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्नरेंद्रपुरीविरचितेशावास्यभाष्यटीका समाप्ता ॥

---

**No. 2.** ग्रंथनाम, **केनोपनिषद्भाष्यम्.** Name: Kenopanishadbhâshya.

पत्राणि १९, folios 19; पंक्तयः १०, lines 10; अक्षराणि ३४, letters 34.

कर्ता, **शंकराचार्यः.** Author, S'aṁkarâchârya.

आरंभः । केनेषितामित्याद्योपनिषत्परब्रह्मविषया वक्तव्येति नवमस्याध्यायस्यारंभः॥ प्रागस्मात्कर्माण्यशेषतः परिसमापितानि ।

समाप्तिः । न त्रिविष्टपेऽनंतशब्द औपचारिकोपि स्यादित्यत आह ज्येये इति॥ ज्येये ज्यायसि सर्वमहत्तरे स्व आत्मनि मुख्य एव प्रतितिष्ठति न पुनः संसारमापद्यत इत्यभिप्रायः ॥ ॥ ॐतत्सदिति श्रीगोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकस्य शंकरभगवतः कृतौ केनेषितमुपनिषत्पदभाष्यं समाप्तम्॥ ॥

---

**No. 3.** ग्रंथनाम, **नारायणीयोपनिषद्भाष्यम्.** Name: A Commentary on the Nârâyaṇîyopanishad.

पत्राणि ८२, folios 82; पंक्तयः १३, lines 13; अक्षराणि २६, letters 26.

शके १५५७ विभववत्सरे; S'aka 1557.



M808582

कर्ता, सायणाचार्यः. Author. Sâyaṇâchârya.

आरंभ : । वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।। यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥१॥ यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत् ॥ निर्ममे तमहं वंदे विद्यातीर्थं महेश्वरम् ॥२॥ वारुण्युपनिषद्युक्ता ब्रह्मविद्या ससाधना ॥ याज्ञिक्यां खिलरूपायां सर्वशेषोभिधीयते ॥३॥ बृहदारण्यके सप्तमाष्टमाध्यायौ खिलकांडत्वेनाचार्यैरुदाहृतौ ॥ वेयं नारायणी व्याख्या याज्ञिक्युपनिषदपि खिलकांडरूपा तल्लक्षणोपेतत्वात् ॥

समाप्तिः । एतस्मिन्ननुवाके तत्वज्ञानसेवा-मि-मिहितेत्यशेषमतिमंगलम्॥वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥ पुनरर्थश्चतुर्दे (पुमर्थांश्चतुरो दे) याद्विद्यातीर्थमहेश्वरः ॥ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिककर्मप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे यजुः संपूर्णम्॥

---

**No. 4.** ग्रंथनाम, **भृगुवल्लीविवरणम्.** Name: Bhriguvallîvivaraṇa.

पत्राणि १२, folios 12 ; पंक्तयः ११, lines 11 : अक्षराणि २३, letters 23.

कर्ता, **शंकराचार्यः.** Author, Śaṁkarâchârya.

आरंभः । सत्यं ज्ञानमनंतं ब्रह्म आकाशादिकार्यमन्नमयांतं सृष्ट्वा तदेवानुप्रविष्ट विशेषवदेवोपलभ्यमानं यस्मात्तस्मात्सर्वकार्यविलक्षणमदृश्यादिधर्मकमेवानंदं तदेवाहमिति विजानीयादनुप्रवेशस्य तदर्थत्वात्तस्यैवं विज्ञानतः शुभाशुभे कर्मणी जन्मांतरारंभके न भवतः ।

समाप्तिः । तामेतां यथोक्तामुपनिषदं शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा भृगुवत्तपो महदास्थाय य एवं वेद तस्येदं फलं यथोक्तमोक्षमिति॥ ॥ इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषद्भाष्ये भृगुवल्लीविवरणं समाप्तम्॥

---

**No. 4A.** ग्रंथनाम, **मंत्रसंहिता ऋग्वेदस्य.** Name : Rigvedamantrasaṁhitâ.

पत्राणि १०५, folios 105; पंक्तयः ११, lines 11; अक्षराणि ४४, letters 44.

कर्तारः, **ऋषयः.** Authors, the Ṛishis.

आरंभः । ॐ उदु त्यं जातवेदसं देवं वहंति केतवः ॥ दृशे विश्वाय सूर्यं ॥ अप त्ये तायवो यथा नक्षत्रा यंत्यक्तुभिः ॥ सूराय विश्वचक्षसे ॥

समाप्तिः। स वो मनांसि जानता समाकृतिर्मनामसि॥ अस्याग्रग्रंथस्त्रुटितः

---

**No 5.** ग्रंथनाम **रामोत्तरतापिनी.** Name; **Râmottaratâpinî.** पत्राणि ६८, folios 68; पंक्तयः ९-१४, lines 9-14; अक्षराणि ४८, letters 48

ग्रंथसंख्या ३००० अनुमानतः.

आरंभः। बृहस्पतिरुवाच. याज्ञवल्क्यं यदनकुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनं अविमुक्तम्

समाप्तिः। नित्यं देवं स्तौति तस्य देवः प्रीतो भवति स्वात्मानं दर्शयति तस्माद्व एतैर्मंत्रैर्नित्यं देवं स्तौति स देवं पश्यति सोऽमृतत्वं गच्छति सोऽमृतत्वं गच्छतीति इति पंचमः खंडः ५ इत्यथर्वणरहस्ये रामोत्तरतापिनीयोपनिषत् समाप्ता ॥

टीकारंभः। सच्चिदानंदरूपाय श्रीरामायाद्वयायच ॥ नमः प्रत्यगभिन्नाय तारलक्ष्याय विष्णवे॥१॥ मंगलश्लोकाः ६॥श्रीरामोत्तरतापिन्या अंतःकरणशुद्धये॥ भाष्यकारीयमार्गेण कुर्वे व्याख्यां समासतः ॥७॥ अथ पूर्वोत्तरयोः कांडयोः संगत्याद्यर्थं किंचिदुच्यते ॥

टीकासमाप्तिः। श्रीरामचंद्रज्योत्स्नेति नाम्नाप्यानंददायिनी॥कृता टीका मया सेयं भवत्वेत्र सतां मुदे॥१॥ इति श्रीपरमहंसपारव्राजकाचार्यश्रीरघुरामतीर्थशांताश्रमपुज्यपादशिष्यसुरेश्वराश्रमेण कृता श्रीरामोत्तरतापिनीयटीका श्रीरामचंद्रज्योत्स्नेतिनाम्नीका समाप्ता ॥

---

**No. 6.** ग्रंथनाम, **वज्रसूच्युपनिषत्.** Name; **Vajrasûchyupanishad.** पत्राणि १४, folios 14; पंक्तयः १०, lines 10; अक्षराणि २४, letters 24.

आरंभः। प्रणम्य परमात्मानं मोहांधतिमिरापहम् ॥ तत्प्रसादबलेनैव क्रियते बालबोधिनी ॥१॥ अथात्मा कीदृशः ॥ सद्रूपं सर्वथा भावस्वरूपम् ॥ चिद्रूपम्॥ शुद्धबोधस्वरूपम् ॥ स्वरूपं सुखरूपम् ॥

समाप्तिः। प्रारब्धकर्मजनितफलावधिलोकाननुग्रहं कुर्वन्नेवावतिष्ठते ॥ ज्ञात्वा रज्जुसर्पं सर्पोप्ययथारूपं न मुंचति ॥ विध्वस्ताखिलमोहोपि लोककार्यं यथात्मनि ॥ निर्मुच्यापि त्वचं सर्पः स्वस्वरूपं न मुंचति ॥इति श्रीवज्रसूच्युपनिषत् सुबोधिन्या समाप्ता ॥

---

## VEDAṄGAS.

**No. 7.** ग्रंथनाम, **आश्वलायनश्रौतसूत्रवृत्तिः.** Name; **Âśvalâyanaśrautasûtravṛitti.**

पत्राणि ७८, folios 78; पंक्तयः १२, lines 12; अक्षराणि ३८, letters 38.

कर्ता नारायणः. Author, Nârâyaṇa.

आरंभः। स ज्ञानानंदमूर्तिः सकलदिगति नः(गः)सर्वदा सन्नमन्युः सर्वस्मात्स्वप्रकाशः स्थिरचरानिलयः प्रत्यगाभासदेहः ॥ श्रौतस्मार्तक्रियात्मा श्रुतिमननिदिध्यासवैराग्यलभ्यःस ब्रह्मा विष्णुरीशः सकलमपि जगत्सर्वदाऽव्या[द]सौ नः ॥१॥ ॥२॥ आश्वलायनसूत्रस्य भाष्यं भगवता कृतम् ॥ देवस्वामिसमाख्येन विस्तीर्णं सदनाकुलम् ॥३॥ तत्प्रसादान्मयेदानीं क्रियते वृत्तिरीदृशी ॥ नारायणेन गार्ग्येण नरसिंहस्य सूनुना ॥४॥ अथैतस्य वक्ष्यामः ॥ लोके यानि शास्त्राणि स्मर्यंते तानि अनुष्ठानोपयुक्ततया

समाप्तिः। हिरण्ये एव यथासंभवं शेषकार्याणि कुर्यान्न पुनरग्निरुद्धर्तव्यः॥१४॥ ॥ इत्याश्वलायनश्रौतसूत्रवृत्तौ नारायणीयायां तृतीयोध्यायः समाप्तः ॥ ॥

---

**No. 8.** ग्रंथनाम, **गृह्यपरिशिष्टम्.** Name: Gṛihyaparis'ishṭa.
पत्राणि ६२, folios 62; पंक्तयः ९, lines 9; अक्षराणि ३१, letters 31.
शके १६८५ सुभानुसंवत्सरे आश्विनशुक्लप्रतिपादि. S'aka 1685.

आरंभः। अथास्मिन्नाश्वलायनगृह्ये यानि कानिचिद्न्यत्रोक्तानीहेच्छताचार्येणानुमतानि ज्ञापितानि

समाप्तिः। अग्निकार्यमासप्तरात्रं कुर्युर्यदैतन्न क्रियते पुत्रो म्रियते पौत्रो म्रियते धनमात्मानं च निवेश्यति सुवर्णं गौर्वासो हिरण्यं ब्राह्मणान् ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयीत नम आचार्येभ्यो नम आचार्येभ्यो नमः शौनकाय नमः शौनकाय ॥२३॥ ॥ इत्याश्वलायनगृह्यपरिशिष्टे चतुर्थोध्यायः

---

## DHARMA.

**No. 9.** ग्रंथनाम, **अनंतभट्टी.** Name: Anantabhaṭṭī.
पत्राणि २८८, folios 288; पंक्तयः ८, lines 8; अक्षराणि २२, letters 22.
शके १७१५ प्रमादिवत्सरे. S'aka 1715.
कर्ता। **अनंतभट्टः.** Author, Anantabhaṭṭa.

आरंभः। नमामि पार्वतीसूनुं भक्तानां सिद्धिदायकम् ॥ क्रियते ह्युपकाराय स्मार्तानुष्ठानपद्धतिः ॥१॥ दीक्षितानंतविज्ञेन विश्वनाथस्य सूनुना ॥ प्रयोगो रच्यते सम्यक् मंत्रविस्तारपूर्वकम् ॥२॥ अग्रे अनुक्रमणिकादिश्लोकाः ॥३॥ अथ स्वस्तिवाचनम् ॥ तद्यत्र कर्तव्यं तदुच्यते ॥ व्यासः॥ संपूज्य गंधमाल्याद्यैः

समाप्तिः। वाचस्पातिः सोममपात्॥ मादैव्यस्तंतुच्छेदिमामनुष्यः॥ नमो दिवे॥ नमः पृथिव्यै स्वाहा ॥ वाचस्पतये ब्रह्मण इदम्॥ ॥ इति श्रीमद्यज्ञोपवीता-

भिधानश्रीविश्वनाथसूनुना दीक्षितानंतेन सर्वोपकाराय समंत्रकः प्रयोगः प्रायश्चितांतो विरचितः समाप्तः ॥ ॥

**No. 10.** ग्रंथनाम, **अनूपविवेकः** शालग्रामलक्षणप्रतिपादकः Name: Anûpaviveka.

**पत्राणि** ८५, folios 85; पंक्तयः १०, lines 10; **अक्षराणि** ४०, letters 40.

**शके** १७९९ Śaka 1799.

कर्ता, **अनूपसिंहदेवः**. Author, Anûpasimhadeva.

आरंभः। सिंदूरपूरपरिपूरितमध्यभालं मत्तालिवृंदपरिचुंबितगंडमालम्॥ शुंडाप्रतापविनिवारितविघ्नजालं वंदे गणेशमवनींद्रसुतैकबालम्॥१॥ २ ॥ ३ ॥ ४ ॥ ॥ ५ ॥ ६ ॥अग्रे मनुवंशवर्णनश्लोकाः ॥ ७ ॥८ ॥ ९ ॥ अस्मिन्वंशे राठोडेतिप्रसिद्धा भूपाः ॥ १० ॥ आस्थानराजः ॥ ११ ॥ १२ ॥ तस्मिन्वंशेतिविख्यातो योद्धाख्यो भूमिपोभवत्॥ स्वनाम्ना येन विहितं ख्यातं योधपुरं पुरम्॥ १३॥ तत्पुत्रो विक्रमाख्योभूत्० ॥१४॥ बीकानेरपुरी येन निर्मिता भुवि विश्रुता॥ तं पतिं प्राप्य या नित्यं हसं(स)तीवामरावतीम्॥१५॥ श्रीलोलकर्णस्तदपत्यरत्नम्॥१६॥ तदात्मजः श्रीजयदेवसिंहो बभूव० ॥ १७ ॥तदंगजन्मापि बभूव राजा कल्याणमल्लः ० ॥ १८ ॥ तदात्मजोभूद्भुवि राजसिंहः ० ॥ १९ ॥ तस्याभवद्राजकचक्रकीर्तिः श्रीसूरसिंहो० ॥ २० ॥ तस्माच्छ्रीकर्णभूपः ० ॥ २१ ॥ २२ - तस्माच्छ्रीकर्णभूपात्सुरपतिसदृशात्कामरूपः सुरूपो राज्ञा श्रीविष्णुसेवी समजनि विषये जांगलेनूपसिंहः॥ क्षोणीनाथे हियस्मिन्प्रतपति विषये कोपि नाभूद्दरिद्रो नो पापी नैव दुःखी न च किमपि सतां द्वेषकृन्नैव मूढः॥२३ २४ ॥ २५ ॥ २६ ॥ तस्य राज्ञः सभामध्ये ०॥२७॥२८॥२९॥ तेन राज्ञा मतिमता शालग्रामपरीक्षणे ॥ ग्रंथोऽनूपविवेकाख्यः कौतुकेन विरच्यते ॥ ३० ॥ इह हि यथाधिकारं यज्ञाद्यनुष्ठातॄणाम्

समाप्तिः। एवं विरचितो ग्रंथो राज्ञानूपसुबुद्धिना॥ अस्य संदर्शनात्सर्वे शिष्टाः संतुष्टमानसाः॥१ ॥ बभूवुस्तेन लक्ष्मीशस्तुष्टः सत्फलदायकः ॥ १ ॥ मीमांसारत्नमाला विलसति हृदये यस्य बुद्धिःप्रबुद्धा श्रद्धालुर्धर्मसिंधौ वितरणचतुरस्तारको यः परेषाम्॥अद्वैते प्राप्तकामो हरिहरभजनात्साम्यबुद्ध्या भवेद्यः सोस्मिन् ग्रंथे नवीने क्षितिपतिरचिते हृष्टचित्तः प्रभूयात्॥१॥॥इति श्रीसमस्तसामंतचक्रचूडामणिमरीचिनीराजितपादपीठश्रीमन्महाराजाधिराजश्रीमदनूपसिंहदेवविरचिते अनूपविवेके शालग्रामप्रशंसारूपः पंचम उल्लासः॥ ॥

**No. 11.** ग्रंथनाम, **आह्निकं आचारकांडम्.** Name: Âhnika, Âchârakânda.

पत्राणि ९९, folios 99; पंक्तयः, lines 8; अक्षराणि ३६, letters 36.

कर्ता, भट्टोजीदीक्षितः. Author, Bhaṭṭojîdîkshita.

आरंभः। यस्य वाक्यामृतं वेदास्तेभ्यः कर्म प्रवर्तते॥ कर्मणा तुष्यते यश्च तस्मै कर्मात्मने नमः॥१॥ अथाह्निकं लिख्यते॥ तत्र माधवीये॥ कूर्मपुराणे॥ ब्राह्मे मुहूर्ते चोत्थाय धर्ममर्थं च चिंतयेत्॥ कायक्लेशं महद्भूतं ध्यायीत परमेश्वरमिति॥ सूर्योदयात्प्रागर्द्धप्रहरे द्वौ मुहूर्तौ तत्राद्यो ब्राह्म्यः। द्वितीयो रौद्रः।

समाप्तिः। विक्रीणन्मद्यमांसानि ह्यभक्ष्यस्य च भक्षणम्॥ कुर्वन्नगम्यागमनं शूद्रः पतति तत्क्षणादिति॥ शेषमन्यतो बोध्यम्॥ इति शूद्रधर्माः॥॥ इति पदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेः सूनुना भट्टोजीदीक्षितेन रचितायां चतुर्विंशतिमतव्याख्यायामाचारकांडं समाप्तम्॥ ॥

---

**No. 12.** ग्रंथनाम, **कालनिर्णयदीपिकाविवरणम्.** Name: Kâlanirṇayadîpikâvivaraṇa.

पत्राणि ५३, folios 53; पंक्तयः १८, lines 18; अक्षराणि ५२, letters 52.

संवत् १६४७ अश्विनवदि १ शनौ. Saṁvat 1647.

कर्ता, नृसिंहाचार्यः. Author, Nṛisiṁhâchârya.

आरंभः। श्रीविठ्ठलं श्रुतिगिरः प्रथितप्रभावं भावार्द्रमानससरोवरराजहंसम्॥ श्रीरामचंद्रगुरुमेकमनेकशास्त्रपारीणकोविदधुरीणमहं नमामि॥१॥ प्रशंसाश्लोकाः॥२॥३॥४॥५॥ तत्र तावत्कालनिर्णयदीपिकां चिकीर्षवः श्री रामचंद्राचार्यास्तत्समाप्तिप्रचयगमनाभ्याम्.

समाप्तिः। दीपिकावदयं ग्रंथोपि॥ सर्वजनव्यवहारसिद्धौ सर्वदेशप्रख्यात आकार्यं कल्पनामिति॥ अग्रे कविवर्णनाश्लोकाः॥१॥२॥३॥४॥५॥ ॥६॥७॥ ॥ इतिश्रीमत्सर्वशास्त्रज्ञसकलसदागमाचार्यपरमहंसपरिव्राजकश्रीगोपालगुरुपूज्यपादशिष्यश्रीरामचंद्राचार्यसुतनृसिंहाचार्यकृतं कालनिर्णयदीपिकाविवरणं समाप्तम्॥ ॥

---

**No. 13.** ग्रंथनाम, **कुंडाकृतिः सटीका.** Name: Kuṇḍâkṛiti with a commentary.

पत्राणि २८, folios 28; पंक्तयः ११, वा १३ वा १५, lines 11-15; अक्षराणि ३६, letters 36.

कर्ता, रामवाजपेयी। टीकाकारः, स एव. Author, & Commentator, Râmavâjapeyin.

आरंभः। इष्टापूर्तेष्वंगमाद्यं यदाहुर्यस्योनत्वाधिक्यतो भूरिदोषाः॥ कुंडं

सांगं भूरिभेदं तदत्र ब्रूते रामो नैमिषस्थो विचार्य ॥ १ ॥ त्रसरेणुरथो रेणुर्बालाग्रं तदनु लिक्षा च ॥ यूका यवोंगुलमिति परिमाणं क्रमतोष्टगुणितानि ॥ २ ॥

समाप्तिः । श्रीमद्रत्नपुराधिपेन महितः श्रीरामचंद्रेण यो भारद्वाजकुलांबुधेर्विधुरिव श्रीमज्जडामद्विजः ॥ बंधूनां परिणीतयेभ्युपगतोसौ मालवो नैमिषे तेनर्ग्वेदविदेरितेन रचिता रामेण कुंडाकृतिः ॥ ७० ॥

टीकारंभः । सूनोः श्रीधरमालवस्य शिवदासाख्यादुरुख्यातितः सम्राडभिचिदाप यस्य जनकः श्रीसूर्यदासो जनिम् ॥ यन्मातुर्यसखा दिशो दश विशालाक्ष्यावलक्षाः सृजत्येष स्वाहितकुंडलक्ष्मविवृतिं रामो वसन्नैमिषे ॥ १ ॥ शिष्यबुध्यनुकूलनाय प्रयोजनं वर्णयन् चिकीर्षितं प्रतिजानीते ॥

टीकासमाप्तिः । रामचंद्रो नैमिषस्थः कुंडानां कृतिं निर्माणं व्यरचयत् ॥ ७० ॥ ग्रंथोत्पत्तिकालमाह ॥ रसगगनतिथि १६०६ प्रमाणवर्षे गतवति विक्रमभूमिपस्य कालात् ॥ क्रतुविधिफलदायके मखेज्ये कृतिरियमस्तु ममार्पिता सुरेशे ॥ ७१ ॥ नारायणेऽर्पितास्तु ॥ प्राकृतमर्पणं पुनः क्रियते आदरातिशयात् ॥ ॥ इति श्रीनैमिषारण्यस्थरामवाजपेयिकृता स्वकृतनिर्माण– – – – – – – – – – –

---

**No. 14.** ग्रंथनाम, **दानमयूखः**. Name. Dânamayûkha.
पत्राणि२००, folios 200 ; पंक्तयः १०, lines 10 ; अक्षराणि ३६, letters 36.
संवत् १८१७ फाल्गुन वद्य ८ रविवारे. Samvat 1817.
कर्ता, **भट्टनीलकंठः**. Author, Bhaṭṭanîlakaṇṭha.

आरंभः। यो लीलया संतनुतेत्र विश्वं तत्पालयत्यात्मनि विश्वरूपम् ॥ लयं नयत्या – – – – दर्णरूपः शिवं तनोत्वाशु रविर्भमासौ ॥ १ ॥ श्रुतिस्मृती वीक्ष्य पुराणजातं तत्तन्निबंधानपि सन्निबंधान् ॥ श्रीशंकरस्यात्मज एष दाने श्रीनीलकंठो विवृणोति कृत्यम् ॥ २ ॥ परस्मै सत्वंतो द्रव्यत्यागो दानम् ॥ व्यत्यावानिमयादयस्ते तथा ।

समाप्तिः । कपिलादानमंत्रः मात्स्ये ॥ कापिले सर्वभूतानां पूजनीया ह्यरोगिणी ॥ सर्वतीर्थमयी यस्मादतः शांतिं प्रयच्छ मे ॥ इति ॥ ॥ इति श्रीजगद्गुर्भट्टनारायणसूरिसूनुपंडितशिरोरत्नमीमांसकशंकरभट्टात्मजभट्टनीलकंठकृते भास्करे दानमयूखः समाप्तः ॥ ॥

---

**No. 15.** ग्रंथनाम, **त्रिविक्रमी देवप्रतिष्ठापद्धतिः**. Name : Devapratishṭhâpaddhati.

पत्राणि १३१, folios 131 ; पंक्तयः ९, lines 9 ; अक्षराणि २७, letters 27.

कर्ता, त्रिविक्रमः. Author, Trivikrama.

आरंभः । प्रणम्य गुरुपादाब्जं समासव्यासवर्जिता ॥ क्रियते सर्वदेवानां प्रतिष्ठापद्धतिर्मया ॥ १ ॥ प्रासादस्य तदंगानामादौ कर्मक्रिया गता ॥ संस्क्रियपरिहार्यत्वाद्ध्वजादीनां तथाश्रितः ॥ २ ॥ समाहृत्यान्यतंत्राणि तत्प्रसिद्धपदैस्तथा ।

समाप्तिः । भूतान् भव्यान् भविष्यांश्च तारयेद्रामसंमितान् ॥ परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ॥१॥ पुत्रैर्विना न सुगतिर्भविता नराणां दुष्पुत्रकैरपि तथोभयलोकशंका ॥ एतद्विचार्य सुधिया तरवः पृथिव्यां पुत्राः पुराणविहिताः परिकल्पनीयाः ॥ २ ॥ ॥ इति वृक्षोद्यापनविधिः समाप्तः ॥

---

**No. 16.** ग्रंथनाम, **पूर्तकमलाकरः.** Name: Pûrta-Kamalâkara.

पत्राणि १५९, folios 159; पंक्तयः ९, lines 9; अक्षराणि २८—३८, letters 28—38.

कर्ता, **कमलाकरभट्टः.** Author, Kamalâkarabhaṭṭa.

आरंभः । नारायणात्मजश्रीमद्रामकृष्णस्य सूनुना ॥ कमलाकरसंज्ञेन पूर्तं सम्यगिहोच्यते ॥ १ ॥ अथ मात्स्योक्तजलाशयोत्सर्गः ॥ स चोदगयने माघादिषु षट्सु कार्तिके च श्रावणवर्जमासेषु वा ।

समाप्तिः । ततो देवतानामुत्तरपूजां कृत्वाग्निं संपूज्य विभूतिं धृत्वा विसृज्य संभारान् पुरोहिताय दत्वा सहस्रं विप्रान्संभोज्य कर्मेश्वरार्पणं कुर्यात् ॥ ॥ इति श्रीमीमांसकरामकृष्णभट्टात्मजमहामहोपाध्यायकमलाकरभट्टकृत ऐंद्रीमहाशांतिसहितः पूर्तकमलाकरः समाप्तः ॥

---

**No. 17.** ग्रंथनाम, **पूर्तप्रकाशः** प्रतापनारसिंहाख्ये. Name: Pûrta-prakâśa, from Pratâpanârasiṁha.

पत्राणि १२४, folios 124; पंक्तयः ७, lines 7; अक्षराणि २७, letters 27.

कर्ता, **रुद्रदेवः.** Author, Rudradeva.

आरंभः। नारसिंहं नमस्कृत्य गुरूंश्चैव विशेषतः॥ भारद्वाजकुलोत्पन्नस्तोरोनारायणात्मजः ॥ १ ॥ नाम्ना वै रुद्रदेवस्तु श्रीनृसिंहदयान्वितः ॥ प्रतापनारसिंहाख्ये रक्ष्ये पूर्तप्रकाशकम् ॥ २ ॥ पूर्तइति कर्मनामधेयम् ॥ बौधायने सेतुबंधं नदीखाततडागपुष्करिणीवापीकूपदेवगृहप्रासादवसतीनामोषधिवनस्पतीनां च पूर्तं भवतीति पूर्तत्वेनाभिधानाद् ।

समाप्तिः। ब्राह्मे ॥ देवानां प्रतिमापत्रं घृताभ्यंगक्षमं भवेत् ॥ पलानि तत्र देयानि श्रद्धया पंचविंशतिरिति ॥ ॥ इति प्रतिष्ठानपुरवासितोरोनारायणात्मजरुद्रदेवकृते प्रतापनारसिंहाख्ये पूर्तप्रकाशे अभ्यंगादिप्रमाणम् ॥ ॥ शाकेभिरामष्ट [षट्?]चंद्रे ख-राब्दे दक्षिणायने ॥ ऊर्जशुक्लत्रयोदश्यां प्रतिष्ठानपुरे शुभे ॥१॥ तोरोनारायणसुतो रुद्रदेवो महासुधीः ॥ ग्रंथाननेकान् संवीक्ष्य सारमुद्धृत्य यत्नतः ॥२॥ प्रतापनार-सिंहाख्ये ग्रंथे पूर्तप्रकाशकम् ॥ समाप्तमकरोत्तत्र विदुषां प्रीतये सदा ॥३॥ बालानां सुलभो यो यः प्रयोगोयं निरूपितः ॥ रुद्रदेवेन स श्रीमान्नृसिंहः प्रीयतामिति ॥४॥

---

**No .18.** ग्रंथनाम, **प्रयोगरत्नम्** Name: Prayogaratna.

पत्राणि २५१, folios 251; पंक्तयः ९, lines 9; अक्षराणि ३०, letters 30.

शके १६१३ प्रजापतिनामसंवत्सरे कार्तिकशुद्धत्रयोदश्यां शनौ. S'aka 1613.

कर्ता, **भट्टनारायणः**. Author, Bhaṭṭanârâyaṇa.

आरंभः। श्रीरामं सपरीवार गणेशं च सरस्वतीम् ॥ आश्वलायनतच्छिष्यान् प्रणम्य पितरं गुरुम् ॥१॥ भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ॥ प्रयोगरत्नं कुरुते काश्यां शिष्टेष्टतुष्टये ॥२॥ ग्रंथेस्मिन् गुणगणवत्त्वमुच्यते चेत्स्वं ग्रंथं गुणगणवंत-माह को न ॥ तत्संतः शिरसि कृतांजलिस्तु याचे शोध्यं तत्सदसदिहोच्यते मया यत् ॥३॥ अथ संस्कारास्ते चाष्टाचत्वारिंशत्।

समाप्तिः। कृत्तिकादिषु काम्यश्राद्धं वृत्तिकारमतेनाष्टमीश्राद्धवत्सर्वं कार्यम् ॥ यद्वा शौनकोक्तरीत्या वृद्धिश्राद्धवत् ॥ ॥ इति श्रीविद्वन्मुकुटमाणिक्यश्रीमद्रामेश्वरभट्टसू-नुनारायणभट्टकृते प्रयोगरत्ने अष्टकाविकृतिश्राद्धप्रयोगः समाप्तः ॥ ॥

---

**No. 19.** ग्रंथनाम, **वासुदेवभट्टी प्रयोगरत्नमाला**. Name: Prayoga-ratnamâlâ.

पत्राणि ८२, folios 82; पंक्तयः ९, lines 9; अक्षराणि ३०, letters 30.

शके १६८६ तारणनामसंवत्सरे आषाढकृष्ण ९. S'aka 1686.

कर्ता, **वासुदेवभट्टः**. Author, Vâsudevabhaṭṭa.

आरंभः। अथ स्थावरविष्णुप्रतिष्ठोच्यते ॥ तत्रादौ मूर्तिनिर्माणप्रकारः ॥ कल्पर-त्नाकरे ॥ आदौ गणेशं नत्वा शिल्पिभिः शुद्धदेशस्थां शिलां प्राक्पश्चिमायताम्

समाप्तिः। तदंतः संलग्नतत्समं स्थान कृत्वा पीठाद्बहिर्लिंगसमपदीर्घां पीठार्द्धदीर्घां वा मूले दैर्ध्यसमविस्तारामग्रे तदर्धविस्तारां तृतीयांशेन मध्ये खातां पीठसममेखलां प्रणाडिकां कुर्यादिति ॥ अत्र मूलं सिद्धांतशेखरे शैवागमे ज्ञेयं तत्रैव ब्राह्मे ॥ ॥ इति चित्तपावनविद्वन्मण्यापदेवभट्टसनवासुदेवविरचितायां प्रयोगरत्नमालायां पीठादिप्रतिष्ठा ॥

**No. 20.** ग्रंथनाम, **प्रायश्चित्तमयूखः.** Name: Prâyaśchittamayûkha.

पत्राणि ८४, folios 84; पंक्तयः १२, lines 12; अक्षराणि ३४, letters 34.

**कर्ता नीलकंठः.** Author, Nîlakaṇṭha.

आरंभः। नमामि भास्वत्पदपंकजं तच्छ्रीनीलकंठोहमथ प्रकुर्वे ॥ स्मृत्वोपदेशान् गुरुशंकरस्य विनिर्णयं पापविशुद्धिहेतुम् ॥१॥ प्रवारकैरादृतमत्र किंचिन्मया तु निर्मूलतया तदुज्झितम् ॥ मौक्तिकाली रहितेन काचित्स्वपुष्पहीनापचितिर्न हीयते॥२॥ पापविशुद्धिहेतुत्वं प्रायश्चित्तस्याह याज्ञवल्क्यः ॥ विहितस्याननुष्ठानान्निंदितस्य च सेवनात् ॥ अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छति ॥ तस्माद्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये. ।

समाप्तिः। क्लीबे देशांतरस्थे च पतिते भिक्षुकेपि वा ॥ योगशास्त्राभियुक्ते च न दोषः परि । अस्याग्रे ग्रंथस्त्रुटितः।

---

**No. 21.** ग्रंथनाम, **वापीकूपाद्युद्यापनपद्धतिः** Name: Vâpîkûpâdyudyâpanapaddhati.

पत्राणि ५६, folios 56; पंक्तयः १०, lines 10; अक्षराणि ३०, letters 30.

शाक, श्रीशाकेक्षाग्निबाणेंदु १५३५ मिते साधारणेब्दके॥ त्र्यंबकात्मालिखच्छ्रीमान् पद्मनाभाभिधःसुधीः ॥ S'aka 1535.

**कर्ता, भट्टनारायणः.** Author, Bhaṭṭanârâyaṇa.

आरंभः। अथ जलाशयोत्सर्गप्रयोगः॥ उत्तरायणे माघादिमासषट्कान्यतमे मासि-कार्तिके च मकरकर्कंकुंभमीनवृषभ०

समाप्तिः। एष मुख्यः कल्पः ॥ अशक्तस्तु त्रयोदशभिर्ऋत्विग्भिरेकेन वा गुणैकाभिविधानेन कुर्यादिति ॥ ॥ इति श्रीभट्टरामेश्वरात्मजभट्टनारायणकृता वापीकूपतडागारामोद्यापनपद्धतिः समाप्ता ॥ ॥

---

**No. 22.** ग्रंथनाम, **माधवीयव्यवहाराध्यायः.** Name: Vyavahârâdhyâya.

पत्राणि १९२, folios 192; पंक्तयः १२, lines 12; अक्षराणि३०, letters 30.

संवत् १७०१ जेठबदी सप्तमी ७. Samvat 1701.

**कर्ता, माधवः.** Author, Mâdhava.

आरंभः। वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ॥ यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥ २॥ सत्यैकव्रतपालको द्विगुणधीस्त्र्यर्थीचतुर्वेदिता पंच-

स्कंधकर्ती षडन्वयदृढः सप्तांगसर्वंसहः ॥ अष्टव्यक्तिकलाधरो नवनिधिः पुण्यदशप्रत्ययः स्मार्तोच्छ्रायधुरंधरो विजयतां श्रीबुक्कणक्ष्मापतिः ॥ ३ ॥ अग्रे ग्रंथकारप्रशंसाश्लोकाः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ अथ व्यवहारः प्रस्तूयते ॥ यद्यर्ण[णृ]णादानादीनामष्टादशपदानां व्यवहाराणां मध्ये

समाप्तिः । एवं शास्त्रोक्तमार्गमाह यमः ॥ एवं धर्मप्रवृत्तस्य राज्ञो दंडधरस्य च ॥ यशोस्मिन्प्रथते लोके स्वर्गे कस्तत्प्रथाक्षय इति ॥ मुनिरपि ॥ एवं सर्वानिमान् राजा व्यवहारान् समापयेत् ॥ व्यपोत्थेति ॥ ॥ इति महाराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीबुक्कभूपालसाम्राज्यधुरंधरस्य माधवामात्यस्य कृतौ पराशरस्मृतिव्याख्यायां माधवीयायां तृतीयोध्यायः समाप्तः ॥

---

**No. 23.** ग्रंथनाम, **स्मार्तप्रायश्चित्तम्.** Name: Smârtaprâyaśchitta.

पत्राणि ४२, folios 42; पंक्तयः १०, lines 10; अक्षराणि २६, letters 26.

शके १६८७ पार्थिवसंवत्सरे फाल्गुनवद्यप्रतिपदि. Śaka 1687.

कर्ता, **दिवाकरभट्टः**. Author, Divâkarabhaṭṭa.

आरंभः। अथ स्मार्तप्रायश्चित्तानि मन्यते ॥ तत्रादावावश्यकविशेषो नित्यप्रायश्चित्तानि च वक्ष्यते ॥ तत्रादौ शौचमाह मनुः ॥ शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः ॥ शौचाचारविहीनस्य समस्ता निष्फलाः क्रिया इति ॥

समाप्तिः। प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ॥ यानि तेषामशेषाणां कृष्णानुस्मरणं परमिति ॥ १ ॥ ॥ इति श्रीमत्कालोपनामकभट्टरामेश्वरात्मजभट्टमहादेवद्विजवर्यसूनुभट्टदिवाकरविरचितस्मार्तप्रायश्चित्तोद्धारे संक्षिप्तप्रयोगरूपेण नित्यनैमित्तिकप्रायश्चित्तानि कारिकायुक्तनिरूपितानि ॥ दिवाकरेण रचिता स्मार्तनिष्कृतिपद्धतिः ॥ गुणगृह्यैर्बुधैः सम्यगादरेण विभाव्यताम् ॥ १ ॥

---

**No. 24.** ग्रंथनाम, **स्मृतिकौमुदी शूद्रधर्मोत्पलद्योतिनी.** Name: Smṛitikaumudî Śûdradharmotpaladyotinî.

पत्राणि १२५, folios 125; पंक्तयः १०, lines 10; अक्षराणि ३०, letters 30.

संवत् १५६२ ज्येष्ठ वदि ९. Saṁvat 1562.

कर्ता, **रायमदनपालः**. Author, Râyamadanapâla.

आरंभः । नमः सकलकल्याणकारणाय पिनाकिने नमो लक्ष्मीनिवासाय देवतायै गिरां नमः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ आसीदसीमगुण — — कुलांब(बु)राशावु(बु)द्यत्प्रभूतशुभकीर्तिघनप्रकाशः ॥ लोकैः सदा हृदि वृतो गुणसन्निविष्टः श्रीरत्नपालनृपतिर्भुवनैकरत्नम् ॥ ७ ॥ अग्रेऽस्य कतिपयवंशवर्णनश्लोकाः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ परिशीलयता कलाकलापं विदधानेन च भूरिशः प्रबंधान् ॥

मदनेन महीभृताथ येन प्रथिता नूतनभोजराजकीर्तिः ॥ १३ ॥ १४ ॥ वागुत्सवेन मतिमानतिमानशाली कीर्तेः पदं मदनपालमहीतलेंदुः ॥ विद्वन्मुखेन तनुते विनतोर्जितश्रीरुत्पन्नचारुकिरणां स्मृतिकौमुदीं सः ॥ १५ ॥ १६ ॥ वर्णाचारप्रकटनविधिर्ब्राह्मणादिक्रमेण प्रोक्तः पूर्वैर्न खलु कथिता मुख्यतः शूद्रधर्माः ॥ तस्मादेते विशदपदवीं नाश्रितास्तेन तुर्यं वर्णं कृत्वा विषयमधुना वर्ण्यते वर्णधर्मः ॥ १७ ॥ ननु च के ते यैर्ब्राह्मणादिक्रमेण निरूपितो वर्णाचारः

समाप्तिः। स्वसुखनिरतः सन्निनिषिद्धासु रात्रिषु ॥ ऋतुकालाभिगामी स्यात्पुत्रार्थी युग्मासु ॥ अनृतावपि पर्वादिवर्ज्यं गच्छेत् ॥ शयनादिनियमा मदनपारिजातोक्ता एवात्रापि विज्ञेयाः ॥ अत्रानुक्तं दुरुक्तं किमपि यदि भवेत् इति श्लोकः ॥१॥ जयत्यखिलमेदिनविलयगीतकीर्तिः सुतः सहारणमहीपतेर्मदनपालपृथ्वीपतिः ॥ अनेन कृतिना कृता स्मृतिपदांकिता कौमुदी महार्णवसहोदरी मदनपारिजातानुजा ॥ २॥ ॥ इति कृतिमनोहरायां कौमुद्यां पंचमः किरणः॥ ॥ संख्यावन्निवहचकोरचर्वितायां कौमुद्यां मदनमुखेंदुनिर्गतायाम् ॥ संपूर्णः प्रकृतिमनोहरः कलानामुल्लासः श्रवणसुखावहश्चतुर्थः ॥ ॥ इति श्रीरायमदनपालविरचितायां शूद्रधर्मोत्पलद्योतिन्यां स्मृतिकौमुद्यां चतुर्थकल्लोल्लासे वैश्वदेवादिनिरूपणं नाम पंचमः किरणः ॥

## ITIHÂSAS, PURÂNAS, MÂHÂTMYAS, AND STOTRAS.

No. 25. ग्रंथनाम, इतिहाससमुच्चयः. Name: Itihâsasamuchchaya. पत्राणि १२४, folios 124; पंक्तयः ११, lines 11; अक्षराणि ३०, letters 30. शके १५७४ नंदनसंवत्सरांतर्गतश्रावणशुद्धचतुर्दश्यां लिखितोयं ग्रंथो नाशिकपुरे. S'aka 1574.

आरंभः । जयति पराशरसूनुः सत्यवतीहृदयनंदनो व्यासः ॥ यस्यास्यकमलगलितं वाङ्मयपौष्पं जगत्पिबति ॥ १ ॥ अग्रे ३६ अनुक्रमणिका । ॥ जनमेजय उवाच ॥ जलप्रदानं सुहृदां कृत्वा ते पांडुनंदनाः ॥ नारायणश्च विप्रर्षे किमकुर्वस्ततः परम् ॥

समाप्तिः । एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ सर्वशास्त्रार्थसारं हि किं भूयः श्रोतुमिच्छसि ॥ ॥ इति श्रीइतिहाससमुच्चये श्रीमन्महामुनिवर्यपुंडरीकश्रीमन्नारदमुनिवर्यसंवादो नाम द्वात्रिंशोध्यायः समाप्तः ॥ ॥

---

No. 26. ग्रंथनाम, काशीखंडम्—पूर्वभागः. Name: Kâśîkhanda—Part I.

पत्राणि १९४, folios 194; पंक्तयः ११, lines 11; अक्षराणि ५२, letters 52.

आरंभः । जयत्युमावल्लभवल्लभाप्ता काशीप्रकाशीकृतविश्वरूपा ॥ यथा शिवः सर्वगतोपि रुद्रस्तनूभृतां मुक्तिनिमित्तमीशः ॥ १ ॥

समाप्तिः । नराश्रुत्वं तदाख्यानं खखोल्कादित्यसंभवम् ॥ गरुडेशेन सहितं सर्वपापैः प्रमुच्यते ॥ ॥ इति श्रीस्कंदपुराणे काशीखंडे खखोल्कगरुडेश- योर्वर्णनं नाम पंचाशोध्यायः ॥ ॥ काशीखंडपूर्वार्द्धं समाप्तम् ॥

---

**No. 27.** ग्रंथनाम, **नाशिकेतोपाख्यानम्.** Name: Nâśiketopâkhyâna.

पत्राणि ३०, folios 30; पंक्तयः ११, lines 11; अक्षराणि ३८, letters 38. संवत् १६१८. वर्षे भाद्रपदमासे कृष्णपक्षे एकादश्यां तिथौ भृगुदिने. Saṁvat 1618. आद्यपत्रद्वयाभाव:

समाप्तिः । वस्त्रादिकं च कौशेयं धातुहेमादि सर्वथा ॥ शल्यादिरत्नमाख्या. तं यदंतं तत्र लभ्यते ॥८८॥ इह लोके भवेत्कीर्तिः परलोके सुखावहम् ॥ ८९ ॥ इति नाशिकेतोपाख्याने षोडशोध्यायः ॥

---

**No. 28.** ग्रंथनाम, **नृसिंहपुराणम्.** Name: Nṛisiṁhapurâṇa.

पत्राणि ९४, folios 94; पंक्तयः १२, lines 12; अक्षराणि ४८, letters 48. संवत् १८३७ फाल्गुनवदि २ लिषि (खि)तं शुभस्थाने चंद्रापुरीमध्ये Saṁvat 1837.

आरंभः । तप्तहाटककेशाग्र ज्वलत्पावकलोचन ॥ वज्राधिकनखस्पर्श दि- व्यसिंह नमोस्तु ते ॥१ ॥ २ ॥ हिमवद्वासिनः सर्वे मुनयो वेदपारगाः ॥ त्रिका- लज्ञा महात्मानो नैमिषारण्यवासिनः ॥ ३ ॥ महेंद्रादिरता ये च ये च विंध्य- निवासिनः ॥

समाप्ति : । ब्राह्मणो लभते विद्यां क्षत्रियो विजयी सदा ॥ शृण्वन्वैश्यो ध- नाढ्यो वै सुखमाप्नोति शूद्रजः ॥ नृसिंहपुराणं कथितं पूजिते भक्तवत्सले ॥ लोकनाथे प्रभौ तेन त्रैलोक्यं पूजितं भवेत् ॥ यो नारसिंहं वपुरास्थितः पुरा हिताय लोकस्य दितेः सुतं युधि ॥ नखैः सुतीक्ष्णैर्विददार वैरिणं दिवौ- कसां तं प्रणमामि केशवम् ॥ ॥ इति श्रीनारसिंहपुराणे आद्ये धर्मार्थकाम- मोक्षप्रदायिनीमानसतीवर्णनो नामाध्यायः ॥ ॥ नृसिंहपुराणं संपूर्णम् ॥

---

**No. 29.** ग्रंथनाम, **बृहन्नारदीयपुराणम्.** Name: Bṛihannâradîya- purâṇa.

पत्राणि १३४, folios 134; पंक्तयः ११, lines 11; अक्षराणि २७, letters 27.

आरंभः । वंदे वृंदावनासीनं इंदिरानंदमंदिरम् ॥— — — ——कारुण्यं परानंदं प्रभुं विभुम् ॥ १ ॥ ब्रह्मविष्णुमहेशाद्या यस्य शालाकसाधकाः ॥ नमा- मि देवं चिद्रूपं विशुद्धं परमं भजे ॥ २ ॥ सूत उवाच ॥ शौनकाद्या महात्मान ऋषयो ब्रह्मवादिनः ॥

समाप्तिः । संगाद्वा यदि वा मोहाद्ये शृण्वंतीदमुत्तमम् ॥ ते सर्वपापनिर्मुक्ता यास्यंति परमां गतिम् ॥ ५२ ॥ नारदीयमिदं श्रुत्वा वाचकं यो न पूजयेत् ॥ ब्रह्महत्यामवाप्नोति इतः परमंतिमपत्राभावः

---

**No. 30.** ग्रंथनाम, **ब्रह्मवैवर्तम्.** Name: Brahmavaivarta.

पत्राणि ६६, folios 66; पंक्तय : १३, lines 13; अक्षराणि ५४, letters 54.

आरंभः । नारायणं नमस्कृत्यइति ॥ १ ॥ भवानीतनयाद्यातनयानंददायक ॥ काशिवासिजनाघौघहारिन् ढुंढे नमोस्तु ते ॥ २ ॥ जयति जयति काशी काशितज्ञानराशिः शिवहरिहरिधातृश्रीगणेशांबिकानाम् ॥ निवसतिरियमाद्या तां भजध्वं भजध्वं स्मरत नमत शुद्धां शुद्धये कीर्तयध्वम् ॥ ३ ॥ ऋषय ऊचुः ॥ युगानि युगमानं च युगधर्माः सनातनाः ॥ युगेषु लोकचरितं श्रुतमस्माभिरादितः ॥ ४ ॥ पुनः कलियुगस्यास्य स्वरूपं वर्णयादतः ।

समाप्तिः । श्रीविष्णुरुवाच ॥ मनःक्षोभो विघ्नपूगो विघ्नाः कामादयो मताः ॥ अस्याग्रे ग्रंथस्त्रुटितः ।

---

**No. 31.** ग्रंथनाम, **ब्रह्मोत्तरखंडम्.** Name: Brahmottarakhaṇḍa.

पत्राणि १३४, folios 134; पंक्तयः १०, lines 10; अक्षराणि २८, letters 28.

ग्रंथसंख्या २१००.

आरंभः । ज्योतिर्मात्रसदानंदनिर्मलज्ञानरूपिणे ॥ नमः शिवाय शांताय ब्रह्मणे लिंगमूर्तये ॥१॥ ऋषय उवाच ( ऊचुः ) ॥ आख्यातं भवता सूत विष्णोर्माहात्म्यमुत्तमम् ॥ समस्ताघहरं पुण्यं समासेन श्रुतं च नः ॥२॥ इदानीं श्रोतुमिच्छामि(मो) माहात्म्यं त्रिपुरद्विषः ॥ तद्भक्तानां च माहात्म्यमशेषाघहरं परम् ॥३॥ तन्मंत्राणां तु माहात्म्यं तथैव द्विजसत्तम ॥ तत्कथायाश्च तद्भक्तेः प्रभावमनुवर्णय ॥४॥

समाप्तिः । ते जन्मभाजः खलु जीवलोके येषां मनो ध्यायति विश्वनाथम् ॥ वाणी गुणान्स्तौति कथां शृणोति श्रोत्रद्वयं ते भवमुत्तरंति ॥१३६॥ विविधगुणविभेदैर्नित्यमस्पष्टरूपं जगति च बहिरंतर्भासमानं महिम्ना ॥ स्वमहति विहरंतं वाङ्मनोवृत्तिरूपं परमशिवमनंतानंदसांद्रं प्रपद्ये ॥१३७॥ ॥ इति श्रीब्रह्मोत्तरखंडे स्कंदपुराणे श्रवणानुवर्णनं नाम द्वाविंशोध्यायः ॥ २२ ॥ ॥

---

**No. 32,** ग्रंथनाम, **रामगीता सटीका.** Name: Râmagitâ with commentary.

पत्राणि ८, folios 8; पंक्तयः १४, lines 14; अक्षराणि ४९, letters 49.

ग्रंथसंख्या ३००.

टीकाकारो **महीधरः**. Com., Mahîdhara.

आरंभः । ततो जगन्मंगलमंगलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥ चचार पूर्वाचरितं रघूत्तमो राजार्षिवर्यैरपि सेवितं यथा ॥ १ ॥

समाप्तिः । विज्ञानमेतदखिलं श्रुतिसारसंज्ञं वेदांतवेद्यचरणेन मयैव गीतम् ॥ यः श्रद्धया परिपठेद्गुरुभक्तियुक्तो मय्येव सोमलमनाः प्रविलीयतेऽते ॥ ६२ ॥ इति समाप्तिः ॥

टीकारंभः । गणेशं कमलानाथं प्राणिपत्य गुरोः पदम् ॥ करिष्ये रामगीताया व्याख्यानं बालबुद्धये ॥ १ ॥ अल्पग्रंथेन ब्रह्मविद्यां जिज्ञापयिषुर्वाल्मीकिः कथाप्रसंगमाह ॥ तत इति ॥

---

**No. 33.** ग्रंथनाम, **लिंगपुराणम्**. Name : Lingapurâṇa.

पत्राणि ४२३, folios 423; पंक्तयः १०, lines 10; अक्षराणि ३२, letters 32.

आरंभः । नमो रुद्राय हरये ब्रह्मणे परमात्मने ॥ प्रधानपुरुषेशाय सर्गस्थित्यंतकारिणे ॥ नारदोभ्यर्च्य शैलेशे शंकरे संगमेश्वरे ॥ हिरण्यगर्भेतर्लीने ह्यविमुक्ते हिमालये ॥

समाप्तिः । एवमुक्तेषु देवेषु नारदो भगवान् ऋषिः ॥ कराभ्यां च सुशुभ्यां च सूतं स्पर्शतु वा सह ॥ स्वस्त्यस्तु सूत भद्रं वो महादेववृषध्वजे ॥ श्रद्धा तवास्तु चास्माकं नमस्तस्मै शिवाय च ॥ श्रद्धा तवास्तु चास्माकं इत्युक्त्वा तु जगाम ह ॥ ॥इति श्रीलिंगपुराणे उपरिभागे अष्टचत्वारिंशोध्यायः॥ समाप्त ॥

---

**No. 34.** ग्रंथनाम, **वाराहपुराणम्**. Name : Vârâhapurâṇa.

पत्राणि ११२, folios 112; पंक्तयः १३, lines 13; अक्षराणि ३६, letters 36.

आरंभः । वासुदेवाय नमः ॥ नमः परितप्यते ॥ उत्तरेण तु गोविंदं दृष्ट्वा देवं परं शुभम् ॥ नासौ पतति संसारे यावदाभूतसंप्लवम् ॥

समाप्तिः । श्रुत्वा तु पूजयेद्यस्तु पौराणमिहतः शुचिः ॥ सर्वपापविनिर्मुक्तो विष्णुसायुज्यतां व्रजेत् ॥ इति श्रीवाराहपुराणे भगवच्छास्त्रे संसारचक्रे समाप्तम्॥ वाराहपुराणं समाप्तमिति ॥

---

**No. 35.** ग्रंथनाम, **विष्णुपुराणम्**. Name : Vishṇupurâṇa.

पत्राणि १४६–२०८, folios 146-208; पंक्तयः १२, lines 12; अक्षराणि ३८, letters 38.

ग्रंथसंख्या ३०००.

संवत् १५०८ वर्षे आषाढ वादि १२ भौमे. Samvat 1508.

आरंभत्रुटितः। मद्वाणभिन्नैर्जलदैर्नापो मुक्ता यथेप्सिताः ॥ किमुर्व्यामवनीपाला मद्वाहुबलानीर्जिताः ॥

समाप्तिः। कुलोपसंहारः ॥ अर्जुनापमानः ॥ कलिवर्णनम् ॥ केशिध्वजखांडिक्यसंवादः ॥ इति षष्ठांशः समाप्तः ॥

---

## POEMS, PLAYS, FABLES, &c.

**No. 36.** ग्रंथनाम, **अदितिकुंडलाहरणनाटकम्.** Name: Aditi-kuṇḍalâharaṇanâṭaka.

पत्राणि ८४, folios 84; पंक्तयः ९, lines 9; अक्षराणि ४४, letters 44.

ग्रंथसंख्या, २०७९.

शक १७७७. S'aka 1777.

कर्ता, **कादंबरामकृष्णः**. Author, Kâdambarâmakṛishṇa.

आरंभः। सत्यज्ञानसुखात्मकोपि वसुधाक्षेमार्थसद्विग्रहो नित्यश्रीरपि सस्पृहो रिपुगतश्रीसंग्रहे सादरम् ॥ एकोप्युल्लसदंगनातिविशदस्नेहैरनेकीकृतो नानाचित्रचरित्ररंजितसुरः श्रीमान् हरिः पातु वः ॥१॥ नांद्यंते सूत्रधारः

समाप्तिः। विप्रा वेदवितानकर्मनिपुणा नंदंतु संपद्युताः सर्वर्तूद्भवपुष्पसत्फलकुलैरामोदिनी मेदिनी ॥ कुर्वंतु क्षितिपा दुरात्मसु परं शार्दूलविक्रीडितं संतस्ते शरदां शतं त्वविकलं जीवंतु लक्ष्मीभुजः ॥६८॥ इति निष्क्रांताः सर्वे ॥ इत्यदितिकुंडलाहरणे सप्तमोंकः ॥

---

**No. 37.** ग्रंथनाम, **अनर्घ्यराघवनाटकम्.** Name: Anarghyarâghavanâṭaka.

पत्राणि ७०, folios 70; पंक्तयः ११, lines 11; अक्षराणि ४४, letters 44.

ग्रंथसंख्या, २११७.

शक १७७६. S'aka 1776.

कर्ता, **मुरारिमिश्रः**. Author, Murârimiśra.

आरंभः। निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने ॥ याभ्यामर्द्धविबोधमुग्धमधुरश्रीरर्द्धनिद्रायितो नाभीपल्वलपुंडरीकमुकुलः कंबोः सपत्नीकृतः ॥ १ ॥

समाप्तिः । सम्यक्संबोधसिद्धांज [न] विमलमनोदृष्टवस्तुस्थितीनामास्ते किंचि-न्मुनीनामभणितमिति मे नैष काव्यावतारः॥वाल्मीकेरेव वाचामवनितलनवागंतुवै-देशिकीनां कालेनायं विवर्तः किमपि लिपिकरः केवलोहं मुरारिः ॥ १५४ ॥ इति निष्क्रांताः सर्वे ॥ ॥ सप्तमोंकः ॥ ॥

---

**No. 38.** ग्रंथनाम, **अनर्घ्यराघवनाटकस्य टीका.** Name: a Commentary on the Anarghyarâghava.

पत्राणि १६३, folios 163; पंक्तयः ११, lines 11; अक्षराणि ४४, letters 44.

ग्रंथसंख्या ४९३०.

शक १५३५. Śaka 1535.

कर्ता, **रुचिपतिमहोपाध्यायः.** Author, RuchipatiMahopâdhâya.

आरंभः । दोर्दंडद्वितयेन खंडपरशोः कोदंडमारोपयन् कुर्वाणः सहसा विदेहनृपतिं पूर्णप्रतिज्ञाभरम् ॥ सानंदं कुशिकात्मजेन सुदृशां वृंदेन कौतूहलात्सव्रीडं प्रिययावलोकितमुखो रामोस्तु नः श्रेयसे ॥ १ ॥ अभूदभूतप्रतिपक्षभीतिः सदा समासादितभूरिनीतिः ॥ चिरं कृतार्थीकृतभूमिदेवः स्फुरत्प्रतापो नरसिंहदेवः ॥ २ ॥ सूनुस्तस्य वसुंधरापरिवृढस्यानंदकंदः क्षितेराधारो जगतामशेषविदुषां विश्रामकल्पद्रुमः ॥ दाने कर्णकथावलेपनिपुणः संसाररत्नांकुरो भूमीपालशिरोमणिर्विजयते श्रीभैरवेंद्रो नृपः ॥ ३ ॥ ४ ॥ ५ ॥ रेवौ आलवंशजातस्तस्यादेशान्महीशस्य ॥ श्रीरुचिपतिरतिगूढाः स्पष्टीकुरुते मुरारिकविवाचः ॥६॥७॥ इह खलु सकलपदार्थजातेषु स्वेष्टसाधनाज्ञादेव प्रेक्षावतां प्रवृत्तिर्दृते ॥

समाप्तिः । वीरयशोवर्णनेन मधुस्यंद इवेति भावः ॥ मंदाकिनीवियद्गंगेत्यमरः-दोषाकरं समवधीर्य गुणानशेषानाशु प्रकाशयाति सूर इवांशुराशीन् ॥ यस्तं प्रतिप्रणिहितौजलिरेष नित्यमालोकनान्ममकृतेर्मुदमादधातु ॥ १ ॥ ॥ इति समस्तप्रक्रियाविराजमानहरिनारायणपदसमलंकृतिमहाराजाधिराजश्रीमद्भैरवसिंहदेवनिदेशप्रोत्साहितवैजोलीग्रामवास्तव्यरेवोआलकुलोद्भवश्रीरुचिपतिमहोपाध्यायविरचितायामनर्घ्यराघवटीकायां सप्तमोंकः समाप्तः ॥ ॥

---

**No. 39.** ग्रंथनाम, **अभिनवरामायणचंपूः** Name: Abhinavarâmâyaṇachampû.

पत्राणि ११४, folios 114; पंक्तयः ९, lines 9; अक्षराणि ४४, letters 44.

ग्रंथसंख्या २८९१.

कर्ता, **दांतोपाभिधो लक्ष्मणः.** Author, Lakshmaṇ Dâṁṭe.

आरंभः । कल्याणं वो विधत्तां प्रबलगतिमहाविघ्ननागेंद्रसिंहो हस्तिश्रेष्ठः स्वतः सन् प्रथयति नितरां यो गजास्याभिधानम् ॥ अन्यच्चित्रं विधत्ते सृणिमपि सततं धारयन् पाणिना यो यश्चास्ते मोदकेनाकलितकरतलो व्यंजयन् भक्तभक्तिम्॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५॥ ६॥अस्ति प्रशस्तोत्तरकोसलेषु राज्ञामयोध्येति पुरी रघूणाम् ॥ नाम्नार्थतो या नगरीषु मध्ये दृश्याधिभूत्वेन दृशाधुनापि॥७॥

समाप्तिः । शाकेकाष्टमुनिक्षमापरिमिते १७८९ श्री शालिवाहाधिपे चाब्दे प्रोपपदे भवे परिवृते रौद्र्यार्द्रया तारया ॥ चैत्रे मासि गतेप्युदक् च तरणौ पक्षे सिते गीष्पतौ सप्तम्यामगमत्समापनमियं चंपूकृतिर्लक्ष्मणी ॥ १ ॥ ॥ इति श्रीमद्दांतोपाभिधलक्ष्मणविरचिताभिनवरामायणचंपूकाव्ये द्वादशस्तबकः ॥१२॥ सन १८७१ इ० ग्रंथो मुद्रितः नाशिके ॥

---

**No. 40.** ग्रंथनाम, **अमरुशतकं टीकया शृंगारदीपिकया युतं** Name: Amaruśataka with a commentary, entitled the Śriṅgâradîpikâ.

पत्राणि ११६, folios 116; पंक्तयः ५, lines 5; अक्षराणि ३८, letters 38.

कर्ता, **शंकराचार्यः**; टीकाकारो, **नारायणभूपालः**. Author, Saṁkarâchârya; Com., Nârâyaṇabhûpâla.

आरंभः । ज्याकृष्टिबद्धखटिकामुखपाणिपृष्ठप्रेंखन्नखांशुचयसंवलितोंबिकायाः त्वां पातु मंजरितपल्लवकर्णपूरलोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥ १ ॥

टीकारंभः ।अन्योन्यमेलनवशात्प्रथमं प्रवृद्धं मध्ये मनाग्व्यवहितं च कुतोपि हेतोः ॥प्राप्तं दृशामथ मनोरथभावयोग्यं पायाच्चिरं रतिमनोभवयोश्च युग्मम्॥१॥ मूलश्लोकान् समाहृत्य प्रक्षिप्तान् परिहृत्य च ॥ विधत्ते विदुषामिष्टां टीकां शृंगारदीपिकाम् ॥ २ ॥ अवतारोथ संबंधोभिप्रायो भावलक्षणम् ॥ नायिका तदवस्था च नायकश्च ततो रसः ॥ ३ ॥ अंगानि कैशिकीवृत्तेरलंकारास्ततः क्रमात्॥ इत्येतानि प्रवक्ष्यंते यथासंभवसूचनैः ॥४॥ साक्षाद्भगवान् शंकराचार्यः कविस्तावदाविघ्नेन ग्रंथपरिसमाप्त्यर्थम्

समाप्तिः । प्रासादे सा दिशि दिशि च सा पृष्ठतः सा पुरः सा पर्यंके सा पथि पथि च सा तद्वियोगातुरस्य ॥ हंहो चेतः प्रकृतिरपरा नास्ति मे कापि सा सा सा सा सा सा जगति सकले कोयमद्वैतवादः ॥ १०० ॥ ॥ इतिश्रीमच्छंकराचार्यविरचितममरुकशतकं संपूर्णम् ॥ ॥

टीकासमाप्तिः । अंगीकृत इत्यनेन नानाविधोपचारैरुपलालितः किमुच्यत इत्ययमर्थः सूचितः ॥ अनेन सर्वेषामुपादेयत्वमुक्तम् ॥ ९९ ॥ १०० ॥ ॥ इति श्रीसकलवेदविद्याविशारदवीरनारायणभूपालविरचिता शृंगारदीपिका नाम टीका समाप्ता ॥ ॥

---

**No. 41.** ग्रंथनाम, **अश्वधाटी.** Name: Aśvadhâṭî.

पत्राणि ३, folios 3; पंक्तयः १२, lines 12; अक्षराणि ३८, letters 38.

ग्रंथसंख्या ८३.

शकः १७८८. Śaka 1788.

कर्ता, **जगन्नाथपंडितः** Author, Jagannâthapaṇḍita.

आरंभः। अंकादृतक्षिति[ज]मंकानाभिज्ञशशिशंका[क]रास्यसुषमं टंकारिचापमनुलंकाशरक्षतजपंकावरूषितशरम्॥ त्वं कामदं विहितरंकावनं दनुजकं कालनोदिनमनातंकाय वत्स भज तं कालमेघरुगहंकारहारिवपुषम्॥ १ ॥

समाप्तिः। दक्षाध्वरप्रशमदक्षाग्रहं विबुधपक्षाभिपालनपरं लक्षामृतद्युतिवलक्षात्मकं हताविपक्षातनुस्मयकरम्॥ उक्षाधिरोहि हत—लासुरपकरमक्षामताश्रयदयंत्र्यक्षाव्हयं प्रणतरक्षामणिप्रणयियक्षाधिपं स्मरमहः॥ २९ ॥ ॥ इति श्री जगन्नाथकृता अश्वधाटी समाप्ता॥ ॥

---

**No. 42.** ग्रंथनाम, **आनंदसागरः.** Name: Ânandasâgara.

पत्राणि १२, folios 12; पंक्तयः ८, lines 8; अक्षराणि ३२, letters 32.

ग्रंथसंख्या २१४.

शक. १७७३. Śaka 1773.

कर्ता, **नीलकंठदीक्षितः.** Author, Nîlakaṇṭhadîkshita.

आरंभः। विज्ञापनार्हविरलावसरानवाप्त्या मंदोद्यमे मयि दवीयसि विश्वमातुः॥ अव्याजभूतकरुणापवनापविद्धान्यंतः स्मराम्यहमपांगतरंगितानि ॥ १ ॥ आवेद्यतामविदितं किमथाप्यनुक्तं वक्तव्यमांतररुजोपशमाय नालम् ॥इत्युच्यसे किमपि तच्छ्रवणे निधातुं मातः प्रसीद मलयध्वजपांड्यकन्ये॥ २ ॥

समाप्तिः। कालानपास्य विषुवायनसंक्रमादीनस्तंगते हिमकरे च दिवाकरे च॥ अंब स्मरेयमपि ते चरणारविंदमानंदलक्षणमपास्तसमस्तभेदम्॥ १०५ ॥ चतुरध्यायीरूपं कलहरसव्यंजनं जगन्मातुः॥ अपरब्रह्ममयं वपुरंतः शशिखंडमंडनमुपासे ॥ १०६ ॥ इति श्रीमदप्पयदीक्षिततनुजनीलकंठदीक्षितविरचितमानंदसागरस्तोत्र संपूर्णम् ॥ ॥

---

**No. 43.** ग्रंथनाम, **आमोदमंदारः लक्ष्मीस्तुतिशतकम्.** Name: Âmodamandâra.

पत्राणि १३, folios 13; पंक्तयः १०, lines 10; अक्षराणि २४, letters 24.

ग्रंथसंख्या, १९५.

कर्ता, **लक्ष्मणः**. Author, Lakshmaṇa.

आरंभः। नागो महानसि गजानन सत्यमेतद्यन्नागसंभवमुरीकुरुषे करे त्वम् ॥ तन्नागसंभवगतं कुरु मां करे त्वं यस्मादनुग्रहकरो जगतामसि त्वम्॥ १ ॥ पद्मा हरेः प्रियतमा कमलेति मेति लक्ष्मी रमाब्धितनया कमलालयेति ॥ नामानि ते भुवनमातरसौ मदीया गृण्हातु देवि रसना भवताद्रसज्ञा ॥ २ ॥

समाप्तिः। आमोदमंदार इति स्तवस्य लक्ष्म्याः प्रथामेतु कविप्रक्लृप्तम् ॥ नामास्य शाकः खनवर्षिभूमिमितः १७९० कविलक्ष्मणनामधेयः ॥ १०९ ॥ ११० ॥ ॥ १११ ॥ काव्यदोषगुणयोर्ग्रहणेन क्ष्वेडकौस्तुभकयोरिव मेब्धेः ॥ शं भवंतु कृतिनो विधवंतु पूज्यशब्दसमयान्न विषादः ॥११२॥ ॥इति श्रीमच्छ्रोत्रियदांतकुलालंकारजगन्नाथात्मजलक्ष्मणविरचितामोदमंदाराख्यलक्ष्मीस्तुतिपद्यशतकं समाप्तम् ॥ ॥

---

**No. 44.** ग्रंथनाम, **आर्याशतकम्**. Name: Âryâśataka.

पत्राणि ५, folios 5; पंक्तयः १०, lines 10; अक्षराणि ३८, letters 38.

ग्रंथसंख्या १२५.

कर्ता, **अप्पयदीक्षितः** Author, Apyayadîkshita.

आरंभः। दयया यदीयया वाक् नवरसरुचिरा सुधाधिकोदेति ॥ शरणागतचिंतितदं तं शिवचिंतामणिं वंदे ॥ १ ॥

समाप्तिः। निर्व्याधि मे शरीरं निराधि चेतः सदा समाधिपरम् ॥ कुरु शर्वे सदा त्वं नान्यं कामं वृणे कंचित् ॥९९॥ आर्यापतेः पदाब्जे निहितशतपद्यपत्रमयपुष्पम् ॥ आर्याशतं सुकृतिनां हृदयामोदं सदा वहतु॥ १०० ॥

---

**No. 45.** ग्रंथनाम, **कर्पूरमंजरीसट्टकम्. उपरूपकभेदः** Name: Karpûramañjarî.

पत्राणि २५, folios 25; पंक्तयः ११, lines 11; अक्षराणि ४०, letters 40.

ग्रंथसंख्या ६८७.

कर्ता, **राजशेखरः**. Author, Râjaśekhara.

आरंभः। भद्दं भोदु सरस्सईअ कइणो णंदंतु वासाइणो अण्णाणं पि परं पअट्टदु वरा वाणी छइल्लप्पिआ ॥ वच्छोमी तह माअही फुरदु णो सा किंच पंचालिआ रीदीओ विलिहंतु कव्वकुसला जोण्हं चओरा विअ ॥१॥ अवि अ॥ अकलिअपरिरंभविब्भमाइं अजणिअचुंबणडंबराइं दूरं ॥ अघडिअघणताडणाइँ णिच्चं णमह अणंगरईण मोहणाइं ॥ २ ॥ ३ ॥ ४ ॥ नांद्यंते सूत्रधारः

समाप्तिः । जदो ॥ कुंतलेसरसुआकरफंसप्फारसोक्खसिढिलीकिदसग्गो ॥ पाल्लएमि वसुहाअलरज्जं चक्कवट्टिपअवीरमाणिज्जं ॥२१॥ तह वि एदं होदु दाव ॥ सत्थो णंददु सज्जणाण सअलो वग्गो खलाणं पुणो णिच्चं खिज्जउ होउ बम्हणजणो सच्चासिहो सव्वदा ॥ मेहो मुंचदु संचिअं पि सलिलं सस्सोचिअं भूअले लोओ लोहपरम्मुहोऽणुदिअहं धम्मे मई भाअदु ॥ २२ ॥ इति निष्क्रांताः सर्वे ॥ ॥चतुर्थं जवनिकांतरम् ॥ ४ ॥

---

**No. 46.** ग्रंथनाम; **कलिविडंबनम्.** Name: Kalividambana.

पत्राणि ४, folios 4; पंक्तयः १३, lines 13; अक्षराणि ३८, letters 38.

ग्रंथसंख्या १०२.

शक १७८४. Saka 1784.

कर्ता, **नीलकंठदीक्षितः.** Author, Nîlakanthadîkshita.

आरंभः । न भेतव्यं न बोद्धव्यमश्राव्यं वादिनो वचः ॥ झटिति प्रतिवक्तव्यं सभासु विजिगीषुभिः ॥ १ ॥ असंभ्रमो विलज्जत्वमवज्ञा प्रतिवादिनि ॥ हासो राज्ञः स्तवश्चेति पंचैते जयहेतवः ॥२॥ उच्चैरुद्घुष्य जेतव्यं मध्यस्थश्चेदपंडितः पंडितो यदि तत्रैव पक्षपातोधिरोप्यताम् ॥ ३ ॥ लोभो हेतुर्धनं साध्यं दृष्टांतस्तु पुरोहितः ॥ आत्मोत्कर्षो निगमनमनुमानेष्वयं विधिः॥ ४ ॥

समाप्तिः। परच्छिद्रेषु हृदयं परवार्तासु च श्रवः॥परमर्माणि वाचं च खलानामसृजद्विधिः ॥९८॥ विषेण पुच्छलग्नेन वृश्चिकः प्राणिनामिव ॥ कालिना दशमांशेन कालः सर्वोपि दारुणः ॥९९॥ यत्र भार्यागिरो वेदा यत्र धर्मोर्थसाधनम् ॥ यत्र स्वप्रतिभानं च तस्मै श्रीकलये नमः ॥ १०० ॥ काममस्तु जगत्सर्वं कालस्यास्य वशंवदम् ॥ कालकालं प्रपन्नानां कालः किं नः करिष्यति ॥१॥ कविना नीलकंठेन कलेरेतद्विडंबनम् ॥ रचितं विदुषां प्रीत्यै राजास्थानानुमोदनम् ॥२॥ ॥ इतिश्रीमदप्पयदीक्षिततनूजनीलकंठदीक्षितविरचितं कलिविडंबनं संपूर्णम्॥ ॥

---

**No. 47.** ग्रंथनाम, **कादंबरीविषमपदवृत्तिः.** Name: Kâdambarî-vishamapadavritti.

पत्राणि १७, folios 17; पंक्तयः १०, lines 10; अक्षराणि ४८, letters 48.

शक १७३२. Saka 1732.

कर्ता, **वैद्यनाथः** Author, Vaidyanâtha.

आरंभः । ईशविष्णुकमलासनमुख्यैर्दैवतैरपि समीहितसिद्ध्यै ॥ वंदितो गजमुखः सुखहेतुः संमुखो भवतु कार्यमुखे नः ॥१॥ ग्रंथारंभे विघ्नविघाताय ब्रह्मविष्णुशिवतया परमेश्वरं नमस्यति ॥ रजोजुषइत्यादिः

समाप्तिः । लिखितं नामेति॥सौभाग्येन शशिनि स्वीयं नाम लिखितं स्वस्योत्कृष्टत्वबोधनाय ॥ बंधकीति ॥ बंधक्यसतीकुलटेत्यमरः ॥ ॥ इति तत्सदुपाख्यरामकृष्णसूनुवैद्यनाथविरचिता कादंबरीपूर्वार्द्धविषमपदवृत्तिः संपूर्णा ॥ ॥

---

**No. 48.** ग्रंथनाम, **कादंबरीव्याख्या चषकाख्या** Name: a Commentary on the Kâdambarî entitled the Chashaka.

पत्राणि ६७, folios 67; पंक्तयः १७, lines 17; अक्षराणि ४४, letters 44.

ग्रंथसंख्या ३१३२.

कर्ता, **त्रिपाठी शिवरामः**. Author, Śivarâma Tripâṭhî.

आरंभः । भागीरथीव भुवने यदीयत्वेन भारती ॥ याता वाणीतिविख्यातिं तं बाणं समुपास्महे ॥ १ ॥ गौडजाताब्धिसंभूतो वाक्सिद्धिसुधया भृतः ॥ त्रिलोकचंद्रस्य सुतः कृष्णरामाभिधः कृती ॥ २ ॥ कृष्णरामतनूजेन शिवरामेण रच्यते॥ रम्या कादंबरीव्याख्या चषकाख्या सतां मुदे ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ समाचारप्राप्तमंगलप्रवृत्तिविच्छेदाभावाय तदालिलेख ॥ रजोजुषइति ॥

समाप्तिः । अप्रबुद्धस्य निद्रितस्य बोधनं अनपेक्षता अनुजीविनां सेवकानां दुःखदारुणाः स्वामिता प्रभुता असंभाव्यं संभावयितुमयोग्यम्॥ ॥ इति श्रीमत्त्रिपाठित्रिलोकचंद्रात्मजरामकृष्णसूनुशिवरामकृतिश्चषकाख्या कादंबरीव्याख्या संपूर्णा ॥ ॥ पूर्वार्द्धस्येयं टीका ॥

---

**No. 49.** ग्रंथनाम, **कृष्णभक्तिचंद्रिकानाटकम्**. Name: Kṛishṇabhaktichandrikânâṭaka.

पत्राणि २०, folios 20; पंक्तयः ११, lines 11; अक्षराणि ३८, letters 38.

ग्रंथसंख्या ५२०.

शक १६१४. Śaka 1614.

कर्ता, **अनंतदेवः**. Author, Anantadeva.

आरंभः। कोपि सगोपकुमारः स्फुरति समाजे व्रजस्त्रीणाम् ॥ नवजलधर इव मध्ये ताडितां परितः स्फुरंतीनाम् ॥ १ ॥ अपि च ॥ प्रत्येकं तनुरोमसंश्रितजगज्जालाय गोष्ठेशितुर्बालाय प्रविनाशितातिविपुलव्यालाय वृंदावने॥गोपालाय महीभरक्षितिभृतां कालाय पद्मस्फुरन्नालाय स्फुटपीतदावदहनज्वालाय नित्यं नमः ॥ नांद्यंते सूत्रधारः ॥ परितः पंडितमंडितमंडलीमाखंडलसभामिव

समाप्तिः । श्रीकृष्णं समुपैति कोपि विपुलक्लेशैस्तपस्यादिभिः सद्यः सौख्यघनेन कश्चन पुनः संसेवने नैति तम् ॥ पद्भ्यामध्वानि कोपि याति निरूपानद्भ्यामतीवातपे

कश्चिन्मत्तमतंगजोपरिगतः छत्रेण चालंकृतः ॥ १६९ ॥ क्लेशान्विनाशयति केशव एव पुंसां संतोषमेव च स संततमातनोति ॥ शीलं त्विदं भगवतः सहजं विबुध्य जाता वयं जगति सांप्रतमस्य भृत्याः ॥ १७० ॥ ॥ इतिश्रीमदापदेवसूनुना विरचितमंनतदेवेन कृष्णभक्तिचंद्रिकाभिधानं नाटकं संपूर्णम् ॥ ' ॥

---

**No. 50.** ग्रंथनाम, **खंडप्रशस्तकाव्यम्.** Name: Khaṇḍapraśasta-kâvya.

पत्राणि ४८, folios 48; पंक्तयः ८-९, lines 8-9; अक्षराणि २६-२८- letters 26-28.

ग्रंथसंख्या ६६३.

शक १७४८. Śaka 1748.

कर्ता, **नरसिंहः.** Author, Narasiṁha.

आरंभः। राकाचंद्रावदातोत्तममणिकिरणश्रेणिभास्वत्फणालीराजद्वींकेंद्रोद-रकृतशयनः सांद्रधाराधरश्रीः ॥ पायात्सौधाब्धिकन्याशयवलितपदांभोजानिर्य-त्स्रवंतीसंगादामृष्टतापस्मरहरणपटोः सोयमाद्यो हि रामः ॥ १ ॥

समाप्तिः। श्रीखंडखंडवत्खंडप्रशस्तं शस्तमानसैः ॥ मतिशाणेथ संघृष्य हृदि धार्यं सुशीतलम् ॥३१३॥ साधुद्विजसुसंगेन दष्टेक्षुः क्षरते रसम्॥ दशावतारमाला-र्थश्चंडपंडितसंगमात् ॥३१४॥ यः ख्यातः कपिलो मुनिर्मुनिवरस्तद्वंशजो मुद्ग-लस्तज्जः सर्वकलाकलापकुशलो नागेशसंज्ञो द्विजः ॥ तत्सूनुर्नरसिंहसंज्ञिततनु-स्तेनैव संभावितं काव्यं रामदशाकृतेः शुचिरसं खंडप्रशस्ताभिधम् ॥३१५॥ ॥इति नागनाथवरतनयपंचजनपंचाननसंभावितं दशावतारमालामयं श्रीरामवर्णनप्रधानं खंडप्रशस्तं काव्यं समाप्तम् ॥ ॥

---

**No. 51.** ग्रंथनाम, **खंडप्रशस्तिः.** Name: Khaṇḍapraśasti.

पत्राणि १२, folios 12; पंक्तयः १३, lines 13; अक्षराणि ४४, letters 44.

ग्रंथसंख्या ४२९.

शक १७८४. Śaka 1784.

कर्ता, **हनूमान्.** Author, Hanûmat.

आरंभः। कृतक्रोधे यस्मिन्नमरनगरी मंगलरवा नवातंका लंका, समजनि वनं वृश्चति साति ॥ सदा सीताकांतप्रणतिमतिविख्यातमहिमा हनूमानव्यान्नः कपि-कुलशिरोमंडनमणिः ॥१॥ वियत्पुच्छातुच्छोच्छलितजलगर्भं निधिरपामपां नाथः पाथः पृथुलवदुस्थो वियदभूत्॥ निधिर्भासामौर्वो दिनपतिरभूदौर्वदहनश्चलत्काये यस्मिन्स जयति हरिर्मीनवपुषा ॥२॥

समाप्तिः। प्रेंखद्वारितरंगमुन्मदगजग्राहप्रगल्भं भटव्यावल्गत्स्फुटपुंडरीकनिलयं डिंडीरपिंडावलिम् ॥ म्लेच्छानीकमहार्णवं सुविपुलं संग्रामकल्पावधौ यश्चौर्वामिरिवा-

भवतु द्यतु स वः कल्काने कल्की हरिः ॥ ९६ ॥ ॥ इति श्रीहनूमद्विराचितं दशावतारवर्णनरूपं खंडप्रशस्तिकाव्यं संपूर्णम् ॥ ॥

---

**No. 52.** ग्रंथनाम, **गीतगौरीपतिः**. Name: Gîtagaurîpati.

पत्राणि २९, folios 29; पंक्तयः ८, lines 8; अक्षराणि २२, letters 22.

ग्रंथसंख्या ३४९.

शक १७८२. Saka 1782.

कर्ता, **भानुदत्तः**. Author, Bhânudatta.

आरंभः। संध्यानृत्यविधौ भुजंगमपतेर्गीतामृतं शृण्वतः प्रत्यक्षस्खलितप्रमोदसलिलस्तोमे तनौ सर्पति ॥ मौलेरुत्पथगा किमु त्रिपथगा जातेति शंकाजुषो देवस्य त्रिपुरांतकस्य चकितं व्यालोकितं पातु वः ॥१॥ भानोर्गीतं सुधास्फीतं शैभोर्डमरुडिंडिमः ॥ विदुषां रसना रंगभूमिर्भीरति नृत्यताम् ॥ २ ॥

समाप्तिः। अर्धे वक्षसि शैलराजदुहितुर्वक्षोरुहस्फूर्जितं संवीक्ष्य प्रतिबिंबमिंदुसुभगे नैजे तथा वक्षसि ॥ स्वस्यापि स्तनमंडलांकुरधिया व्यालोलमालोकयन् देवो दैन्यमपाकरोतु गिरिजादेहार्द्धधारी हरः ॥ २ ॥ भवानी नर्तनैर्यावदंगलग्ना पुरद्विषः ॥ विद्वत्कंठगता तद्वद्भानोर्वाणी विराजताम् ॥ ३॥ ॥ इति श्रीभानुदत्तकविविरचिते गीतगौरीपतौ दशमः सर्गः ॥ ॥

---

**No. 53.** ग्रंथनाम, **घटखर्परं सटीकम्**. Name: Ghaṭakharpara with commentary.

पत्राणि ११, folios 11; पंक्तयः १०, lines 10; अक्षराणि २६, letters 26.

ग्रंथसंख्या १७०.

कर्ता, **कालिदासः**. Author, Kâlidâsa.

आरंभः। निचितं खमुपेत्य नीरदैः प्रियहीना हृदयावनीरदैः ॥ सलिलं निहितं रजः क्षितौ रविचंद्रावपि नोपलक्षितौ ॥

समाप्तिः। भावानुरक्तवनितासुरतैः शपेयमालभ्यचांबु तृषितः करकोशपेयम् ॥ जीयेत येन कविना यमकैः परेण तस्मै वहेयमुदकं घटखर्परेण ॥२२॥ ॥ इति श्रीकालिदासकृतं घटखर्पराख्यं काव्यं संपूर्णम् ॥ ॥

टीकारंभः। प्रोषितप्रमदयेदमुच्यते॥ इति षष्ठश्लोकेनान्वयः ॥ प्रोषितप्रमदयागतभर्तृकया सख्या अग्रत इदं निचितमित्यादि वक्ष्यमाणं चोच्यते

टीकासमाप्तिः।यदि प्रतिज्ञां न पालयामि तृषि[तः] पिपासितः करकोशपेयं हस्तपुटपातव्यं चालभ्य प्राप्य शपेय ॥ ॥ इति श्रीवानाचार्यश्रीअडकमल्लविरचितायां घटखर्परटीकायां सुबोधिन्यां समाप्तिः ॥ ॥

No. 54. ग्रंथनाम, चंडकौशिकनाटकम्. Name: Chandakauśika.

पत्राणि ५४, folios 54; पंक्तयः ७, lines 7; अक्षराणि ३०, letters 30.

ग्रंथसंख्या ७०८.

शक १७८१; Śaka 1781.

कर्ता, क्षेमीश्वरः. Author, Kshemîśvara.

आरंभः। देवस्त्रैगुण्यभेदात्सृजति वितनुते संहरत्येव लोकानस्यैव व्यापिनीभिस्तनुभिरपि जगन्व्याप्तमष्टाभिरेव ॥ वंद्यो नास्येति पश्यन्निव चरणगतः पातु पुष्पांजलिर्वः शंभोर्नृत्यावतारे वलयफणिफणाफूत्कृतैर्विप्रकीर्णः ॥ १ ॥

समाप्तिः। भरतवाक्यम् ॥ प्रमुदितसुजना समृद्धसस्या भवतु मही विजयी च भूमिपालः ॥ कविभिरुपाहिता निजप्रबंधे गुणकणिकाप्यनुगृह्यतां रसज्ञैः ॥ ३१ ॥ अपि च ॥ येनादिश्य प्रयोगं घनपुलकभृता नाटकस्यास्य हर्षाद्वस्त्रालंकारहेम्नां प्रतिदिनमकृशा राशयः संप्रदत्ताः ॥ तस्य श्रीक्षत्रसूतेर्भ्रमतु जगदिदं कार्तिकेयस्य कीर्तिः पारे क्षीराख्यसिंधोरपि कवियशसा सार्द्धमग्रेसरेण ॥ ३२ ॥ इति निष्क्रांताः सर्वे ॥ ॥ पंचमोंकः ॥ ५ ॥ ॥ इति श्रीमदार्यक्षेमीश्वरकृतं चंडकौशिकं नाम नाटकं संपूर्णम् ॥ ॥

---

No. 55. ग्रंथनाम, चंद्रविलासनाटकम्. Name: Chandravilâsa-nâṭaka.

पत्राणि ९, folios 9; पंक्तयः १२, lines 12; अक्षराणि ३०, letters 30.

ग्रंथसंख्या २१६.

कर्ता, गंगाधरः. Author, Gangâdhara.

आरंभः। श्रीमान् संततसांबशंकराशिरःश्लाघ्यैकलीलांचितः सीतालक्ष्मणसंयुतः प्रतिदिनं योगींद्रनेत्रोत्सवः ॥ दृप्यद्रावणघोरदर्पतिमिरव्रातच्छटाभेदकः कल्याणानि सदा तनोतु भगवान् श्रीरामचंद्रो मम ॥ १ ॥ नांद्यंते सूत्रधारः ॥ सहर्षं पुरतोवलोक्य ॥ कथमहो शरदियं प्राप्ता ॥

समाप्तिः। चंद्रः ॥ बहुकला कुशला सितशेखरा पटुसुवर्णजयिष्णुशुभाकृतिः कुमुदिनी रमणी मम संगता बहुमनोरथकल्पकवल्लरी ॥ ११ ॥ किमतः परं करणीयं ॥ तथापीदमस्तु भरतवाक्यम् ॥ स्थाने स्वकीये विजितारिवर्गा नवोन्मिषन्मोदभरा नृपालाः ॥ भवंतु संपत्सुखिनश्च संतो लोकान्सदा रक्षतु रामचंद्रः ॥ १२ ॥ इति निष्क्रांताः सर्वे ॥ ॥ पंचमोंकः ॥ ॥ इति श्रीगंगाधरविरचितं चंद्रविलासनाटकं संपूर्णम् ॥ ॥

---

**No. 56.** ग्रंथनाम, **जानकीपरिणयनाटकम्.** Name: Jânakîpariṇayanâṭaka.

पत्राणि १००, folios 100; पंक्तयः ९, lines 9; अक्षराणि ३६, letters 36.

ग्रंथसंख्या २०२९.

शाक १७७७. Saka 1777.

कर्ता, **रामभद्रदीक्षितः.** Author, Râmabhadradîkshita.

आरंभः। संसक्तानिव पातुमौपनिषद्व्याहारमाध्वीरसानुन्माष्टुं व्रजसुंदरीकुचतटीपाटीररेणूनिव। उन्मीलन्मुरलीनिनादबहुलामोदोपसीदद्रवी जिव्हालीढमलीकबल्लवशिशोः पादांबुजं पातु वः॥ १ ॥

समाप्तिः। आचंद्रार्कमिदं भवेदविरलं गोब्राह्मणेभ्यः शुभं भूयस्त्वागमवृद्धसेविभिरतिप्रख्यैरमी राजभिः। लाल्यंतां सरसोक्तयश्च कवयः शश्वद्रसज्ञैः समं स्यादेतस्य कवेश्च भक्तिरचला देवे रघूणां प्रभौ॥ ४८॥ इति निष्क्रांताः सर्वे॥॥ सप्तमोंकः॥॥

---

**No. 57.** ग्रंथनाम, **दमयंतीकथाचंपूः** Name: Damayantîkathâchampû.

पत्राणि ४८, folios 48; पंक्तयः १५, lines 15; अक्षराणि ६०, letters 60.

ग्रंथसंख्या २९००.

कर्ता, **त्रिविक्रमभट्टः.** Author, Trivikramabhaṭṭa.

आरंभः। जयति गिरिसुतायाः कामसंतापवाहिन्युरसि रसनिषेकश्चांदनश्चंद्रमौलिः। तदनु च विजयंते कीर्तिभाजां कवीनामसकृदमृतबिंदुस्यंदिनो वाग्विलासाः॥ १॥॥ २॥ अगाधांतःपरिस्यंदं विबुधानंदमंदिरम्। वंदे रसांतरप्रौढं स्रोतः सारस्वतं महत्॥ ३॥ अग्रे खलानंदाकतिपयकविवर्णनादिश्लोकाः॥ ४॥ ५॥ ६॥ ७॥ ८॥ ९॥ १०॥ ११॥ १२॥ १३॥ १४॥ १५॥॥ १६॥ १७॥ अस्ति समस्तमुनिमनुजवृंदारकवृंदेत्यादिना कविवंशवर्णनम्॥ २४॥ उदात्तनायकोपेता गुणवद्वृत्तमुक्तका। चंपूश्च हारयष्टिश्च केन न क्रियते हृदि॥ २५॥ अस्ति समस्तविश्वंभराभोगभालस्थलभास्वल्ललामलीलायमान

समाप्तिः। अपसरति न चक्षुषो मृगाक्षीरजनिरियं च न याति नैति निद्रा। प्रहरति मदनोपि दुःखितानां बत बहुशोभिमुखीभवंत्यपायाः॥ १॥ इति विहितवितर्कविशविध्वस्तनिद्रः सजलजडममीलत्पक्ष्मचक्षुर्दधानः हरचरणसरोजद्वंद्वमाधाय चित्ते नृपतिरिति विदग्धः स क्रि (त्रि) यामामनैषीत्॥ १॥॥ इति श्रीत्रिविक्रमभट्टविरचितायां दमयंतीकथायां सप्तम उच्छ्वासः समाप्तः॥

---

**No. 58.** ग्रंथनाम, **दशकुमारचरितं गद्यकाव्यम्.** Name: Daśakumâracharita.

पत्राणि ८३, folios 83; पंक्तयः १०, lines 10; अक्षराणि ३८, letters 38.

ग्रंथसंख्या १९७१.

शके १७८९ श्रावणवद्य १३. Śaka 1785.

कर्ता, **दंडी.** Author, Daṇḍin.

आरंभः । श्रुत्वा तु भुवनवृत्तांतमुत्तमांगना विस्मयविकसिताक्षी सस्मितमिदमभाषत ॥ दयित त्वत्प्रसादादद्य मे चरितार्था श्रोत्रवृत्तिः ।

समाप्तिः । अर्थमूला हि दंडविशिष्टकर्मारंभाः ॥ न चान्यदस्ति पापिष्ठं तत्र दौर्बल्यादिग्राकलय्य योगानन्वतिष्ठम् ॥ ॥ इति श्रीदंडिनः कृतौ दशकुमारचरिते विश्रुतचरितं नामाष्टम उच्छ्वासः ॥ ॥ इति श्रीमहामहोपाध्यायकविकुलसार्वभौमनिखिलविद्याकुमुदिनीशर्वरीश्वरसरस्वतीनिश्वसितकविदंडिपंडितविरचितं दशकुमारचरितं संपूर्णम् ॥ ॥

---

**No. 59.** ग्रंथनाम, **दशकुमारस्य टीका पदचंद्रिका.** Name: Padachandrikâ, a commentary on the Daśakumâracharita.

पत्राणि ५९, folios 55; पंक्तयः १४, lines 14; अक्षराणि ४०, letters 40.

ग्रंथसंख्या १९२९.

शके १७८९. Śaka 1785.

कर्ता, **आचार्यसरस्वती.** Author, Âchâryasarasvatî.

आरंभ : ॥ श्रुत्वेति ॥ भुवनवृत्तांतं चतुर्दशभुवनवृत्तांतं ॥ पातालवृत्तांतमित्यप्यर्थ : ॥ विष्टपं भुवनं जगदित्यमर : ॥ वार्ता प्रवृत्तिर्वृत्तांत इत्यपि ॥ उत्तमांगना नायिका ।

समाप्तिः । योगान् विविधोपायान् ॥ योगो युक्तेव संगत्यां कार्मणा ल—लाभयोः देहदार्ढ्यप्रयोगे च विष्कंभादौ तथात्मनि ॥ उपाये भेषजे विद्भिर्दृष्टिसंहनने धने ॥ विस्रब्धे पतिनिध्याने युक्तिन्याये च योजने इति महीप : ॥ ॥ ॥ इति श्रीसकलशास्त्रार्थसार्थकीकृतशेमुषीविलाससांद्रप्रवर्तितासंख्ययशःसमुद्रविद्वत्परिषच्चंद्रयतींद्रसर्वविद्यानिधानकवींद्राचार्यसरस्वतीकृतायां दशकुमारव्याख्यायां पदचंद्रिकाभिधायां विश्रुतचरितं नामाष्टम उच्छ्वास : ॥ ॥

---

**No. 60.** ग्रंथनाम, भूषणाख्या दशकुमारस्य टीका. Name: Bhûshaṇa, a commentary on the Daśakumâracharita.

पत्राणि २६, folios 26; पंक्तयः १४, lines 14; अक्षराणि ४४, letters 44.

ग्रंथसंख्या १००२.

शके १७८५. Śaka 1785.

कर्ता, शिवरामः. Author, Śivarâma.

आरंभ। अपर्णया हैमवत्या युक्तः स्थाणुः प्रसीदत ॥ सर्वतापप्रशमनः सर्वाभीष्टफलप्रदः ॥ १ ॥ २ ॥ पित्रादिस्वनामश्लोकाः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ श्रुत्वेति ॥ भुवनस्य जगती वृत्तांतं रुक्मिण्यादिभिः कृष्णस्य इंद्रस्य गुरोः पितामहस्य शाकुंतलादुष्यंतादीनां च गांधर्वविवाहकरणविषयां प्रवृत्तिं ॥ वार्ता प्रवृत्तिर्वृत्तांत इत्यमरः ॥

समाप्तिः सैकतास्पृष्टपादन्यासो यस्यां तथा ॥ एतेन चिह्नदर्शनं नास्तीति सूचितं ॥ दुर्गागृहे देवालये भग्नपार्श्वे तिर्यक्पार्श्वे प्रकृतीः लोकान् ॥ ॥ ॥ इति त्रिलोकचंद्रात्मजरामकृष्णसूनुशिवरामकृते दशकुमारभूषणे अष्टम उच्छ्वासः ॥ ॥

---

**No. 61.** ग्रंथनाम, धनंजयविजयव्यायोगः. Name: Dhanaṁjayavijayavyâyoga.

पत्राणि १०, folios 10; पंक्तयः ९, lines 9; अक्षराणि ४८, letters 48.

ग्रंथसंख्या २७०.

कर्ता, कांचनोपाध्यायः. Author, Kâñchanopâdhyâya.

आरंभः। हरेर्लीलावराहस्य दंष्ट्रादंडः पुनातु नः ॥ हेमाद्रिः कलशो यत्र धात्री छत्रश्रियं दधौ ॥ १ ॥ अपि च ॥ तद्वः सारस्वतं चक्षुः समुन्मीलतु सर्वदा ॥ यत्र सिद्धांजनायंते गुरुपादाब्जरेणवः ॥ २ ॥ ३ ॥ नांद्यंते सूत्रधारः ॥

समाप्तिः। सारस्वतं स्फुरतु चेतसि सत्कवीनां चक्षुर्भवंतु कृतिनो गतमत्सराश्च ॥ भूपाश्च सेत कवितारसपानुरागाः संत्यज्य भंडजनता प्रणयानुरागं ॥ १० ॥ इति निष्क्रांताः सर्वे ॥ ॥ इत्येकांको धनंजयविजयो नाम व्यायोगः समाप्तः ॥ ॥

---

**No. 62.** ग्रंथनाम, धर्मविजयनाटकम्. Name: Dharmavijayanâṭaka.

पत्राणि ४१, folios 41; पंक्तयः १०, lines 10; अक्षराणि २६, letters 26.

ग्रंथसंख्या ६६६.

संवत् १८२७. Saṁvat 1827.

कर्ता, शुक्लभूदेवः. Author, Śuklabhûdeva.

आरंभः। प्रकटितनिजरूपः षोडशाराभिरामे त्रिभुरपि हृदयाब्जे दीपवद्दिव्य मूर्तिः॥ त्रिभुवनमिदमोतप्रोतमेवास्ति यस्मिन् स जयति जगदीशः शास्त्रसिद्धांतगम्यः॥ १॥

समाप्तिः। विष्णुर्व्यापकतां ददातु जगतामैश्वर्यमीशो गिरेस्तेजस्तीव्रकरस्तनोतु विपुलां शक्तिश्च शक्तिं परां॥ विघ्नं विघ्नहरो हरत्वविरतं रात्रीशखंडोल्लसद्भाले भक्तिरचंचलास्तु भवतो देवे च लक्ष्मीपतौ॥ १॥ राजा॥ पुनः काशीदर्शनकामुकोस्मि यदि भवेदभिमतं भगवतीनां॥ विद्या ०॥ तदेहि वत्स सहैव तावत्साधयाम इति नाट्येन निष्क्रांताः सर्वे॥ ॥ इति श्रीमच्छुक्लभूदेवविरचिते धर्मविजयनाम्नि नाटके नायकनंदनो नाम पंचमोंकः॥ ॥ समाप्तमिदं नाटकम्॥

---

**No. 63.** ग्रंथनाम, धूर्तसमागमप्रहसनम्. Name: Dhûrtasamâgamaprahasana.

पत्राणि ६, folios 6; पंक्तयः ११, lines 11; अक्षराणि ५८, letters 58.

ग्रंथसंख्या २४०.

शकः १७७८. Śaka 1778.

कर्ता, कविशेखराचार्यः. Author Kaviśekharâchârya.

आरंभः। हर्षादंभोजजन्मप्रभृतिदिविषदां संसदि प्रीतिमग्ना श्वश्र्वा मौलौ पुरारेर्दुहितृपरिणये साक्षतं चुंब्यमाने॥ तद्वक्त्रं मौलिवक्त्रे मिलितमिति भृशं वीक्ष्य चंद्रः सहासो दृष्ट्वा तद्वृत्तमाशुस्मितसुभगमुखः पातु वः पंचवक्त्रः॥ १॥

समाप्तिः। काले संततवर्षिणो जलमुचः सस्यैः समृद्धा धरा भूपाला निजधर्मपालनपरा विप्रास्त्रयीनिर्भराः॥ स्वादुक्षीरनतोधसः प्रतिदिनं गावो निरस्तापदः संतः शांतिपरा भवंतु कृतिनः सौजन्यभाजो जनाः॥ ४९॥ इति निष्क्रांताः सर्वे॥ द्वितीयः संधिः॥ २॥ ॥ इति धूर्तसमागमं नाम प्रहसनं समाप्तं॥

**No. 64.** ग्रंथनाम, **नागानन्दनाटकम्.** Name: **Nâgânandanâṭaka.**

पत्राणि २१, folios 21; पंक्तयः ११, lines 11; अक्षराणि ५६, letters 56.

ग्रंथसंख्या, ८०८.

कर्ता, **श्रीहर्षो राजा.** Author, S'rîharsha.

आरंभः। ध्यानव्याजमुपेत्य चिंतयसि कामुन्मील्य चक्षुः क्षणं पश्यानंगशरातुरं जनमिमं तत्रापि नो रक्षसि। मिथ्याकारुणिकोसि निर्घृणतरस्त्वत्तः कुतोन्यः पुमान् सेर्ष्यं मारवधूभिरित्यभिहितो बुद्धो जिनः पातु वः॥ १ ॥ आपि च॥ कामेनाकृष्य चापं हतपटुपटहावल्गुभिर्मारवीरैर्भ्रूभंगोत्क्षेपजृंभास्मितललितदृशा दिव्यनारीजनेन। सिद्धैः प्रव्होत्तमांगैः पुलकितवपुषा विस्मयाद्वासवेन ध्यायन् यो योगपीठादचलित इति वः पातु दृष्टो मुनींद्रः॥ २ ॥ नांद्यंते सूत्रधारः

समाप्तिः। वृष्टिं हृष्टशिखंडितांडवकृतो मुचंतु कालेंबुदाःकुर्वंतु प्रतिरूढसंतत[स] रित्स्तोमोत्तरीयां क्षितिं। चिन्वानाः सुकृतानि वीतविपदो निर्मत्सरैर्मानसैर्मोदंतां सततं च बांधवसुहृद्गोष्ठीप्रमोदाः प्रजाः॥ ३८ ॥ इति निष्क्रांताः सर्वे॥ पंचमोंकः॥

---

**No. 65.** ग्रंथनाम, **नाठवाटप्रहसनम्.** Name: Nâṭhavâṭaprahasana.

पत्राणि १०, folios 10; पंक्तयः ११, lines 11; अक्षराणि ४०, letters 40.

ग्रंथसंख्या २७५.

शकः १७७७. Śaka 1777.

कर्ता, **यदुनंदनः.** Author, Yadunandana.

आरंभः। गिरिपतितनयामुखाब्जपाने कृतमनसो गिरिशस्य वक्त्रराजी। अहमहमिकयावतंसिताहिप्रभुकृतफूत्कृतिभीषितावताद्वः॥ १ ॥ अपिच॥ जयति विधिकरोटीतालिकातोलवादी प्रमथगणपुरंध्रीगीतदत्तावधानः। मधुमदपरिघूर्णन्नेत्रभंग्याभिरामो भसितभरसितांगो भैरवो भूतनाथः॥ २ ॥ यत्र न नियतिर्न विधिर्न च सीमा नानुरोधोपि। प्रतिपदभोगावाप्तिर्जीयात्पंथाः कलेः कोपि॥ ३ ॥ नांद्यंते सूत्रधारः॥

समाप्तिः। उ०॥ देव माध्यान्हिककरणाय गच्छेति निष्क्रांताः सर्वे॥ ॥ जीयाज्जगतामीशो लोकेनेकोत्सवाः संतु। संतो वृद्धिमियंतां पिशुना अस्तं समायांतु॥ १५ ॥ ॥ इति द्वितीयः संधिः॥ ॥ इति वासुदेवचयनिसुतयदुनंदनविरचितं नाठवाटप्रहसन संपूर्णम्॥

---

**No. 66.** ग्रंथनाम, **नीतिशतकम्.** Name: NîtiŚataka.

पत्राणि **२२,** folios 22 ; पंक्तयः **८,** lines 8; अक्षराणि **१६,** letters 16.

**ग्रंथसंख्या १७६.**

**कर्ता, भर्तृहरिः.** Author, Bhartrihari.

आरंभः । यां चिंतयामि सततं मयि सा विरक्ता साप्यन्यमिच्छति जनं स. जनोन्यसक्तः । अस्मत्कृते च परितुष्याते काचिदन्या धिक् तां च तं च मदनं च इमां च मां च ॥ १ ॥

समाप्तिः । यदि नाम दैवगत्या जगदसरोजं कदाचिदपि जातम् । अवकरनिकरं विकिरति तत्कृत्वा चक्रवाक इव हंसः ॥ ३ ॥ ॥ इति नीतिशतकं समाप्तम् ॥

---

**No. 67.** ग्रंथनाम, **नृपोदंतः.** Name: Nripodanta.

पत्राणि १२, folios 12; **पंक्तयः ११,** lines 11; **अक्षराणि ३६,** letters 36.

**ग्रंथसंख्या २९७.**

**कर्ता, नारायणपंडितः** Author, Nârâyaṇapaṇḍita.

आरंभः । अनंताः संति संतोत्र तेषां कालः कथंचन ॥ न बोद्धुं शक्यते किंतु प्राधान्येन ब्रवीम्यतः ॥ १ ॥ नृपाणां समयं वच्मि तावत्तद्बोधसिद्धये । वैराग्यं बोधयेदेषां चारितं प्रायशः कलौ ॥ २ ॥ कलिद्वापरसंधौ हि जाताः कौरवपांडवाः ॥ ततः परीक्षिद्राजर्षिस्ततोभूज्जनमेजयः ॥ ३ ॥

समाप्तिः । सिंदियाख्येषु राणोजी माधवो दौलतो नृपः ॥ संतोमी वैष्णवा भूपा जयाजी स पिता तथा ॥ २ ॥ बाला भगवती पुण्या अहल्या हा(हो?)ळ्करेष्वपि तथान्ये धर्मसंयुक्ता भूता भाव्या भवंति च ॥६४॥ नैकेन भूः सह गता आचंद्रार्कं तु तद्यशः । स्थितमत्रैव संतस्ते कथामात्रावशेषिताः ॥ ६४ ॥ ॥ इति नृपोदंतः माषाशङ्कृतौ समाप्तः ॥ ॥

---

**No. 68.** ग्रंथनाम, **पंचायुधप्रपंचभाणः** Name: Pañchâyudha-prapañchabhâṇa.

पत्राणि ५७, folios 57; पंक्तयः १०, lines 10 ; **अक्षराणि ४४,** letters 44.

**ग्रंथसंख्या १९६७.**

**शकः १७७७.** Śaka 1777.

**कर्ता, त्रिविक्रमः.** Author, Trivikrama.

आरंभः । आताम्रे नयने स्फुरत्कुचभरः श्वासो न विश्राम्यति स्वेदांभःकणदंतुरं तव मुखं हेतुस्तु नो लक्ष्यते । धिक्को वेद मनःस्त्रिया इति मिष दृष्ट्वा प्रियां भीषयन् तस्यास्तत्क्षणकातरेक्षणपरिस्पृष्टो हरिः पातु नः ॥ १ ॥

समाप्तिः । स्मरकरतरवारिक्रूरधारानुकारी तरुणहरिणनेत्रालोचनानां विलासः ॥ कलयति हृदि येषामुच्चकैः स्वप्रभुत्वं प्रभवति भुवि तेषामेष हर्षाय भाणः ॥ ४८ ॥ त्रिविक्रमकृतामेतां शीतांशुसहजासखः । त्रिविक्रमः कार्तिं पायादपायादघसंभवात् ॥ ४९ ॥ इति निष्क्रांताः सर्वे ॥ ॥ इति श्रीपंचायुधप्रपंचो नाम भाणः संपूर्णः ॥ ॥ ऋषिनयनाचलशशिमित १७२७ शकवर्षे क्रोधनाभिधे शुक्रे । यातः सितद्वितीयासुरगुरुदिन एष पूर्णतां भाणः ॥ १ ॥

---

No. 69. ग्रंथनाम, **पार्वतीपरिणयनाटकम्.** Name: Pârvatîparinayanâṭaka.

**पत्राणि २८,** folios 28; **पंक्तयः ८,** lines 8; **अक्षराणि ३४,** letters 34.

**ग्रंथसंख्या ४७४.**

**कर्ता, बाणः** Author, Bâṇa.

आरंभः । आदौ प्रेमकषायिता हरमुखव्यापारलोला शनैर्व्रीडाभारविघूर्णिता मुकुलिता धूमोद्गमव्याजतः । पत्युः संमिलिता दृशा सरभसव्यावर्तनव्याकुला पार्वत्याः परिणीतिमंगलविधौ दृष्टिः शिवायास्तु वः ॥ १ ॥

समाप्तिः । तथापीदमस्तु भरतवाक्यम् ॥ — — — वृष्टिमिष्टां प्रदिशतु जगते भद्रसंपादयित्रीं शश्वत्सस्यैः प्ररूढैर्भवतु पुलकिता सर्वतो भूतधात्री । वर्द्धंतां वीत विघ्नाः स्फुरदुपकृतयः संपदः सज्जनानां नित्यानंदो महेशो निरतिशयसुखप्राप्तये कल्पतां वः ॥ ९ ॥ इति निष्क्रांताः सर्वे पंचमोंकः ॥ ॥ इति श्रीपार्वतीपरिणयं नाम नाटकं समाप्तम् ॥ ॥

---

No. 70. ग्रंथनाम, **प्रसन्नराघवनाटकम्.** Name: Prasannarâghavanâṭaka.

**पत्राणि ४१,** folios 41; **पंक्तयः १३,** lines 13; **अक्षराणि ५२,** letters 52.

**ग्रंथसंख्या १७३२.**

**शकः १७७८.** Saka 1778.

**कर्ता, श्रीजयदेवः.** Author, Śrîjayadeva.

आरंभः । चत्वारः प्रथयंतु विद्रुमलतारक्तांगुलिश्रेणयः श्रेयः शोणसरोनकोर-

---

कच्चस्ते शार्ङ्गिणः पाणयः॥ भालेष्वब्जभुवो लिखंति युगपद्वे पुण्यवर्णावलीः कस्तूरीमकरीः पयोधरयुगे गंडद्वये च श्रियः ॥ १ ॥

॥ वाग्देव्या सह मुक्तवैशसरसा देवी च दीव्या दियं शेषस्येव फणांचले वसुमती लक्ष्मीः सतां सद्मसु॥ ॥ रामः ॥ तदागच्छत पुष्पकाद- [वती] र्य गुरुबंधुजनं पौरांश्च नंदयाम इति पुष्पकादवतरणं संवृत्तम्॥ इति निष्क्रांताः॥ ॥ सप्तमोंकः ॥ ॥

---

**No. 71.** ग्रंथनाम, **बालभागवतचंपूः.** Name: **Bâlabhâgavata champû.**

पत्राणि ३०, folios 30; पंक्तयः ११, lines 11; अक्षराणि ५२, letters 52, ग्रंथसंख्या १०७२.

शकः १७९.

**कर्ता, पद्मराजः.** Author, Padmarâja.

आरंभः। श्रियः कटाक्षः स तनोतु नः शिवं बिधित्सुना यत्सदृशं नवोत्पलम् यतवसेस्मिन्विधिना दिवानिशं निमीलनोन्मीलनसंततोद्यमः ॥ १ ॥ २ ॥ ॥ ३ ॥ ५ ॥ अस्ति श्रिया स्वस्तुलनां दधाना जनौघपूर्णा मथुराभिधाना अरातिसेनोग्रवनीदवानां पुरी प्रसिद्धा भुवि यादवानाम् ॥ ॥

समाप्तिः। चिरमधिगतामृद्धिं लुंपन् पलाशततेर्भृशं सपदि रचयन्नामोदां मनश्चरयम् ॥ प्रसवमहितां लक्ष्मीं चैत्रो लतास्विव तास्वलं युवतिषु हरिस्तन्वन्प्रीत्या शशास जगाच्चिरम्॥ ॥ महत्यमुष्मिन् सरसीव पद्मराजद्विजेंद्रेरचितसूक्तिहृद्ये काव्ये नवे भागवतेऽयंग्रः सर्गस्तरगस्तबकोपमेयात् ॥ ९ ॥ ॥ इति पद्मराजरचितो बालभागवतचंपूकाव्ये पंचमः सर्गः ॥ ५ ॥

---

**No. 72.** ग्रंथनाम, **बालरामायणं नाम महानाटकम्.** Name: Bâlarâmâyaṇa.

पत्राणि ९७, folios 97; पंक्तयः १५, lines 15; अक्षराणि ३, letters 3.

**ग्रंथसंख्या ३२७३.**

शकः १७४.

**कर्ता, राजशेखरः.** Author, **Râjaśekhara.**

आरंभः। प्रसत्तेर्यः पात्रं तिलकयति यं सूक्तिरचना य आद्यः स्वादूनां श्रुतिचुलककेलेन मधुना ॥ यदात्मानो विद्याः परिण [म] ति यश्चार्थवपुषा स गुंफो वाणीनां कविवृषनिषेव्यो विजयते ॥ १ ॥ नांद्यंते सूत्रधारः।

समाप्तिः। रामः ॥ अतः परमपि प्रियमस्ति॥ स्वर्णं चाजगवं नचापि कुपितो भर्गः सुरग्रामणीः सेतुश्च प्रथितः प्रसन्नमधुरो दृष्टश्च वारां निधिः॥ पौलस्त्यश्च हतः स्थितश्च भगवान् प्रीतः श्रुतीनां कविः प्राप्तं यानमिदं च याचितवते दत्तं कुबेराय च ॥१०५॥तथापीदमस्तु भरतवाक्यम् ॥ सम्यक् संसारविद्याविशदमुपनिषद्भूतमर्थाद्भुतानां ग्रथ्नंतु ग्रंथिबंधं वचनमनुपतत्सूक्तिमुक्ताः सुयुक्ताः ॥ संतः संतर्पितांतःकरणमनुगुणं ब्रह्मणः काव्यमूर्तेस्तत्त्वं शाब्दिकैश्च प्रथममपिशुनितं भावयंतोर्चयंतु। ॥ १०६ ॥ इति निष्क्रांताः सर्वे ॥ ॥ राघवानंदो नाम दशमोंकः ॥ ॥ ॥ समाप्तमिदं राजशेखरविरचितं बालरामायणं नाम महानाटकम् ॥

---

**No. 73.** ग्रंथनाम, **भक्तिरसायनम्.** Name: Bhakti-rasâyana.

पत्राणि २३६, folios 236; पंक्तयः ११, lines 11; अक्षराणि ५२, letters 52.

ग्रंथसंख्या, ८४३७.

शकः, १७९५ माघशुद्ध ८. Ṣaka 1795.

कर्ता, **हरिः,** हरिबाबा इति प्रसिद्धः. Author, Haribâbâ.

आरंभः। श्रीशं वंदे भक्तकल्याणदीक्षं लक्ष्यं वेदैर्दक्षमात्मीयकृत्ये॥ वक्षःपद्मं साक्षकं दुष्टजाते मोक्षस्थानं रक्षकं स्वांघ्रिभाजाम्॥१॥अग्रे गुरुवंदनांतानि मंगलपद्यानि २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ श्रीमद्भागवतप्रधानदशमस्कंधस्थित॥नि क्रमात्प्रत्यध्यायनिरूपितेशचरितान्यादाय सारांशतः॥श्रीगोविंदकृपासुधारतलसत्स्वादं सदानंदकृत्कुर्मो भक्तिरसायनं निखिलहृद्रोगापनोदे क्षमम्॥ ११ ॥

समाप्तिः। गोदावरीपरिसरोल्लसिताभिरामे श्रीनाशिके निवसता हरिणा बुधेन॥ भीमोद्भवेन शिवरामतनूद्भवेन गोविंदार्चितनकृतैष कृतः प्रबंधः ७७ ॥ ७८ श्रीशाकल्पतरुक्रीडाफलभक्तिरसायने॥ मुदे भवतु साधूनामध्यायार्थनिरूपणम् ॥७

॥ इतिश्रीमन्नाशिकनिवासिकविवरहरिसूरिविरचिते श्रीमद्भागवतदशमपूर्वार्धोक्तिश्रीकृष्णचरित्रबीजविवरणे भक्तिरसायने एकोनपंचाशत्तमोध्यायः ॥ ॥ अयं प्रबंध एकोनषष्ट्यधिकसप्तदश १७५९ परिमिते शालिवाहनशके निर्मितः॥

---

**No. 74.** ग्रंथनाम, **भागवतचंपूः**. Name: Bhâgavata-Champû.

पत्राणि ८३, folios 83; पंक्तयः ८, lines 8; अक्षराणि ४६, letters 46.

ग्रंथसंख्या, १९०९.

कर्ता, **अभिनवकालिदासः**. Author, Abhinava-kâlidâsa.

आरंभः। कल्याणं नः प्रभूतं कलयतु ललिताकापशैलेशबालालीलाजालानुकूला शिशिरकरकलाभानुमालाजटाला॥ एषा शेषाहिभूषा परिकलितसुधापूरधारानुकारा भद्रा मुद्रा विनिद्रा पुरहरणविधौ कापि कारुण्यपूर्णा ॥१॥२ ॥३॥ अभिनवपदपूर्वः कालिदासः प्रगल्भस्त्रिनयनदयितायाः प्रेमडिंभस्तृतीयः ॥ विरचयति तयैव प्रेरितः प्रेमपूर्वं हरिगुणपरिणद्धश्चारुचंपूप्रबंधम् ॥ ४ ॥

---

**No. 75.** ग्रंथनाम, **भावविलासः**. Name: Bhâva-vilâsa.

पत्राणि १३, folios 13; पंक्तयः १०, lines 10; अक्षराणि ३८, letters 38.

ग्रंथसंख्या २९२.

कर्ता, **रुद्रकविः**. Author, Rudrakavi.

आरंभः। यः फल्गूकृतफाल्गुनो रणभुवि प्रौढप्रतापानलज्वालाभिः प्रतिपक्षपक्षविपिनश्रेणीर्ददाह क्षणात् ॥ योभूद्भूसुरभूरुहात्र भगवद्दासो निवासः श्रियां तस्मादाविरभूत्प्रभूतमहिमा श्रीमान्नृसिंहो नृपः ॥ १ ॥ २ ॥ ३ ॥ श्रीमान् श्रीमानसिंहक्षितिपतिजलधेरुद्गतो भावसिंहः पूर्णः पीयुषभानुर्वितरणकिरणध्वस्तदैन्यांधकारः ॥ स्फारस्फारास्तकषाराचलसुरतटिनीहंसतारानुकाराः कीर्तिज्योत्स्नाः पिबंति प्रतिदिशमनिशं यस्य विद्वच्चकोराः ॥ ४ ॥ अग्रे एतद्वर्णनश्लोकाः ॥ १६ ॥ काव्यालापकलाकलापकलनावैदग्ध्यदीक्षागुरोर्भूमीकल्पतरोरशेषजनतासंगीतकीर्तेरिह ॥ यस्याज्ञामधिगत्य यः कविकुलानंदाय संपादितः संदर्भस्तममत्सराः कृतधियः कुर्वंतु कर्णातिथिम् ॥ ॥ ॥ १७ ॥

समाप्तिः। अन्यापदेशविनिवेशविदग्धबुद्धिश्रीभावसिंहनरसिंहनियोगयोगात्। संपादितो विविधभावविकासभाजां प्रीत्यै भृशं भवतु भावविलास एष : ॥३४॥ सद्गुणानां समुद्रेण रुद्रेण ग्रथिता गुणैः ॥ कंठस्था कंठमालेयं केषां न कुरुते श्रियम् ॥ ३५ ॥ विद्यानिवासपुत्रस्य न्यायवाचस्पतेरियं ॥ काव्यालापविदग्धानां मोदं निर्मातु निर्मितिः ॥ ३६ ॥ ॥ इति रुद्रविरचितं भावविलासशतकं संपूर्णम् ॥ ॥

---

**No. 76.** ग्रंथनाम, **भैष्मीपरिणयचंपूः** Name : Bhaishmî-pariṇaya-champû.

पत्राणि १२, folios 12 ; पंक्तयः १०, lines 10 ; अक्षराणि ६२, letters 62.

शकः संवत् १७८३.

कर्ता, **रत्नखेटदीक्षितः.** Author, Ratnakheṭa-dîkshita.

आरंभः । यस्योपवीतगुण एव फणावृतैकवक्षोरुहः कुचपटीयति वामभोगे ॥ तस्मै ममास्तु तमसामवसानसीम्ने चंद्रार्धमौलिशिरसे महसे नमस्या ॥ १ ॥ २ ॥ भ्रमरहिता सा कचवत्कुचवत्स्त्रीणां तु सरसहितशोभा॥लसदक्षरपीयूषाधरवत्कविता महात्मनां जीयात् ॥ ३ ॥ ४ ॥५ ॥ अस्ति खलु प्रशस्तशोभानंदितजननयनतारका द्वारका नाम पुरी ॥

समाप्तिः । ततश्च बलभद्रेण मोचितो रुक्मी लज्जया सह भोजकटकं कृष्णोपि भैष्म्या सह द्वारकां कविरयं रत्नखेटोपि कीर्त्या तच्चरणरतिं प्रविश्य कृतार्थतामगात् ॥ तावुभौ श्लाघ्यसुरतौ श्यामौ सप्रमदोज्वलौ ॥ श्रीरुक्मिणीवासुदेवौ रेजतुर्द्वारकापुरे ॥ ॥ २६ ॥ ॥ इतिश्रीमद्विश्वामित्रकुलजलधिकौस्तुभस्य सर्वतंत्रस्वतंत्रस्याद्वैतविद्याचार्यस्य दंतिद्योतिदिवाप्रदीपबिरुदांकितस्य साग्निचिद्विश्वचिद्याजिनः श्लेषयमकचक्रवर्तिनो लक्ष्मीधरसूनोश्चतुरधिकशतप्रबंधानिर्मितप्रथितपांडित्यस्य सत्यमंगलमहाग्रामवास्तव्यस्य रत्नखेटदीक्षितस्य कृतिषु भैष्मीपरिणयचंपूरियं संपूर्णा ॥

विपश्चितामपश्चिमे विवादकेलिनिश्चिते सपत्नजित्ययत्नमेव रत्नखेटदीक्षिते ॥ बृहस्पतिः क जल्पति प्रसर्पति क सर्पराडसंमुखश्च षण्मुखश्चतुर्मुखोपि दुर्मुखः ॥१॥

---

**No. 77.** ग्रंथनाम, **मन्मथोन्मथनडिमः.** Name: Manmathonmathana-Dima.

पत्राणि २५, folios 25 ; पंक्तयः १३, lines 13 ; अक्षराणि २५, letters 25.

ग्रंथसंख्या ४७.

शकः १७४२, Śaka 1742.

कर्ता, **रामकविः.** author, Râmakavi.

आरंभः । त्र्यक्षमक्षि कंदर्पदर्पत्द्दुः करोतु शं ॥ यत्समीपेस्ति भीत्येव स्मरमित्रं शशी कृशः ॥१॥ नांद्यंते सूत्रधारः ॥ समंतादवलोक्य ॥अये इयमौषसी सुषमासुखयतितराम् ।

समाप्तिः । श्लोकाः संतु निरामया नृपतयः पांतु प्रजा वाडवा वर्तंतां श्रुतिवर्त्मसु प्रभवताद्राजन्यजातं क्षितौ ॥ वाणिज्यात्पणयो भवंतु सुखिनः शुश्रूषया पादजा धर्मे धीर्भवताज्जनस्य सुघनां वृष्टिं घनाः कुर्वताम् ॥ १२४ ॥ ॥ चतुर्थोंकः समाप्तः ॥ ॥

सतोर्हथ मम क्षंतुं मंतुमेतं गिरा कृतम्॥मनोविनोदनायैतदात्मनो रचितं मया॥१२९॥
॥ इति रामनामकविकृतौ मन्मथोन्मथनो नाम डिमः समाप्तः ॥ ॥

---

**No. 78.** ग्रंथनाम, **महावीरचरितं नाटकम्.** Name, Mahâvîra-charita.

पत्राणि ५०, folios 50; पंक्तयः ११, lines 11; अक्षराणि ४०, letters 40.

ग्रंथसंख्या १९००.

कर्ता, **भवभूतिः.** Author, Bhavabhûti.

आरंभः । अथ स्वच्छाय देवाय नित्याय हतपाप्मने ॥ त्यक्तक्रमविभागाय चैतन्यज्योतिषे नमः ॥१॥ नांद्यंते सूत्रधारः ॥ अये खलु भगवतः कालप्रियनाथस्य यात्रायामार्यमिश्राः समादिशंति ॥ महापुरुषसंरंभो यत्र गंभीरभीषणः प्रसन्नककेशा यत्र विपुलार्था च भारती ॥२॥ अप्राकृतेषु पात्रेषु यत्र वीरः स्थितो रसः॥ भेदैः सुक्ष्मैरभिव्यक्तैः प्रत्याधारं विभज्यते ॥ ३ ॥ स संदर्भोभिनेतव्यः ॥

समाप्तिः । रामः ॥ इतोधिकमपि श्रेयोस्ति तथापीदमस्तु भगवत्प्रसादात् ॥ भरतवाक्यम् ॥ क्ष्मापालाः क्षीणतंद्राः क्षितिवलयमिदं पांतु ते कामवर्षा वार्वाहाः संतु राष्ट्रं पुनरखिलमपास्तेति संपन्नसस्यम् ॥ लोको नित्यं प्रमोदं विदधतु कवयः श्लोकमाप्तप्रसादं संख्यावंतोपि भूम्ना परकृतिषु मुदं संप्रधार्य प्रयांतु ॥४३॥ वि० एवमस्तु ॥ इति निष्क्रांताः सर्वे ॥ सप्तमोंकः ॥
॥ ॥ समाप्तमिदं महावीरचरितं नाम नाटकम् ॥ ॥

---

**No. 79.** ग्रंथनाम, **मालविकाग्निमित्रनाटकम्.** Name: Mâlavikâ-gnimitra.

पत्राणि ३०, folios 30; पंक्तयः ११, lines 11; अक्षराणि ४०, letters 40.

ग्रंथसंख्या ८२९.

शाकः १७७७, Śaka 1777.

कर्ता, **कालिदासः.** Author, Kâlidâsa.

आरंभः । एकैश्वर्यस्थितोपि प्रणतबहुफलो यः स्वयं कृत्तिवासाः कांतासंमिश्रदेहोप्यविषयमनसां यः पुरस्ताद्यतीनाम्॥ अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः सन्मार्गालोकनाय व्यपनयतु सनस्तामसीं वृत्तिमीशः ॥१॥ नांद्यंते सूत्रधारः ॥ ॥

समाप्तिः । राजा ॥ किमतःपरं तथापि भवत्वेवं तावत् ॥ त्वं मे प्रसादसुमुखी भव चंडि नित्यमेतावदेव मृगये प्रतिपक्षहेतोः ॥ आशास्यमित्यधिगनप्रभृति प्रजानां संपत्स्यते न खलु गोप्तरि नाभिमित्रे ॥२१॥ इति निष्क्रांताःसर्वे ॥ ॥ ॥ पंचमोंकः ॥ ॥

---

**No. 80.** ग्रंथनाम, **माहिषशतकम्.** Name: Mâhisha-Śataka.

पत्राणि १०, folios 10; पंक्तयः १०, lines 10; अक्षराणि ५२, letters 52.

ग्रंथसंख्या ३२५.

शकः १७८३, Śaka 1783.

कर्ता, **बालकविः.** Author, Bâlakavi.

आरंभः । स्वस्त्यस्तु प्रथमं समस्तजगते त्रस्ता मनस्तापतः संतो ये निवसंति संतु सुखिनस्तेमी शिवानुग्रहात् ॥ धर्मिष्ठे पथि संचरंत्ववनिपा धर्मोपदेशादृतास्तेषां ये भुवि मंत्रिणः सुमनसस्ते संतु दीर्घायुषः ॥१ ॥ अग्रे कतिपये भोसलवंशवर्णनश्लोकाः कतिपये च दुष्टराजतदधिकारिश्लोकाश्च ॥ १० ॥ यं यो रक्षति तस्य स प्रभुरिति स्पष्टं हि मद्राक्षिणो राजश्रीमहिषान्विनुत्य सफलं कुर्वेद्य वाग्वैभवम् ॥ मत्पीडानिरतान्मदीयमहिमाभिज्ञानशून्यान्प्रभून् यन्निंदामि निशम्य तद्गुणविदस्तुष्यंतु संतो नृपाः ॥ ११ ॥

समाप्तिः । राजा धर्मपरः परस्परधृतस्नेहाश्च तन्मंत्रिणो राजन्वत्यवनीवनीपकजनप्रौढ्या भवंतु क्षितौ ॥ पुष्टांगाः पशवश्चरंतु भजतां दुर्भिक्षवार्ता लयं श्रीमद्बालकवेः कृतिश्च कुरुतां निर्मत्सराणां मुदम् ॥ ७ ॥ ॥ इति श्रीबालकविविरचितं माहिषशतकं संपूर्णम् ॥

---

**No. 81.** ग्रंथनाम, **मुकुंदानंदभाणः.** Name, Mukundânanda-Bhâṇa.

पत्राणि ९१, folios 91; पंक्तयः ५, lines 5; अक्षराणि ३६, letters 36.

ग्रंथसंख्या १०२३.

शकः १७९१, Saka 1791.

कर्ता, काशीपतिः Author, Kâśipati.

आरंभः । वंदे वंदारुमंदारमिंदुभूषणनंदनं ॥ अमंदानंदसंदोहबंधुरं सिंधुराननम् । १ ॥ कंठालिंगनमंगलं घनकुचाभोगोपभोगोत्सवं श्रोणीसंगमसौभगं च सततं मत्प्रेयसीनां पुरः ॥ प्राप्तुं कोयमितीर्ष्ययेव यमुनाकूले बलाद्यः स्वयं गोपीनामहरद्दुकूलनिचयं कृष्णः स पुष्णातु नः ॥ २ ॥

समाप्तिः । वर्षंतु कामं भुवि वारिवाहा गोब्राह्मणेभ्यः कुशलानि सन्तु ॥ तुष्यन्तु सन्तः सुकविप्रबन्धैस्तेषां च शाम्यंतु खलोपसर्गाः ॥ ५९ ॥ मुकुन्दानन्दनाम्ना मे भाणेनानेन तोषितः ॥ कमलाकमनः कामं कल्लोलयतु मंगलम् ॥६०॥ कृतिं लसदलंकृतिं रसविदो बुधा ये मम प्रसन्नहृदया दयाजलधयो बहूकुर्वते ॥ तदीयपदपद्मयोरयमयं प्रणामांजलिः सरोजमुकुलाकृतिः शिरसि संततं न्यस्यते ॥ ६१ ॥ ॥ इति श्रीकाशीपतिकविराड्विरचितो मुकुन्दानन्दनामा मिश्रभाणः पूर्णः ॥

---

**No. 82.** ग्रंथनाम, **मुदितराघवनाटकम्.** Name: Mudita-Râghava.

पत्राणि ५५, folios 55; पंक्तयः ९, lines 9; अक्षराणि ४०, letters 40.

ग्रंथसंख्या १२३७.

कर्ता, बालकृष्णः Author, Bâlakṛishṇa.

आरंभः । अर्द्धं दिव्यांगरागं मरकतकमयैर्भूषणैर्भूष्यमाणं दिव्यं वासो वसानं कचनिकरपतत्कल्पशाखिप्रसूनम् ॥ अन्यद्भस्मांगरागं भुजगनरशिरोबालतारेशभूषं जूटभ्रश्यद्द्युसिंधुवृषदवतुतमां नो वपुः शूलपाणेः ॥ १ ॥ किंच ॥ भोगींद्रं गुणयन् सुमेरुमचलं कोदंडयन् बाणयन् बाणारिं भयनिर्भिताः स्वकचगास्तिस्रः पुरो लक्षयन् ॥ प्रत्नागा हययन् द्विजेष्वचरमं पद्मोद्भवं सूतयन् क्षोणींस्यंदनयन् विभुर्विजयते विश्वावने दीक्षितः ॥ २ ॥

समाप्तिः । काले वर्षन्तु तोयं जलधरततयः पार्थिवा नीतिशौंडा गोपायंत्वब्धिकांचीं बहुतरगुणकाः संतु वाचः कवीनाम् ॥ जीवाः शान्तोपसर्गाः सकलजनिमतामीप्सितत्यागशौंडः श्रीमान् शीतांशुमौलिः सुरगणनुतये सन्तु विप्राः समोदाः ॥ १ ॥ इति निष्क्रांताः सर्वे ॥ ॥ दशमोंकः ॥

**No. 83.** ग्रंथनाम, **मुद्राराक्षसनाटकम्.** Name: Mudrâ-Râkshasa.

पत्राणि ३८, folios 38; पंक्तयः १२, lines 12; अक्षराणि ४८, letters 48.

ग्रंथसंख्या १३६८.

कर्ता, विशाखदत्तः. Author, Viśâkhadatta.

आरंभः। धन्या केयं स्थिता ते शिरसि शशिकला किं नु नामैतदस्या नामैवास्यास्तदेतत्परिचितमपि ते विस्मृतं कस्य हेतोः॥ नारीं पृच्छामि नेंदुं कथयतु विजया न प्रमाणं यदींदुर्देव्या निन्होतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः॥ १॥

समाप्तिः। वाराहीमात्मयोनेस्तनुमवनविधावास्थितस्यानुरूपां यस्य प्राग् दंतकोटिं प्रलयपरिगताशिश्रिये भूतधात्री॥ म्लेच्छैरुद्वेज्यमाना भुजयुगमधुना संश्रिता राजमूर्तेः स श्रीमद्वंधुभृत्यश्चिरमवतु महीं पार्थिवश्चंद्रगुप्तः॥२०॥ इति निष्क्रांताः सर्वे॥ सप्तमोंकः॥ ॥

---

No. 84. ग्रंथनाम, मुद्राराक्षसनाटकटीका. Name: A commentary on the Mudrâ-Râkshasa.

पत्राणि ३५, folios 35; पंक्तयः १५, lines 15; अक्षराणि ५०, letters 50.

ग्रंथसंख्या १६४०.

शकः १७८५, Śaka 1785.

कर्ता, ढुंढिराजयज्वा. Author, Ḍhunḍhi-râja yajva.

सिंदूरारुणगंडमंडलमदामोदभ्रमद्भृंगिकाझंकारेण कलेन कर्णमुरजध्वानेन मंत्रेण च॥ तत्तौर्यत्रिकरीतिमेति शिरसः शश्वन्मदांदोलनं यस्य श्रीगणनायकः स दिशतु श्रेयांसि भूयांसि वः॥ १॥ श्रीमद्विशाखदत्तीये मुद्राराक्षसनाटके॥ कथोपोद्घातमाचक्षे संविधानावबुद्धये॥ १॥ उपोद्घातश्लोका एकषष्टिः ६१॥ अथेदं नाटकं सांगं लक्षणपुरःसरं व्याख्यायते॥ अत्र श्रीमान् विशाखदत्तनाममहाकविः प्रारीप्सितस्य नाटकस्य निर्विघ्नपरिसमाप्तिप्रचयसिद्ध्यर्थम्॥

समाप्तिः। पार्थिवचंद्रगुप्तरूपः स श्रीमानादिविष्णुः महीमवतु रक्षत्वित्यर्थः॥ अत्र विष्णोश्चंद्रगुप्तस्य चाभेदकथनादनुभयाभेदरूपकम्॥ १९॥ ॥ इति श्रीमुद्राराक्षसनाटकव्याख्याने श्रीत्र्यंबकप्रभुवर्याश्रितेन ढुंढिराजव्यासयज्वना विरचिते सप्तमोंकः॥ ७॥ संपूर्णेयं टीका॥ ॥ श्रीमद्विशाखकविवर्यकृतिर्मयैषा श्रीत्र्यंबकानुमतितो विदिता यथावत्॥ श्रीस्वामिशैलवसतिर्भगवान् विशाखो देवोऽनया मुदमुपैतु सनत्कुमारः॥ १॥

**No. 85.** ग्रंथनाम, **मूकपंचशत्यामार्याशतकम्.**

Name, Âryâśataka, a portion of the Mûka pañcha-śatî.

पत्राणि ७, folios 7; पंक्तयः १०, lines 10; अक्षराणि ३४, letters 34.

कर्ता मूकः Author, Mûka.

आरंभः । कारणपरचिद्रूपा कांचीपुरसीम्नि कामपीठगता ॥ काचन विहराति करुणा काश्मीरस्तबककोमलांगलता ॥ १ ॥ कंचन कांचीनिलयं करधृतकोदंडबाणसृणिपाशं ॥ कठिनस्तनभरनम्रं कैवल्यानंदकंदमवलंबे ॥ २ ॥

समाप्तिः । अंतरपि बहिरपि त्वं जंतुततेरंतकांतकदहं ते ॥ चिंतितसंतानवतां संततमपि संतनोषि महिमानम् ॥९८॥ जय जय जगदंब शिवे जय जय कामाक्षि जय जयाद्रिसुते ॥ जय जय महेशदयिते जय जय चिद्गगनकौमुदीधारे ॥९९॥

॥ इति मूककविसार्वभौमकृतौ कामाक्ष्या आर्याशतकम् ॥ ॥

---

**No. 86.** ग्रंथनाम, **मूकपंचशत्यां कटाक्षशतकम्.**

Name, Kaṭâksha-śataka, a portion of the Mûka pañcha-śatî.

पत्राणि ८, folios 8; पंक्तयः ११, lines 11; अक्षराणि ३६, letters 36.

ग्रंथसंख्या १९८.

शकः १७८४. Śaka 1784.

कर्ता मूकः Author, Mûka.

आरंभः। मोहांधकारनिवहं विनिहंतुमीडे मूकात्मनामपि महाकवितावदान्यान्॥ श्रीकांचिदेशशिशिरीकृतजागरूकानेकाम्रनाथतरुणीकरुणावलोकान् ॥ १ ॥

समाप्तिः । अत्यंतशीतलमनर्गलकर्मपाककाकोलहारि सुलभं सुमनोभिरेतत् ॥ पीयूषमेव तव वीक्षणमंब किंतु कामाक्षि नीलमिदमित्ययमेव भेदः ॥ १०० ॥ इति श्रीमूककविसार्वभौमकृतौ कामाक्ष्याः कटाक्षशतकं संपूर्णम् ॥ ॥

---

**No. 87.** ग्रंथनाम, **मूकपंचशत्यां पादारविंदशतकम्.** Name, Pâdâravinda-śataka, a portion of the Mûka pañcha-śatî.

पत्राणि ७, folios 7; पंक्तयः १४, lines 14; अक्षराणि ४४, letters 44

ग्रंथसंख्या २६८.

शकः १७८४. Śaka 1784.

कर्ता मूकः Author, Mûka.

आरंभः। महिम्नः पंथानं मदनपरिपंथिप्रणयिनि प्रभुर्निर्णेतुं ते भवति यतमानोपि कतमः ॥ तथापि कांचीविहररसिके कोपि मनसो विपाकस्त्वत्पादस्तुतिविधिषु जल्पाकयति माम् ॥ १ ॥ गलग्राही पौरंदरपुरवनीपल्लवरुचां धृतप्राथमानामरुण-महसामादिमगुरुः ॥ समिंधे बंधूकस्तबकसहयुध्वा दिशि दिशि प्रसर्पन् कामा-क्ष्याश्चरणकिरणानामरुणिमा ॥ २ ॥

समाप्तिः। इदं यः कामाक्ष्याश्चरणनलिनस्तोत्रशतकं जपेन्नित्यं भक्त्या निखि-लजगदाह्लादजनकम् ॥ स विश्वेषां वंद्यः सकलकविलोकैकतिलकश्चिरं भुक्त्वा भोगान् परिणमति चिद्रूपकलया ॥ ९९ ॥ ॥ इति श्रीमूकपंचशत्यां श्रीका-माक्ष्याः पादारविंदशतकं संपूर्णम् ॥ ॥

---

**No 88.** ग्रंथनाम, **मूकपंचशत्यां मंदस्मितशतकम्.** Name, **Manda-smita-śataka,** a portion of the Mûka pañcha-śatî.

पत्राणि ७, folios 7; पंक्तयः १२, lines 12; अक्षराणि ४०, letters 40.

ग्रंथसंख्या २१०.

संवत् १९१९. Saṁvat 1919.

कर्ता, मूकः Author, Mûka.

आरंभः। बध्नीमो वयमंजलिं प्रतिदिनं बंधच्छिदे देहिनां कंदर्पागमतंत्रमूलगुरवे कल्याणकेलीभुवे ॥ कामाक्ष्या घनसारपुंजरजसे कामद्रुहश्चक्षुषां मंदारस्तबकप्रभा-मदजुषे मंदस्मितज्योतिषे ॥ १ ॥

समाप्तिः। क्रीडालोलकृपासरोरुहमुखीसौधांगणेभ्यः कविश्रेणीवाक्परिपाटिका-मृतझरीसूतीगृहेभ्यः शिवे ॥ निर्वाणांकुरसार्वभौमपदवीसिंहासनेभ्यस्तव श्रीका-माक्षि मनोज्ञमंदहसितज्योतिष्कणेभ्यो नमः १०० ॥ इति श्रीमूककविसार्वभौमकृतौ श्रीकामाक्ष्या मंदस्मितशतकं पूर्णम् ॥ ॥

---

**No. 89.** ग्रंथनाम, **मूकपंचशत्यां स्तुतिशतकम्.** Name, Stuti-śataka, a portion of the Mûka pañcha-śatî.

पत्राणि ७, folios 7; पंक्तयः १५, lines 15; अक्षराणि ३६, letters 36.

कर्ता, मूकः Author, Mûka.

आरंभः। पांडित्यं परमेश्वरि स्तुतिविधौ नैवाश्रयंते गिरां वैरिंचान्यपि गुंफनानि विगलद्गर्वाणि शर्वाणि ते ॥ स्तोतुं त्वां परिफुल्लनीलनलिनश्यामाक्षि कामाक्षि मां वाचालीकुरुते तथापि नितरां त्वत्पादसेवादरः ॥ १ ॥

समाप्तिः। तमोविपिनधाविनं सततमेव कांचीपुरे विहाररसिका परा परमसंविदुर्वी-रुहम् ॥ कटाक्षनिगडैर्दृढं हृदयदुष्टदंतावलं चिरं नयतु मामकं त्रिपुरवैरिसीमंतिनी ॥ १०० ॥ ॥ इति श्रीकविसार्वभौममूककविविरचितायां मूकपंचशत्यां कामाक्षीदेव्याः स्तुतिशतकं संपूर्णम् ॥ ॥

---

**No. 90.** ग्रंथनाम, **मृच्छकटिकप्रकरणविवृतिः**. Name, Mrichchhakatika prakarana vivriti.

पत्राणि ५५, folios 55; पंक्तयः ८, lines 8; अक्षराणि ३४, letters 34.

ग्रंथसंख्या ९३५.

**कर्ता, पृथ्वीधरः** Author, Prithvîdhara.

आरंभः । मृच्छकटिकप्रकरणे यद्दुर्बोधं पदं किंचित् ॥ विवृतिस्तस्य स्वाधिया क्रियते सद्भिर्विलोकनीयैषा ॥ १ ॥ प्रकरणम् चेदम् ॥ तथा च तल्लक्षणम् ॥ यत्र कविरात्मबुद्ध्या वस्तुशरीरं च नायकं चैव ॥ विरचयति समुत्पाद्य तज्ज्ञेयं प्रकरणं नाम ॥

समाप्तिः । अहमेवेति ॥ पर्यवस्थापनमाचार इति कृत्वा स्वयमेव क्षमोहामिति भावः ॥ दिउणतले द्विगुणतरः ॥ अचलं पृथ्वी ॥ ॥ मृच्छकटिकविवृतिरियं गणपतिचित्तांतपर्यंता ॥ पृथ्वीधरकृतिरुपनयतु संतोषं कृतिसमुद्रे ॥ १ ॥ इति श्रीरामदेवकारिता मृच्छकटीवृत्तिः ॥ ॥

---

**No. 91.** ग्रंथनाम, **रतिमुकुलः**. Name, Ratimukula.

पत्राणि ६, folios 6; पंक्तयः ९, lines 9; अक्षराणि ४२, letters 46.

ग्रंथसंख्या १४१.

**कर्ता, अच्युतः** Author, Achyuta.

आरंभः। स्फुरणेनेष्टवियोगं कथयिष्यतइति भियापसव्याक्ष्ये ॥ यत्के याभ्यां स्पंदनं तावाद्यौ दंपती नुमोऽभिन्नौ ॥ १ ॥ भोभोः प्रेयस्तावकमास्य प्रतिबिंबमेव किमयं मे ॥ सुधियोप्यहो कपोलो भवति रसात्मा श्रुतेः संगात् ॥ २ ॥

समाप्तिः अणुमात्रभेदसत्वे वियोगभयतः सदैव संमिलतोः ॥ पात्वनुरागपरांचोरानंदश्चाभिनवयुवयोः ॥ १०१ ॥ ॥ इत्यच्युतरचिताद्वैतमंजर्यां रतिमुकुलः संपूर्णः ॥

---

No. 92. ग्रंथनाम, रतिनीतिमुकुलः. Name, Ratinītimukula.

पत्राणि ७, folios 7; पंक्तयः ७, lines 7; अक्षराणि ४६, letters 46.

ग्रंथसंख्या १४१०.

कर्ता, अच्युतः Author, Achyuta.

आरंभः । भव्या निजैकसेव्या ददती चातुर्यतश्चतुर्वर्गम् ॥ त्रस्मिन्नेव रतिमती सतीव मतिरेव जयति नीतिरपि ॥ १ ॥ मलिना अपि संयमनात्कुटिला अपि सुमनसां समागमतः ॥ बाला अपि मुक्तानामनुषंगान्निर्जरेज्यतां यांति ॥ २ ॥

समाप्तिः । याभिः सह सुविलासादैहिकपारत्रिकोपि पुरुषार्थः ॥ नीतिभ्यश्च सतीभ्यो भूयस्ताभ्यो नमस्कुर्मः ॥ १०१ ॥ ॥ इत्यच्युतविरचितो रतिनीतिमुकुलः संपूर्णः ॥

---

No. 93. ग्रंथनाम, रत्नावलीनाटिका. Name, Ratnâvalî.

पत्राणि ४७, folios 47; पंक्तयः ८, lines 8; अक्षराणि ३८, letters 38.

ग्रंथसंख्या ८९३.

कर्ता, श्रीहर्षो राजा. Author, Srîharsha.

आरंभः । पादाग्रस्थितया मुहुः स्तनभरेणानीतया नम्रतां शंभोः सस्पृहलोचनत्रयपथं यांत्या तदाराधने ॥ ह्रीमत्या शिरसीहितः सपुलकस्वेदोद्गमोत्कंपया विश्लिष्यन् कुसुमांजलिर्गिरिजया क्षिप्तोंतरे पातु वः ॥१॥२॥३॥ जितमुडुपतिना नमः सुरेभ्यो द्विजवृषभा निरुपद्रवा भवंतु ॥ भवतु च पृथिवी समृद्धसस्या प्रतपतु चंद्रवपुर्नरेंद्रचंद्रः ॥४॥ नांद्यंते सूत्रधारः ।

समाप्तिः । उर्वीमुद्दामसस्यां जनयतु विसृजन्वासवो वृष्टिमिष्टामिष्टैस्त्रैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः ॥ आकल्पांतं च भूयाः समुपचितसुखाः संगमः सज्जनानां निःशेषा यांतु शांतिं पिशुनजनवचोदुर्जया वज्रलेपाः ॥१९॥ इतिनिष्क्रांताः सर्वे ॥ ॥ चतुर्थोंकः ॥४॥ ॥

---

No. 94. ग्रंथनाम, रसिकजीवनम्. Name, Rasika-jîvana.

पत्राणि ६४, folios 64; पंक्तयः १३, lines 13; अक्षराणि ५६, letters 56.

ग्रंथसंख्या २९१२.

शकः १७८३. Saka 1783.

कर्ता, गदाधरभट्टः Author, Gadâdharabhatta.

आरंभः । आदृतकुपितभवानीकृतकरमालादिबंधनव्यसनः ॥ केलिकलाकलहादौ देवो वः शंकरः पायात् ॥१॥२॥३॥ उमातनूजेन गदाधरेण प्रत्युद्भवं सेवितशंकरेण ॥ गौरीशपुत्रेण रसज्ञहेतोर्विरच्यते कश्चन काव्यबंधः ॥ ४ इहोदाहरणं नानाकविनिर्मितसूक्तयः ॥ लिख्यंते लक्ष्यवस्तूनां लक्षणान्यपि कुत्रचित् ॥५॥ अथ नमस्कृत्याशीःप्रकीर्णकम् ॥ तत्र गणेशः ॥हस्तपंकजनिविष्टमोदकव्याजसंचरदशेषपुमर्थम् ॥ नौमि किंचिदवधूनितशुंडादंडकुंडलितमंडितगंडम् ॥१॥शंकरगुरूणाम् ॥

समाप्तिः । शूराः संति सहस्रशः प्रतिपदं विद्याविदोनेकशः संति श्रीपतयो निरस्तधनदास्तेपि क्षितौ भूरिशः ॥ ये चाकर्ण्य निरीक्ष्य वान्यमनुजं दुःखार्दितं यन्मनस्ताद्रूप्यं प्रतिपद्यते जगति ते सत्पूरुषाः पंचषाः ॥१९॥ भर्तृहरेः ॥ ॥ इति श्रीभवानीभावनासक्तशंकरभट्टदामोदरभट्टसूनुश्रीगौरीपतिसूनुगदाधरभट्टेन विरचिते रसिकजीवने दशमः प्रबंधः पूर्णः ॥ ॥

---

No. 95 ग्रंथनाम, राधाविनोदकाव्यं सटीकम्. Name, Râdhâvinoda, with a commentary.

पत्राणि १०, folios 10; पंक्तयः १०, lines 10; अक्षराणि ४०, letters 40. ग्रंथसंख्या २९०.

कर्ता, रामचंद्रकविः. टीकाकारो, नारायणः Author, Râmachandra. Commentator, Nârâyana.

आरंभः । मालीनो घनमाली मालीनो बलमाली ॥ मालीनो वनमाली मालीनोवतु माली ॥ १ ॥

समाप्तिः । अथ तया कलया कलयाशुभं वनजदामजदामजदीप्तिमान् ॥ हरिरगात्तमगात्तमगाच्च सा मुदमतीवमतीवदशैः स्थितम् ॥ १८ ॥ रामचंद्रकविना कविनादः पूरुषोत्तमसुतेन सुतेन ॥ राधिकाहृदयशोकदमासीद्राधिकाहृदयशोकदमारात् ॥ १९ ॥ ॥ इति राधाविनोदकाव्यं समाप्तम् ॥ ॥

टीकारंभः । पितृवचनमवश्यमेव पाल्यं जगति जनानिति शासितुं वनांतम् ॥ गतमतिकरुणारसार्द्रचित्तं रघुपतिमेकमुपास्महे सदारम् ॥१॥ रंगनाथांगजनुषा नारायणमनीषिणा ॥ राधाविनोदकाव्यस्य व्याख्या विख्यापयिष्यते ॥ २ ॥ राधाविनोदाख्यं काव्यं चिकीर्षुर्निर्विघ्नसमाप्तिकामो रामचंद्रकविः परमेश्वरकर्तृकस्वरक्षणाशंसनरूपं मंगलमाचरति ॥ मालीन इति ॥

टीकासमाप्तिः ।यस्य यः शोकस्तत्प्राप्तिनिबंधनदुःखं द्याति खंडयति तत्तादृशमृ॥ १९ ॥ शुकदेवसमाख्यस्य पंडितश्रीशिखामणेः ॥ तनयस्य निदेशेन भट्टनारायणो बुधः ॥ १ ॥ राधाविनोदकाव्यस्य व्याख्यानं स्वधिया व्यधात् ॥ परोपकाररसिकाः शील्यंतु सदादरात् ॥ २ ॥ ॥ इति टीका समाप्ता ॥ ॥

---

**No. 96.** ग्रंथनाम, **रामार्यास्तवः सटीकः**. Name, Râmâryâ-Stava with a commentary. पत्राणि ४५, folios 45; पङ्क्तयः ७, lines 7; अक्षराणि २२, letters 22. ग्रंथसंख्या ४३९.

कर्ता, **मुद्गलाचार्यः**. Author, Mudgalâchârya.

आरंभः । त्वयि विमुखे मखमुख्ये सख्येनान्यस्य कस्य जीवामि॥जीवा मितमवदर्पितवसनाशनमात्रजीवना: सर्वे ॥ १ ॥

समाप्तिः । धनुषा रिपुजयजनुषा रुचिरतराकारनिर्जितांबुधरा ॥ तरुणारुणनिभचरणा काचन करुणा रुणाद्धि मे हृदयम् ॥ १०८ ॥ ॥ इति श्रीमन्महामुद्गलभट्टाचार्यविरचितः श्रीरामार्यास्तवः संपूर्णः ॥ ॥

टीकारंभः । मखमुख्ये यज्ञफलदातरि त्वयि पराङ्मुखे सति अन्यस्य कस्य सख्येन जीवामि न कस्यापीति काकुः ॥

टीकासमाप्तिः । पुनरपि प्रकारांतरेण करुणारूपत्वेन वर्णयति ॥ धनुषेति ॥ धनुषा शरासनेन किंलक्षणेन धनुषा रिपुजयजनुषा शत्रुजयजन्मना रुचिरतराऽतिसुंदरा आकारनिर्जितांबुधरा आकार आकृतिस्तया निर्जितोधरीकृतोंबुधरो मेघो यस्याः पुनः किंभूतः तरुणारुणनिभचरणरक्तपंकजा ॥ यद्वा तरुणो योरुणः सूर्यसारथिस्तस्य उदयपदा काचन काप्यपूर्वा करुणा मे मम हृदयं रुणद्धि व्याप्नोति व्याप्य तिष्ठति तया नान्यत्किंचिदपि भाति ॥ १०८ ॥

---

**No. 97.** ग्रंथनाम, **लक्ष्मीसहस्रविषमपदव्याख्या.** Name, A commentary on difficult passages in the Lakshmîsahasra.

पत्राणि ४२, folios 42; पंक्तयः १२, lines 12; अक्षराणि ४०, letters 40.

कर्ता, **पिंगलधुंडिराजः**. Author, Piṁgaladhuṇḍirâja.

आरंभः । प्रणम्य श्रीमहालक्ष्मीं तत्कारुण्येक्षणादृतः ॥ लक्ष्मीसहस्रविषमपदव्याख्यां तनोम्यहम्॥ इह खलु श्रीलक्ष्मीप्रसादासादितनिरतिशयवाग्विलासो वश्यवाक् श्रीवेंकटाचार्यः कविराट् श्रीलक्ष्मीं सहस्रपद्यैस्तोष्टुकामो निष्प्रत्यूहग्रं-

थपरिसमाप्तये श्रीकांतवैंकटप्रभुं नमस्करोति मंगलाचरणेन ॥ वेंकटब्रह्मणे नमोऽस्तु ॥

समाप्तिः । त्वद्यामिति ॥ आदिमशाब्दिकस्य शब्दशास्त्रस्य प्रथमकर्तुः ॥ तथा तत्काले पद्मकरणसमये उदितः यः चारुमारुतः मुखवायुस्तेन धुतः त्वत्केलिसंबंधी गाढः श्रमो यस्य एतादृशं पत्नं पुराणं पक्षींद्रवाहं महः प्रसीदतु ॥ ११ ॥ ॥ इति पंचविंशस्तबकः ॥ २५ ॥ ॥

---

**No. 98.** ग्रंथनाम, **लटकमेलकप्रहसनम्.** Name, Laṭaka-melaka-prahasana. पत्राणि १३, folios 13; पंक्तयः ९, lines 9; अक्षराणि ३४, letters 34.

कर्ता, **शंखधरः.** Author, Saṁkhadhara.

आरंभः । गौरीचुंबनचंचलं चलदलश्चंद्रप्रभामंडलं व्यालीवित्फणमंडलं रतिरसप्रस्विन्नगंडस्थलम् ॥ प्रौढप्रेमपरं परापरिचयप्रोत्फुल्लनेत्रांचलं शंभोरस्तु विभूतये त्रिजगतामुन्मत्तमंगं शिरः ॥ १ ॥

समाप्तिः । भूदेवस्वस्तिवादस्तिरयतु दुरितं निर्जराः संतु संतः संतु प्रौढारिवीरव्रजविजयकराः शालिनः क्षोणीपालाः ॥ आस्तां विद्वच्चकोरश्रवणपुलककृत्कारि काव्यं कवीनामस्तु व्यामोहशांतिः सृजतु हृदि मुदं निश्चलां चंद्रचूडः ॥१९ ॥ इति निष्क्रांताः सर्वे ॥ ॥ द्वितीयः संधिः ॥ ॥ इति श्रीशंखधरविरचितं लटकमेलकं नाम प्रहसनं संपूर्णम् ॥ ॥

---

**No. 99.** ग्रंथनाम, **वासवदत्ता टीकया तत्त्वदीपिन्या सहिता.** Name, Vâsavadattâ, with a commentary called Tattva-dîpinî.

पत्राणि ३०, folios 30; पंक्तयः २८, lines 28; अक्षराणि ६४, letters 64.

**शकः १७६८, संवत् १९०३.** Śaka 1768; Saṁvat 1903.

**कर्ता, सुबंधुः.** टीकाकारः, **जगद्धरः.** Author, Subandhu. Commentator, Jagaddhara.

आरंभः । करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः ॥ पश्यंति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥१ ॥२ ॥ ३ ॥ ४ ॥ अग्रे सुजनप्रशंसा ॥ ५ ॥ ततो दुर्जनवर्णनम् ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ततः कव्युक्तिशंसनम् ॥ ११ ॥ १२ ॥ सरस्वतीदत्तवरप्रसादश्चक्रे सुबंधुः सुजनैकबंधुः ॥ प्रत्यक्षरश्लेषमयप्रबंधविन्यासवैदग्ध्यनिधिर्निबंधम् ॥ १३ ॥ ॥ अभूदभूतपूर्वः सर्वोर्वीपतिचक्रचारुचूडामणिश्रेणिशाणकोणकषणनिर्मलीकृतचरणनखमणिः ॥ ॥

समाप्तिः । ततः कंदर्पकेतुः समागतेन मकरंदेन वासवदत्तया सह स्वपुरं गत्वा यथाभिलषितानि सुरतसुखान्यनुभवन् कालं निनायेति ॥ ॥ इति श्रीसुबंधुविरचिता वासवदत्ताख्यायिका समाप्ता ॥ ॥

टीकारंभः । हरौ तात वैकुंठताकाम्यसिद्धौ हरे तात कामप्रणाशोस्ति बुद्धौ ॥ अतस्तौ विहाय त्वदीयांघ्रिमेते त्वया तेन हेरंब नोदासितव्यम् ॥ १ ॥ नत्वा गुरून् गुणगुरूनवलोक्य टीकां विश्वादिकोशनिवहान् सुविचार्य बुद्ध्या ॥ श्रीमान् जगद्धर इमां वितनोति टीकां गूढार्थबोधनिपुणां भरतादिविज्ञः ॥ २ ॥ इह खलु निष्प्रत्यूहमीहितफलसिद्ध्यर्थमत्यर्थमर्थी कविकुलकुमुदबंधुः सुबंधुर्वागधिदेवताकीर्तनरूपं मंगलमादौ निबध्नाति ॥ करबदरेत्यादि ॥ ॥

टीकासमाप्तिः । स्वपुरं कुसुमपुरं पाटलिपुत्रनगरं गतः कालं निनाय समयं नीतवान् ॥ यथा त्हृदयं मनोनुरूपं अभिलषितमिच्छा येषु तानि ॥ अन्यथाव्ययीभावे यथात्हृदयं यथाभिलषितमित्येकत्वे सति स्यादिति सर्वं निरवद्यमिति ॥ ॥ यदि भवति मदीये टिप्पणेत्र प्रमादः क्वचिदपि स महिम्ना शोधनीयो महद्भिः ॥ अलमिति मनकारी प्रायशो नात्र चित्रं भवति च गुरुहस्तालंबतोपि प्रकारः ॥ १ ॥ अग्रे टीकाकारस्य स्ववंशकीर्तनादिश्लोकाः ॥ २ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ८ ॥ ९ ॥ १० ॥ ११ ॥ ॥ ॥ ॥ इति श्रीमहामहोपाध्यायधर्माधिकारिश्रीजगद्धरविरचिता तत्त्वदीपिनी वासवदत्ताटीका समाप्ता ॥ ॥

---

**No. 100.** ग्रंथनाम, **वासवदत्तादूतीसंवादव्याख्या.** Name, A commentary on the conversation between Vâsavadattâ and her maid.

पत्राणि ६, folios 6; पंक्तयः २६, lines 26; अक्षराणि ६४, letters 64.

शकः १७६८; संवत् १९०३. Śaka 1768; Saṁvat, 1903.

कर्ता, **भट्टप्रभाकरः.** Author, Bhaṭṭaprabhâkara.

आरंभः । निंदास्तुतिपरत्वेन वीरशृंगारयोर्द्वयोः व्याख्यास्ये चूर्णिकाः काश्चित् सुबंधोर्दूत्यवर्णिकाः ॥ १ ॥ अवस्त्रीकृतमिति ॥ वीरनिंदापक्षे ॥ त्वं ना पुमान् सन् ॥ अवस्त्रीकृतमपहृतसर्वस्वमप्यर्थाद्रिपुभिः आत्मानं कलयसि धारयसि ॥धिक् त्वामीदृशमिति भावः ॥यद्वा एतादृशमप्यात्मानं यतः कलयसि अतस्त्वं तत्त्वतो ना इति काकुः ॥ किंतु नैव पुमान् भवानिति भावः ॥ ॥

समाप्तिः । मदयंती मदमाचरंती दुर्दयतो भवदनुदयतो भंगमाचरंती । सा स्मरमयं कामरूपं अस्यवदया यस्य तं विष्णुवत्सदयं । परोपकृतिनं त्वां वांछतीति । अत्यंतसदयो भवानिति । अति सापराधामपि तामनुकंपतामिति भावः ॥

॥ अधिकमत्र लिखनीयमलंकारकोशव्याकरणादि तत्सर्वं विस्तारभीतेर्न लिखितमित्युपरम्यत इति शिवम् ॥ १७ ॥ ॥ इति श्रीमीमांसकवर्यभट्टप्रभाकरकृतं वासवदत्तायां दूतीसंवादविवरणं समाप्तिमगमत् ॥ ॥

---

**No. 101.** ग्रंथनाम, **विक्रमोर्वशीत्रोटकम्** : Name: Vikramorvaśîtrotaka.

पत्राणि २३, folios 23; पंक्तयः ११, lines 11; अक्षराणि ४४, letters 44.

ग्रंथसंख्या ६९९.

शकः १७७७. S'aka 1777.

कर्ता, **कालिदासः**. Author, Kâlidâsa.

आरंभः । वेदांतेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ॥ अंतर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ॥ १ ॥

समाप्तिः । परस्परविरोधिन्योः सर्वलोकेपि दुर्लभं ॥ संगतं श्रीसरस्वत्योर्भूतयेस्तु सतां सदा ॥ २४ ॥ इति निष्क्रांताः सर्वे ॥ ॥ पंचमोंकः ॥ ॥

---

**No. 102.** ग्रंथनाम, **विद्धशालभंजिकानाटिका**. Name: Viddhaśâla-bhañjikâ-nâṭikâ.

पत्राणि २९, folios 29; पंक्तयः ११, lines 11; अक्षराणि ४०, letters 40.

ग्रंथसंख्या ७९७.

शकः १७८८. Śaka 1788.

कर्ता, **राजशेखरः**. Author, Râjaśekhara.

आरंभः । कुलगुरुरबलानां केलिदीक्षाप्रदाने परमसुहृदनंगो रोहिणीवल्लभस्य ॥ अपि कुसुमपृषत्कैर्देवदेवस्य जेता जयति सुरतलीलानाटिकासूत्रधारः ॥ १ ॥ अपि च ॥ दृशा दग्धं मनसिजं जीवयंति दृशैव याः ॥ विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः ॥ २ ॥ ३ ॥ नांद्यंते सूत्रधारः ।

समाप्तिः । तथापीदमस्तु ॥ वामांगं पृथुलस्तनस्तबकितं यावद्भवानीपतेर्लक्ष्मी कंठहठग्रहव्यसनिता यावच्च दोष्णां हरेः ॥ यावच्च प्रतिसामसारणविधौ व्यग्रौ करौ ब्रह्मणः स्थेयासुः श्रुतिशुक्तिलेह्यमधुरास्तावत्सतां सूक्तयः ॥ २३ ॥ इति निष्क्रांताः सर्वे ॥ ॥ चतुर्थोंकः ॥ ॥

---

**No 103.** ग्रंथनाम, **विद्धशालभंजिकानाटिकायाः टीका.** Name: A Commentary on the Viddhaśâlabhañjikâ-nâṭikâ.

पत्राणि ३०, folios 30; पंक्तयः १५, lines 15; अक्षराणि ४२, letters 42.

ग्रथसंख्या ११७१.

कर्ता, **श्रीरंगनाथदीक्षितपुत्रो नारायणः** Author, Nârâyaṇa, the son of Śrîrañganâtha Dîkshita.

आरंभः। पितृवच[न]मवश्यमेव पाल्यं जगति जनानिति शासितुं वनांतं॥ गतमतिकरुणारसार्द्रचित्तं मनसि महो'मम सन्निधिं विधत्ताम्॥ १ ॥ श्रीरंगनाथदीक्षिततातं नारायणो वंदे ॥ नौमि सदा दामोदरमादरतः सद्गुरुं चैव ॥ २ ॥ संप्रदायमपि जानता मया शब्दशासनविचारभीरुणा ॥ प्राकृतं प्रचुरपुस्तकेक्षिणा राजशेखरकृतेर्विविच्यते ॥ ३ ॥ तत्प्रसंगवशतः क्वचित्क्वचित्संस्कृतेपि रसनापवर्तते ॥ तत्र यत्स्खलितमर्थकोविदास्तत्समादधत शोधनाध्वना ॥ ४ ॥ बालरामायणे स्वस्य महाराष्ट्रत्ववर्णनात्॥ महाराष्ट्रः कविः सोयं देशीं प्रायः स्वदेशजां ॥ प्रयुक्तवानतोस्माकं सुबोधा बहुधास्ति सा ॥ ५ ॥ प्रारिप्सितस्य ग्रंथस्य निर्विघ्नपरिसमाप्तये कृतं मंगलम्॥ ॥

समाप्तिः। यतः पद्मरागमणिरेकावलीमलंकरोति तत्परिणयत्वार्यपुत्र आत्मनः स्त्री अन्यहस्तकर्तव्या न भवति ॥ नैतदा अग्रे ग्रंथः अल्पावशेषः खंडितः।

---

**No. 104.** ग्रंथनाम, **व्याजोक्तिशतकम्.** Name: Vyâjoktiśataka.

पत्राणि ९, folios 9; पंक्तयः १२, lines 12; अक्षराणि ४०, letters 40.

ग्रंथसंख्या १७०.

कर्ता, **त्रिविक्रम**: Author, Trivikrama.

आरंभः। मधूलीभिर्भृंगान् मधुरफलसारैरपि शुकान् समुन्मीलच्चंचत्किसलयभरैः कोकिलचयान् ॥ प्रणेतुं सौहित्यं प्रभवति नितांतं पटु रटन् रसालः प्रत्यूहो भवति नहि चेत्कोऽपि करटः ॥ १॥

समाप्तिः। बंदीकृते बत सरोरुहकोरमध्ये निर्मुक्तकालमनुचिंतयति द्विरेफे ॥ बातो ववौ दलितपंकजकोशबंधस्तत्रांतरे समुदितश्च सहस्ररश्मिः ॥ १०० ॥ सहृदयहृदयविनोदनहेतोर्व्याजोक्तिभिः पदा(दां?)शतकं ॥ रचितं त्रिविक्रमेण प्रभवतु विदुषां प्रतोषाय ॥ १ ॥

---

**No. 105.** ग्रंथनाम, **शतमूर्खलक्षणम्.** Name: Śatamûrkha-lakshaṇa.

पत्राणि ३, folios 3; पंक्तयः ७, lines 7; अक्षराणि १५, letters 15.

ग्रंथसंख्या २६.

आरंभः। शृणु मूर्खशतं राजन् तं तं भावं विवर्जय ॥ येन त्वं राजसे लोके दोषहीनो मणिर्यथा ॥ १ ॥ सामर्थ्ये विगतोद्योगः स्वश्लाघी प्राज्ञपर्षदि ॥ वेश्यावचनविश्वासी प्रत्ययी दंभडंबरे ॥ २ ॥ द्यूतादिवित्तबद्धाशः कृतद्रोहे ऽपसंशयः ॥ निर्बुद्धिः प्रौढकार्यार्थी विविक्तरसिको वणिक् ॥ ३ ॥

समाप्तिः। अज्ञातप्रतिभूः कीर्त्यै हेतुवादिनि मत्सरी ॥ सर्वत्र विश्वस्तमना न लोकव्यवहारवित् ॥ २५ । भिक्षुकश्चोष्णभोजी च गुरुश्च शिथिलक्रियः ॥ कुकर्मण्यपि निर्लज्जः स्यान्मूर्खश्च सहासगीः ॥ २६ ॥ ॥ इति शतमूर्खलक्षणं संपूर्णम् ॥ ॥

---

**No. 106.** ग्रंथनाम, **शब्दसुधाकाव्ये चतुर्थः सर्गः सटीकः.** Name: Śabdasudhâ-kâvya, Canto IV, with a commentary.

पत्राणि ५४, folios 54; पंक्तयः १३, lines 13; अक्षराणि ३०, letters 30.

ग्रंथसंख्या १३१७.

शकः १७७४. Śaka 1774.

कर्ता, **अनंतकविः.** टीकाकारः, स एव. Author and Commentator, Anantakavi.

आरंभः। श्रीश ईशकमलासनादिभिः प्रार्थितो ऽसुरभरार्तभूकृते ॥ शासितुं जगदवातरद्विभुः सुंदरे स वसुदेवमंदिरे ॥ १ ॥

समाप्तिः। यः कामः स्ववशं निनाय धनुषा संधानमात्रादिषोः श्रीकंठादिममाशु विश्वमखिलं तं हेलयोपागतं ॥ नेतुं स्वीयवशं स्मरं स्मयमयाद्भ्रंशयद्यः क्षणात्सर्वोपास्यमपास्य चास्य मननं चेतो भजस्वाशु तम् ॥ ९८ ॥ ॥ श्रीमान् गणपतो विनायकपिता माता च लक्ष्मी सती भीमातीरतुलापुरे मल्करे वंशे प्रसूते स्म यं ॥ यो यं शब्दसुधां व्यधाद्बहुसुधामाधाय कंसं सुधीस्तस्यानंतकवेःकृतावयमभूत्सर्गश्चतुर्थः शुभः ॥ १ ॥

टीकारंभः। अथेदानीं कामस्य हरिं प्रति जिगीषया यानप्रकारं वर्णयिष्यन्नादौ भगवतो जनुरादि वर्णयितुं प(च?)क्रमते ॥ श्रीश इति ॥

टीकासमाप्तिः । श्रीमानिति ॥ अयंशुभश्चतुर्थः सर्गः अभूत् ॥ इतरत्प्राग् व्याख्यातम् ॥ १ ॥

---

**No. 107.** ग्रंथनाम, **शाकुंतलटीका अर्थद्योतनिकाभिधाना,** Name: Artha-dyotanikâ, a commentary on the Sâkuntala.

पत्राणि ९२, folios 92; पंक्तयः १५, lines 15; अक्षराणि ५०, letters 50.

ग्रंथसंख्या ४३१२.

शकः १७८६ रक्ताक्षीवत्सरः. Śaka 1786.

कर्ता, **भट्टश्रीराघवः.** Author, Bhaṭṭa Śrî Râghava.

आरंभः । यत्त्रेधाजानि दशधा द्विधा गतं यद्यज्जातं दशविधमोति षोडशत्वं ॥ यद्गीतं सममहदादिकस्य चाद्यं तेजस्तज्जयति हिमोष्णरूपमग्र्यम् ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ अथ नाटकादौ पूर्वरंगांगभूतामाशीरूपां चतुरस्रतालानुसारिणीमष्टपदां सूत्रधारो नांदीं पठति ॥ या स्रष्टुरिति ॥

समाप्तिः । अंगमन्ये रसाः सर्वे कुर्यान्निर्वहणेद्भुतमिति ॥ अत्रान्ये भयानकहास्ययुद्धवीरकरुणाद्भुतरौद्रबीभत्सा अंगत्वेनोपबद्धास्ते तत्र तत्र मदुक्तलक्षणा अनुसंधेया इति शिवम् ॥ १ ॥ २ ॥ ॥ इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणभट्टश्रीपृथ्वीधरात्मजश्रीमत्पदवाक्यप्रमाणपारावारपारीणसाहित्यरत्नाकरसकलकलाशास्त्रप्रवीणभट्टश्रीराघवविरचिता अभिज्ञानशाकुंतलव्याख्या अर्थद्योतनिकाभिधा संपूर्णा ॥ ॥

---

**No. 108.** ग्रंथनाम, **शालिवाहनसप्तशती कोषकाव्यं सटीकम्.** Name: Śâlivâhanasaptaśatî with a commentary.

पत्राणि १५३, folios 153; पंक्तयः १०, lines 10; अक्षराणि ४०, letters 40.

ग्रंथसंख्या ३८२५.

कर्ता, **शालिवाहनः.** टीकाकारो, **गंगाधरभट्टः.** Author, Śâlivâhana. Commentator, Gaṅgâdharabhaṭṭa.

आरंभः । पसुवइणो रोसारुणपडिमासंकंतगोरिमुहअंदं ॥ गहिअग्घपंकअंमिअ संझासलिलंजलिं णमह ॥ १ आमिअं पाउअकव्वं पढिउं सोउं च जे ण आणंति ॥ कामस्स तत्तचिंतं कुणंति ते कह ण लज्जांति ॥ २ ॥ सत्तसआइं कइवच्छलेण कोडीअमज्झआरम्मि ॥ हालेण विरइआइं सालंकाराण गाहाणं ॥ ३ ॥

उअ णिच्चलणिप्फंदा भिसिणीपत्तम्मि रेहइ बलाआ ॥ णिम्मलमरगअभाअणप-डिट्ठिआ संखसुत्तिव्व ॥ ४ ॥

टीकारंभ: । नत्वा पुरढुंढिपदाब्जं गंगाधरभट्टनिर्मिता टीका ॥ सप्तशतभा-वलेशप्रकाशिका शोध्यतां विज्ञैः ॥ १ ॥ अथ तत्र भवान् प्राकृतकविकुमुदकुमु-दिनीनायकः शालिवाहनश्चिकीर्षितगाथाकोशस्याविघ्नपरिसमाप्तये कृतं मंगलं श्रोतृहितार्थमुपनिबध्नाति ॥ पसुवइणो इति ॥ पशुपते रोषारुणप्रतिमासंक्रांतगौरी-मुखचंद्रं ॥ गृहीतार्घ्यपंकजमिव संध्यासलिलांजलिं नमत ॥

समाप्तिः । संझागहिअजलंजलिपडिमासंकंतगोरिमुहकमलं ॥ आलिअं विअ फुरिओट्ठं विअलिअमंतं हरं णमह ॥ ९७ ॥ इअ सिरिहालविरइए पाउअकव्वम्मि सत्तसअम्मि ॥ सत्तंसअं समत्तं गाहाण सहावरमणिज्जं ॥ ९८ ॥ ॥ इति शालिवाहनसप्तशत्याख्यं कोशकाव्यं संपूर्णम् ॥ ॥

टीकासमाप्तिः । अथ समाप्तौ हरनमस्काररूपं मंगलमाचरति ॥ संझेति ॥ संध्या-गृहीतजलांजलिप्रतिमासंक्रांतगौरीमुखकमलं ॥ अलीकमेव स्फुरितोष्ठं विगलित-मंत्रं हरं नमत ॥ हरस्यापि गौरीमुखकमलप्रतिबिंबदृष्ट्या संध्यारूपानित्यकर्मांग-मंत्रलोपो भवति किं पुनरस्मदादिर्लोकस्य प्रियासान्निध्ये व्याकुलचित्ततेति स-र्वथा स्त्रीसंगः परिहरणीय इति सकलतात्पर्यार्थः ॥ ९७ ॥ इति श्रीहालविर-चिते प्राकृतकाव्ये सप्तशते ॥ सप्तमशतं समाप्तं गाथानां स्वभावरमणीयम् ॥ हाल इ-ति राज्ञः शालिवाहनस्य संज्ञांतरम् ॥ गाथेति छंदः ॥ इतिशब्दः ग्रंथस्य परिसमा-प्तौ ॥ ९८ ॥ । इतिश्रीगंगाधरभट्टविरचिता टीका समाप्ता ॥ ॥

---

**No. 110.** ग्रंथनाम, **श्रीनिवासचंपूः.** Name: Śrînivâsa-champû.

पत्राणि ६९, folios 69; पंक्तयः १३, lines 13; अक्षराणि ३६, letters 36.

ग्रंथसंख्या २०१८.

शक : १७७६; Śaka 1776.

कर्ता, **वेंकटेश** :. Author, Venkateśa.

आरंभ : । वंशस्ते मुरली तदस्तु भण भोगो[त्रः]फणींद्राचलो माताहं जगतां त्रयस्य सविता वामेतरा दृङ् मम ॥ कास्ते ते शरणं त्वमेव सुमुखीत्येवं हि पद्मावतीं वाचा संमदयन् जयत्यनुदिनं श्रीश्रीनिवासो हरिः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ विजयी भवतु ॥ यस्तु स्वस्यैव चरणवत् कमलोल्लासं दधानः ॥ जंघावच्छराधि-गंभीरः ॥ उदरवद्वलिविभंगशाली ॥ नाभिवदात्मभूजननानिदानपद्मोपगूढः ॥

समाप्ति : । कुमारौ तोषयन् प्राप्तराज्यौ द्वावप्याप्टच्छ्य पद्मावत्या सह भोगींद्राचलं प्रत्युदचलच्छ्रीनिवास :॥ कंठे कंठीरवाख्यां प्रतिकलमधुरां बिभ्रतः सूरिचूडारत्नस्यांते वसन् यः कलयति कवितां गद्यपद्यावबद्धाम् ॥ तस्य श्रीश्रीनिवासप्रभुवरचरिते वेंकटेशस्य काव्ये पर्याप्तः श्लेषसारे कविमशकशिशोः पंचमोयं विलास : ॥ २४ ॥ इति श्रीनिवासचंपूकाव्ये उत्तरविलासः पर्याप्तः ॥

---

**No. 111.** ग्रंथनाम, **श्रीनिवासचम्पूटीका.** Name: A commentary on the Śrînivâsa-champû.

पत्राणि ४६, folios 46; पंक्तयः १४, lines 14; अक्षराणि ४२, letters 42.

ग्रंथसंख्या १६९९.

**शकः** १७७६. Śaka 1776.

कर्ता, **धरणीधरराजः.** Author, Dharaṇîdhararâja.

आरंभः । वंशइति ॥ वंशादयः पंचकुलाद्यर्थका इति प्रश्नपक्षे ॥ वेण्वाद्यर्थका इत्युत्तरपक्षे ॥ इति कश्चिच्चमत्कारः ॥ तथा व्यर्थः ॥ द्वौ वंशौ कुलमस्करावित्यमरः॥ गोत्रंनाम पर्वतश्च ॥ गोत्रं क्षेत्रेन्वये छत्रे संभाव्ये बोधवर्त्मनोः ॥ वने नाम्नि च गोत्राद्रौ गोत्राभुवि गवांगण इति हैमः । माता सवित्री मापनकर्ता च ॥ जनकः सविता पितेति धनंजय : ॥ सविता रविरित्यमर : ॥ शरणं गृहरक्षित्रोरित्यमरः॥ सूर्यचंद्रलोचनो हरिरिति कविसमयः ॥ पद्मावती काचन राजपुत्री ॥ १ ॥

समाप्तिः । वाहिनीति ॥ नदी सेना च ॥ २३ ॥ दायं पित्रार्जितद्रव्यम् ॥ कंठ इति ॥ कंठे कंठीरवःनृसिंहः ॥ २४ ॥ ॥ इति श्रीमदुत्तरश्रीनिवासविलासे पंचमोल्लासस्य धरणिधरराजविरचिता टीका पर्याप्ता ॥

---

**No. 112.** ग्रंथनाम, **सुभाषितशार्ङ्गधरः.** Name: Subhâshita Śârṅgadhara.

पत्राणि २६३, folios 263; पंक्तयः २०, lines 20; अक्षराणि ४०, letters 40.

ग्रंथसंख्या, ६५७५.

**शकः** १६८५. Śaka 1685.

कर्ता, **शार्ङ्गधरः.** Author, Śârṅgadhara.

आरंभ : ।यस्मिन् बुद्बुदसंकरा इव बहुब्रह्मांडखंडाः क्वचिद्भांति क्वापि च सीकरा इव विरिंच्याद्याः स्फुरंति भ्रमात् ॥ चिद्रूपा लहरीव विश्वजननी शक्तिः क्वचिद् यो-

तते स्वानंदामृतनिर्भरं शिवमहापाथोनिधिं तं नुमः ॥ १ ॥ पुरा शाकंभरीदेशे श्रीमान् हम्मीरभूपतिः ॥ चाहुवाणान्वये जातः ख्यातः शौर्ये इवार्जुनः ॥ २ ॥ तस्याभवत्सभ्यजनेषु मुख्य : परोपकारव्यसनैकनिष्ठ : ॥ पुरंदरस्येव गुरुर्गरीयान् द्विजाग्रणी राघवदेवनामा ॥३॥ गोपालदामोदरदेवदाससंज्ञा बभूवुस्तनयास्तदीयाः नेत्रावतारा इव चंद्रमौलेरपाकृतध्वांतगुणास्त्रयोपि ॥ ४ ॥ तेषां मध्ये यस्तु दामोदरोभूदुत्पाद्य त्रीनात्मजान् वीतरागः ॥ भागीरथ्यां शुद्धदेहं विहाय ज्ञानादात्मन्येव निष्ठां जगाम ॥ ५ ॥ ज्येष्ठः शार्ङ्गधरस्तेषां लघुर्लक्ष्मीधरस्ततः ॥ कृष्णोनुजस्ततस्तेषां त्रयस्त्रेताग्नितेजसः ॥ ६ ॥ जयति शार्ङ्गधरस्त्रिपुरापदद्वयकुशेशयलुब्धमधुव्रतः ॥ सरससूक्तिसुधौघकलानिधिः कविकरींद्रकदंबमृगाधिपः ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ इति कविवंशवर्णनम् ॥ अत : परं ग्रंथानुक्रमणिकाश्लोका : ॥ ४६ ॥ गणितं पद्यसंख्याभिषट्सहस्त्रं शतत्रयम् ॥ ॥ अथ नमस्कृतिः ॥ चलत्कर्णानिलोद्धूतसिंदूरारुणितांबरः ॥ जयत्यकाले विसृजन् संध्यामिव गजाननः ॥ १ ॥

समाप्ति : । शास्त्राब्धिं सकलं विलोक्य नितरां ग्रंथ : कृतोयं मया लोकानंदकरः समस्तसुकवित्वसंतानजैवातृकः ॥ अस्यास्वाद्यसुभाषितामृतरसानानंदपूर्णांतराः संतः संप्रति नाकवासनिरतान् देवान् हसंतु ध्रुवम् ॥ १ ॥ ॥ इति शार्ङ्गधरविरचितायां पद्धत्यां शांतरसे विदेहमुक्तिकथनकालवंचनादिपरिच्छेदः समाप्तः ॥ ॥

---

**No. 115**. ग्रंथनाम, **हरिविलासकाव्यं** प्रथम : सर्गः सटीकः Name: Harivilâsa Kâvya, Canto 1st, with a commentary.

पत्राणि १६, folios 16; पंक्तयः ८–९–१०, lines 8, 9, 10; अक्षराणि –१६ १८–२४, letters 16, 18, 24.

ग्रंथसंख्या १६२.

कर्ता, **लोलिंबराजः**. Author, Lolimbarâja.

आरंभ: । रचयति सहसा यच्चित्रमेतं प्रपंचं प्रशमयति च तद्वत्केनाचेत्कौतुकेन ॥ अविदितमपरैस्तच्चंडमुंडादिनानादनुजदलनदक्षं शर्व सर्वस्वमव्यात् ॥ १ ॥ यदपि मत्कविता गुणवर्जिता तदपि साधुसुखाय भविष्यति ॥ इह निमित्तमिदं यदुदीर्यते हरिकथा कलिकल्मषनाशिनी ॥ २ ॥

टीकारंभ: । गोपालं च गुरुं देवं नमस्कृत्य यथामति ॥ पदार्थभावसंधेव दीपिकेयं वितन्यते ॥ १ ॥ इह खलु सकलकविजनमुकुटालंकारलोलिंबराजक-

विहरिहरनाम्नो राज्ञःआज्ञया श्रीकृष्णवर्णनं चिकीर्षुः स्वकुलदेवतां प्रणमति ॥ रचयतीत्यादि ॥

समाप्तिः। इति तव चरितं निशम्य दुष्टं दुरितपथैकपराङ्मुखो व्रजेंद्रः ॥ अयि सुत यदि ताडनं विदध्यादहह तदा किमहं चरीकरोमि ॥२९॥ नानागुणैरवनिमंडलमंडनस्य श्रीसूर्यसूनुहरिभूमिभुजो नियोगात् ॥ त्रैलोक्यकौतुककरं क्रियते स्म काव्यं कोलिंबराजकविना कविनायकेन ॥ ३० ॥ इति श्रीमत्सूर्यकुलालंकारश्रीहरिहरमहाराजोद्योतितलोलिंबराजविरचिते हरिविलासकाव्ये कृष्णबालक्रीडावर्णनं नाम प्रथमः सर्गः ॥ ॥

टीकासमाप्तिः । श्रीसूर्यनामा राजा तस्य सूनुः पुत्रः हरिनामा भूमिं भुनक्तीति भूमिभुक् तस्य राज्ञो नियोगात् आज्ञातः आज्ञां पुरस्कृत्येत्यर्थः ॥३०॥ इति केशवाकूतसूनुयादवाकूतविरचितायां भावार्थदीपिकायां हरिविलासटीकायां प्रथमः सर्गः ॥ १ ॥

---

**No. 116.** ग्रंथनाम, **हरिविलासकाव्यं** द्वितीयः सर्गः सटीकः Name: Harivilâsa Kâvya, Canto 2nd, with a commentary.

**पत्राणि १८,** folios 18; **पंक्तयः ९–१०,** lines 9, 10 ; **अक्षराणि २४–२६,** letters 24, 26.

**ग्रंथसंख्या २५७.**

**कर्ता, लोलिंबराजः. टीकाकारो, यादवाकूतः.** Author, Lolimbarâja; Commentator, Yâdavâkûta.

आरंभः । नंदः स्वनंदनमवेक्ष्य वयोविशेषशोभायमानवपुषं बहुयुक्तियुक्तं ॥ वृंदावने बहुलबालतृणाभिरामे रामेण सार्द्धमव गास्तनयेत्यभाणीत् ॥ १ ॥ ततः पुरस्कृत्य समग्रगोधनं कलिंदकन्यातटकाननस्थली ॥ प्रभातकाले सखिसंघसंवृतः समाजगामागमदुर्गमो हरिः ॥ २ ॥

टीकारंभः । नंदयति आनंदयतीति नंदनः स्वस्य नंदनस्तमवेक्ष्येत्यादि ॥

समाप्तिः । अलंकृते पुण्यपयःप्रवाहैर्विश्रांतिदानोद्यतवृक्षवर्गे ॥ सिद्धाश्रिते श्रीपतिचित्तवृत्तिस्तत्र प्रसादोदयमाससाद ॥ ४४ ॥ नानागुणैरिति स एव श्लोकः ॥ इतिश्रीम०लोलिंबराजविरचिते हरिविलासकाव्ये द्वितीयः सर्गः ॥ ॥

टीकासमाप्तिः । वृक्षाणां वर्गो यस्मिन् तस्मिन् सिद्धैः आश्रिते अधिष्ठिते ॥४४॥

नानागुणैरिति पूर्ववत् ॥४५॥ इति यादवाकृतविरचितायां हरिविलासटीकायां भावार्थदीपिकायां द्वितीयः सर्गः समाप्तः ॥

---

**No. 117**, ग्रंथनाम **हर्षचरितं**, आख्यायिका. Name: Harshacharita.

पत्राणि १९, folios 19; पंक्तयः १२, lines 12; अक्षराणि ३८, letters 38.

ग्रंथसंख्या ९४१.

**कर्ता, बाणः.** Author, Bâṇa.

आरंभः। हरकंठग्रहानंदमीलिताक्षीं नमाम्युमां ॥ कालकूटाविषस्पर्शजातमूर्छागमामिव ॥ १ ॥ नमः सर्वविदे तस्मै व्यासाय कविवेधसे ॥ चक्रे पूर्णं सरस्वत्या यो वर्षमिव भारतम् ॥२॥ अग्रे कतिपयप्राचीनकविवर्णादिश्लोका विंशतिपर्यंताः ॥ ॥ जयति ज्वलत्प्रतापज्वलनप्राकारकृतजगद्रक्षः ॥ सकलप्राणिमनोरथसिद्धिः श्रीपर्वतो हर्षः ॥ २१ ॥ एवमनुश्रूयते ॥ पुरा किल भगवान् स्वर्लोकमधितिष्ठन् परमेष्ठी विकासिनि प्रविष्टरे समुपविष्टः

समाप्तिः। तेषु चैवमुत्पद्यमानेषु संसरति च संसारे यात्सु युगेष्ववतीर्णे कलौ वहत्सु वत्सरेषु व्रजत्सु वासरेष्वतिक्रामति काले प्रसवपरंपराभिरनवरतमापतति विकासिनि वात्स्यायनकुले क्रमेण कुबेरना [मा] वैनतेय इवोरुपक्षपीतद्विजो जन्म लेभे ॥ तस्याभवन्नच्युतईशानो हरः पाशुपत अग्रे ग्रंथः खंडितः

---

**No. 118**, ग्रंथनाम **हितोपदेशः** Name: Hitopadeśa.

पत्राणि ६८, folios 68; पंक्तयः १२, lines 12; अक्षराणि ४०, letters 40.

ग्रंथसंख्या २०३०.

आरंभः। मित्रलाभः सुहृद्भेदो विग्रहः संधिरेवच॥ पंचतंत्रात्तथान्यस्माद्ग्रंथादाकृष्य लिख्यते ॥ १ ॥ सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः ॥ जान्हवीफेनलेखेव यन्मूर्ध्नि शशिनः कला ॥२॥ श्रुतो हितोपदेशोयं पाटवं संस्कृतोक्तिषु ॥ वाचां सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥ ३ ॥ अजरामरवत्प्राज्ञो विद्यामर्थं च चिंतयेत् ॥ गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ ४ ॥

समाप्तिः। संधिः सर्वमहीभुजां विनयिनामस्तु प्रमोदः सदा संतः संतु निरापदः सुकृतिनां कीर्तिश्चिरं वर्द्धताम् ॥ नीतिर्वारविलासिनीव सततं वक्षस्थले संस्थिता वक्त्रं चुंबतु मंत्रिणामहरहर्भूयान्महानुत्सवः ॥ १३८ ॥ ॥ इति हितोपदेशे संधिर्नामचतुर्थकथासंग्रहः ॥ ॥

विहरिहरनाम्नो राज्ञःआज्ञया श्रीकृष्णवर्णनं चिकीर्षुः स्वकुलदेवतां प्रणमति ॥ रचयतीत्यादि ॥

समाप्तिः। इति तव चरितं निशम्य दुष्टं दुरितपथैकपराङ्मुखो व्रजेंद्रः ॥ अयि सुत यदि ताडनं विदध्यादहह तदा किमहं चरीकरोमि ॥२९॥ नानागुणैरवनिमंडलमंडनस्य श्रीसूर्यसूनुहरिभूमिभुजो नियोगात् ॥ त्रैलोक्यकौतुककरं क्रियते स्म काव्यं लोलिंबराजकविना कविनायकेन ॥ ३० ॥ इति श्रीमत्सूर्यकुलालंकारश्रीहरिहरमहाराजोद्योतितलोलिंबराजविरचिते हरिविलासकाव्ये कृष्णबालक्रीडावर्णनं नाम प्रथमः सर्गः ॥ ॥

टीकासमाप्तिः । श्रीसूर्यनामा राजा तस्य सूनुः पुत्रः हरिनामा भूमिं भुनक्तीति भूमिभुक् तस्य राज्ञो नियोगात् आज्ञातः आज्ञां पुरस्कृत्येत्यर्थः ॥३०॥ इति केशवाकूतसूनुयादवाकूतविरचितायां भावार्थदीपिकायां हरिविलासटीकायां प्रथमः सर्गः ॥ १ ॥

---

**No. 116.** ग्रंथनाम, **हरिविलासकाव्यं** द्वितीयः सर्गः सटीकः Name: Harivilâsa Kâvya, Canto 2nd, with a commentary.

पत्राणि १८, folios 18; पंक्तयः ९–१०, lines 9, 10 ; अक्षराणि २४–२६, letters 24, 26.

ग्रंथसंख्या २९७.

कर्ता, **लोलिंबराजः**. टीकाकारो, **यादवाकूतः**. Author, Lolimbarâja; Commentator, Yâdavâkûta.

आरंभः । नंदः स्वनंदनमवेक्ष्य वयोविशेषशोभायमानवपुषं बहुयुक्तियुक्तं ॥ वृंदावने बहुलबालतृणाभिरामे रामेण सार्द्धमव गास्तनयेत्यभाणीत् ॥ १ ॥ ततः पुरस्कृत्य समग्रगोधनं कलिंदकन्यातटकाननस्थलीं ॥ प्रभातकाले सखिसंघसंवृतः समाजगामागमदुर्गमो हरिः ॥ २ ॥

टीकारंभः । नंदयति आनंदयतीति नंदनः स्वस्य नंदनस्तमवेक्ष्येत्यादि ॥

समाप्तिः । अलंकृते पुण्यपयःप्रवाहैर्विश्रांतिदानोद्यतवृक्षवर्गे ॥ सिद्धाश्रिते श्रीपतिचित्तवृत्तिस्तत्र प्रसादोदयमाससाद ॥ ४४ ॥ नानागुणैरिति स एव श्लोकः ॥ इतिश्रीम०लोलिंबराजविरचिते हरिविलासकाव्ये द्वितीयः सर्गः ॥ ॥

टीकासमाप्तिः । वृक्षाणां वर्गो यस्मिन् तस्मिन् सिद्धैः आश्रिते अधिष्ठिते ॥४४॥

नानागुणैरिति पूर्ववत् ॥४५॥ इति यादवाकूतविरचितायां हरिविलासटीकायां भावार्थदीपिकायां द्वितीयः सर्गः समाप्तः ॥

---

**No. 117, ग्रंथनाम हर्षचरितं, आख्यायिका.** Name: Harshacharita.

पत्राणि १९, folios 19; पंक्तयः १२, lines 12; अक्षराणि ३८, letters 38.
ग्रंथसंख्या ९४१.

कर्ता, बाणः. Author, Bâṇa.

आरंभः । हरकंठग्रहानंदमीलिताक्षीं नमाम्युमां ॥ कालकूटविषस्पर्शजातमूर्छागमामिव ॥ १ ॥ नमः सर्वविदे तस्मै व्यासाय कविवेधसे ॥ चक्रे पूर्णं सरस्वत्या यो वर्षमिव भारतम् ॥२॥ अग्रे कतिपयप्राचीनकविवर्णादिश्लोका विंशतिपर्यंताः ॥ ॥ जयति ज्वलत्प्रतापज्वलनप्राकारकृतजगद्रक्षः ॥ सकलप्रणिमनोरथसिद्धिः श्रीपर्वतो हर्षः ॥ २१ ॥ एवमनुश्रूयते ॥ पुरा किल भगवान् स्वर्लोकमधितिष्ठन् परमेष्ठी विकासिनि प्रविष्टरे समुपविष्टः

समाप्तिः । तेषु चैवमुत्पद्यमानेषु संसरति च संसारे यात्सु युगेष्ववतीर्णे कलौ वहत्सु वत्सरेषु व्रजत्सु वासरेष्वतिक्रामति काले प्रसवपरंपराभिरनवरतमापतति विकासिनि वात्स्यायनकुले क्रमेण कुबेरना [मा] वैनतेय इवोरुपक्षपीतद्विजो जन्म लेभे ॥ तस्याभवन्नच्युतईशानो हरः पाशुपत अग्रे ग्रंथः खंडितः

---

**No. 118, ग्रंथनाम हितोपदेशः** Name: Hitopadeśa.

पत्राणि ६८, folios 68; पंक्तयः १२, lines 12; अक्षराणि ४०, letters 40.
ग्रंथसंख्या २०३०.

आरंभः । मित्रलाभः सुहृद्भेदो विग्रहः संधिरेवच ॥ पंचतंत्रात्तथान्यस्माद्ग्रंथादाकृष्य लिख्यते ॥ १ ॥ सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः ॥ जान्हवीफेनलेखेव यन्मूर्ध्नि शशिनः कला ॥२॥ श्रुतो हितोपदेशोयं पाटवं संस्कृतोक्तिषु ॥ वाचां सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥ ३ ॥ अजरामरवत्प्राज्ञो विद्यामर्थं च चिंतयेत् ॥ गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ ४ ॥

समाप्तिः । संधिः सर्वमहीभुजां विजयिनामस्तु प्रमोदः सदा संतः संतु निरापदः सुकृतिनां कीर्तिश्चिरं वर्द्धताम् ॥ नीतिर्वारविलासिनीव सततं वक्षस्थले संस्थिता वक्त्रं चुंबतु मंत्रिणामहरहर्भूयान्महानुत्सवः ॥ १३८ ॥ ॥ इति हितोपदेशे संधिर्नामचतुर्थकथासंग्रहः ॥ ॥

No 119, ग्रंथनाम, प्राकृतव्याकरणम् Name : a Prâkrita Grammar.

पत्राणि ५, folios 5; पंक्तयः १८, lines 18; अक्षराणि ४४, letters 44.

ग्रंथसंख्या २४७.

शकः १७७९, Śaka 1779.

कर्ता, श्रीचंद्रः. Author, Śrîchandra.

आरंभः । प्रणम्य शिरसा वीरं स्वल्पैर्व्यापिभिरक्षरैः ॥ लक्षणं प्राकृतं वक्ष्ये किंचिद्वृद्धमतादहं ॥ १ ॥ क्वचिल्लोपः क्वचित्संधिः क्वचिद्वर्णविपर्ययः ॥ आगमांतादिमध्येषु लक्ष्यः स्यात्सुभाषितात् ॥ २ ॥ सिद्धं प्राकृतं त्रेधा ॥ सिद्धं प्रसिद्धं प्राकृतं त्रेधा भवति ॥ संस्कृतयोनि॰॥ तच्चेदं ॥ यज्ञः ॥ जण्णो ॥ मात्रा ॥मत्ता ॥ नित्यं ॥ णिच्चं ॥

समाप्तिः । तापः । तावो । कदं । कयं । पदं । पत्र्यं । सुदं । सुत्र्यं । ॥ संस्कृतं प्राकृतं चैवापभ्रंशोथ पिशाचिको ॥ मागधी सूरसेनी च षड्भाषाश्च प्रकीर्तिताः ॥ १ ॥ इति श्रीचंद्रकृतप्राकृतभाषांतरविधानं तूर्यं समाप्तम् ॥ ॥

---

No. 120, ग्रंथनाम, प्राकृतादिव्याकरणसूत्रवृत्तिः Name : Prâkritâdivyâkaranasûtravritti.

पत्राणि ७३, folios 73; पंक्तयः १२, lines 12; अक्षराणि १८, letters 18.

ग्रंथसंख्या २०८०.

शकः १७८८. Śaka 1788.

कर्ता, त्रिविक्रमदेवः Author, Trivikramadeva.

आरंभः ।श्रीवीरं प्राच्याचलसमुदितमखिलप्रकाशकं वंदे॥ दिव्यध्वनिपटुदीधितिमहमक्षरप्राप्तये ॥ १ ॥ श्रुतभर्तुरर्हनंदित्रैविद्यगुरोः पदांबुजभ्रमरः ॥ श्रीबाणसुकुलकमलद्युमणेरादित्यवर्मणः पौत्रः ॥ २ ॥ श्रीमल्लिनाथपुत्रो लक्ष्मीगर्भामृतांबुधिसुधांशुः ॥ वामस्य वृत्तविद्याधाम्नो भ्राता त्रिविक्रमः सुकविः ॥ ३ ॥ अग्रे ग्रंथप्रस्तावनादिश्लोकाः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ सिद्धिर्लोकाच्च ॥ सिद्धिरिहप्रस्तुतप्राकृतशब्दार्थसंबंधिनी गृह्यते सा च लोकात् भवति ॥

समाप्तिः । झाडंगारक्त देश्याः सिद्धाः ॥ झाडादयः शब्दाः देश्याः देशविशेषव्यवहारादुपलभ्यमानाः सिद्धाः निष्पन्नाः प्रसिद्धावा वेदितव्याः ॥ झाडं॥ लतादिगहनं ॥ गोपिसमंपाति स्प्राबालाइत्यादि ॥ सिद्धशब्दो ग्रंथांते मंगलार्थः ॥ ॥ इतिश्रीत्रिविक्रमदेवविरचितप्राकृतव्याकरणसूत्रवृत्तौ तृतीयाध्यायस्य चतुर्थः पादः पूर्णः ॥ ॥

---

No. 121. ग्रंथनाम, **प्राकृतादिषड्भाषाव्याकरणम्** Name: A Grammar of the Prâkrita and five other languages.

पत्राणि ७४, folios 74; पंक्तयः १२, lines 12; अक्षराणि ४४, letters 44.
ग्रंथसंख्या १९००.
शकः १७८१. Śaka 1781.
कर्ता, **आचार्यहेमचंद्रः** Author, Âchârya Hemachandra.

आरंभः । प्रणम्य परमं ज्योतिर्ज्ञोतिताशेषवाङ्मयं ॥ सिद्धहेमाष्टमाध्यायरूपसिद्धिर्विधीयते ॥ १ ॥ अथ प्राकृतम् ॥ अथशब्द आनंतर्यार्थोऽधिकारार्थश्च ॥ प्रकृतिः संस्कृतं तत्र भवं तत आगतं वा प्राकृतम् ॥

समाप्तिः । एवं सिरोसिरम्मिसिरासि ॥ सरोसरम्मि सरासि ॥ सिद्धग्रहणं मंगलार्थम् ॥ ततो हि आयुष्मच्छ्रातृकता अभ्युदयश्चेति ॥ इत्यपभ्रंशभाषा ॥ ॥ इत्याचार्यश्रीमद्धेमचंद्रविरचितायां सिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनवृत्तावष्टमाध्यायस्य चतुर्थः पादः ॥ ॥

---

No. 122. ग्रंथनाम, **अनेकार्थध्वनिमंजरी.** Name, Anekârtha-dhvani-Mañjarî.

पत्राणि १९, folios 19; पंक्तयः ९, lines 9; अक्षराणि २०, letters 20.

आरंभः । शुद्धवर्णमनेकार्थं शब्दमौक्तिकमुत्तमम् ॥ कंठे कुर्वंतु विद्वांसः श्रद्दधाना अहर्निशम् ॥ १ ॥ शब्दांभोधिर्धर्षतोनतः कुतोर्थागमसंभवः ॥ स्वानुबोधिकमानाय तस्मै वागात्मने नमः ॥ २ ॥ सरस्वत्याः प्रसादेन कविर्बध्नाति यत्पदं ॥ प्रसिद्धमप्रसिद्धं वा तत्प्रमाणं च साधु च ॥ ३ ॥ अथ शिवशब्दः शिवं भद्रं शिवः शंभुः शिवा गौरी ( शिवो वसुः ) शिवाभयेतिपाठः ॥ शिवो कीलः शिवा क्रोष्ट्री भवेदामलकी शिवा ॥ ४ ॥

समाप्तिः । ध्रुवौनिश्चितनित्ययोः ॥ संघाते पूरणे पूरः ॥ शूराः शूरनरेश्वरा सुकरःकोमले काव्ये ॥ सुमयो समसोमयोः ॥ इत्यनेकार्थध्वनिमंजर्यां चरणश्लोकाधिकारस्तृतीयः ॥ ॥ इति अनेकार्थध्वनिमंजरी समाप्ता ॥ ॥

**No 119,** ग्रंथनाम, **प्राकृतव्याकरणम्** Name: a Prâkrita Grammar.

पत्राणि ५, folios 5; पंक्तयः १८, lines 18; अक्षराणि ४४, letters 44.

ग्रंथसंख्या २४७.

शकः १७७९, Śaka 1779.

कर्ता, **श्रीचंद्रः**. Author, Srîchandra.

आरंभः। प्रणम्य शिरसा वीरं स्वल्पैर्व्यापिभिरक्षरैः॥ लक्षणं प्राकृतं वक्ष्ये किंचिद्वृद्धमतादहं॥ १॥ क्वचिल्लोपः क्वचित्संधिःक्वचिद्वर्णविपर्ययः॥ आगमांतादिमध्येषु लक्ष्यः स्यात्सुभाषितात्॥ २॥ सिद्धं प्राकृतं त्रेधा॥ सिद्धं प्रसिद्धं प्राकृतं त्रेधा भवति॥ संस्कृतयोनिः॥ तच्चेदं॥ यज्ञः॥ जण्णो॥ मात्रा॥मत्ता॥ नित्यं॥ णिच्चं॥

समाप्तिः। तापः। तावो। कदं। कयं। पदं। पत्र्यं। सुदं। सुत्र्यं। ॥ संस्कृतं प्राकृतं चैवापभ्रंशोथ पिशाचिकी॥ मागधी सूरसेनी च षड्भाषाश्च प्रकीर्तिताः॥ १॥ इति श्रीचंद्रकृतप्राकृतभाषांतरविधानं तूर्यं समाप्तम्॥ ॥

---

**No. 120,** ग्रंथनाम, **प्राकृतादिव्याकरणसूत्रवृत्तिः** Name: Prâkritâdivyâkaraṇasûtravritti.

पत्राणि ७३, folios 73; पंक्तयः १२, lines 12; अक्षराणि १८, letters 18.

ग्रंथसंख्या २०८०.

शकः १७८८. Śaka 1788.

कर्ता, **त्रिविक्रमदेवः** Author, Trivikramadeva.

आरंभः।श्रीवीरं प्राच्याचलसमुदितमखिलप्रकाशकं वंदे॥ दिव्यध्वनिपटुदीधितिमहमक्षरप्राप्तये॥ १॥ श्रुतभर्तुरर्हनंदित्रैविद्यगुरोः पदांबुजभ्रमरः॥ श्रीबाणसुकुलकमलद्युमणेरादित्यवर्मणः पौत्रः॥ २॥ श्रीमल्लिनाथपुत्रो लक्ष्मीगर्भामृतांबुधिसुधांशुः॥ वामस्य वृत्तविद्याधाम्नो भ्राता त्रिविक्रमः सुकविः॥ ३॥ अग्रे ग्रंथप्रस्तावनादिश्लोकाः॥ ४॥ ५॥ ६॥ ७॥ ८॥ ९॥ १०॥ ११॥ सिद्धिर्लोकाच्च॥ सिद्धिरिहप्रस्तुतप्राकृतशब्दार्थसंबंधिनी गृह्यते सा च लोकात् भवति॥

समाप्तिः । झाडगास्क देश्याः सिद्धाः ॥ झाडादयः शब्दाः देश्याः देशाविशेषव्यवहारादुपलभ्यमानाः सिद्धाः निष्पन्नाः प्रसिद्धावा वेदितव्याः ॥ झाडं॥ लतादिगहनं ॥ गोपिसमंपाति ऽप्राबालाइत्यादि ॥ सिद्धशब्दो ग्रंथांते मंगलार्थः ॥ ॥ इतिश्रीत्रिविक्रमदेवविरचितप्राकृतव्याकरणसूत्रवृत्तौ तृतीयाध्यायस्य चतुर्थः पादः पूर्णः ॥ ॥

---

No. 121. ग्रंथनाम, **प्राकृतादिषड्भाषाव्याकरणम्** Name : A Grammar of the Prâkṛita and five other languages.

पत्राणि ७४, folios 74; पंक्तयः १२, lines 12; अक्षराणि ४४, letters 44.
ग्रंथसंख्या १९००.
शकः १७८१. Śaka 1781.
कर्ता, **आचार्यहेमचंद्र**: Author, Âchârya Hemachandra.

आरंभः । प्रणम्य परमं ज्योतिर्व्यातिताशेषवाङ्मयं ॥ सिद्धहेमाष्टमाध्यायरूपसिद्धिर्विधीयते ॥ १ ॥ अथ प्राकृतम् ॥ अथशब्द आनंतर्यार्थोधिकारार्थश्च ॥ प्रकातिः संस्कृतं तत्र भवं तुत आगतं वा प्राकृतम् ॥

समाप्तिः । एवं सिरोसिरम्मिसिरासि ॥ सरोसरम्मि सरासि ॥ सिद्धग्रहणं मंगलार्थम् ॥ ततो हि आयुष्मच्छातृकता अभ्युदयश्चेति ॥ इत्यपभ्रंशभाषा ॥ ॥ इत्याचार्यश्रीमद्धेमचंद्रविरचितायां सिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनवृत्तावष्टमाध्यायस्य चतुर्थः पादः ॥ ॥

---

No. 122. ग्रंथनाम, **अनेकार्थध्वनिमंजरी.** Name, Anekârtha-dhvani-Mañjarî.

पत्राणि १९, folios 19; पंक्तयः ९, lines 9; अक्षराणि २०, letters 20.

आरंभः । शुद्धवर्णमनेकार्थं शब्दमौक्तिकमुत्तमम् ॥ कंठे कुर्वंतु विद्वांसः श्रद्दधाना अहर्निशम् ॥ १ ॥ शब्दांभोधिर्घर्षतोनतः कुतोर्थागमसंभवः ॥ स्वानुबेधिकमानाय तस्मै वागात्मने नमः ॥ २ ॥ सरस्वत्याः प्रसादेन कविर्बध्नाति यत्पदं ॥ प्रसिद्धमप्रसिद्धं वा तत्प्रमाणं च साधु च ॥ ३ ॥ अथ शिवशब्दः शिवं भद्रं शिवः शंभुः शिवा गौरी ( शिवो वसुः ) शिवाभयेतिपाठः ॥ शिवो कीलः शिवा क्रोष्ट्री भवेदामलकी शिवा ॥ ४ ॥

समाप्तिः । ध्रुवौनिश्चितनित्ययोः ॥ संघाते पूरणे पूरः ॥ शूराः शूरनरेश्वरा सुकरःकोमले काव्ये ॥ सुमयो समसोमयोः ॥ इत्यनेकार्थध्वनिमंजर्यां चरणश्लोकाधिकारस्तृतीयः ॥ ॥ इति अनेकार्थध्वनिमंजरी समाप्ता ॥ ॥

**No. 123.** ग्रंथनाम, **अभिधानचिंतामणिनाममाला.** Name : The Nâma-mâlâ, a portion of the Abhidhâna Chintâmaṇi.

पत्राणि ४५, folios 45 ; पंक्तयः १३, lines 13 ; अक्षराणि ४९, letters 49.

ग्रंथसंख्या १८००.

कर्ता, **आचार्यः श्रीहेमचंद्रः** Author, Śrî Hemachandra.

आरंभः । प्रणिपत्यार्हतःसिद्धसांगशब्दानुशासिनः ॥ रूढयौगिकमिश्राणां नाम्ना मालां तनोम्यहं ॥ १ ॥ व्युत्पत्तिरहिताः शब्दा रूढा आखंडलादयः ॥ योगोन्वयः स तु गुणक्रियासंबंधसंभवः ॥ २ ॥ गुणतो नीलकंठाद्याः क्रियातःस्रष्टृसन्निभाः ॥ स्वस्वामित्वादिसंबंधस्तत्राहुर्नाम तद्गतं ॥ ३ ॥ स्वात्मालधनभुग्नेतृपतिमन्वर्थकादयः ॥ भूपालो भूधनो भूभुक् भूनेताभूपतिस्तथा ॥ ४ ॥

समाप्तिः । ननु च स्याद्विरोधोक्तौ पक्षांतरे तु चिद्यदि ॥ शनैर्मंदे वरेत्ववर्षाकुरोषोक्तावंततो नमः ॥ १७८ ॥ ॥ इत्याचार्यश्रीहेमचंद्रविरचितायामभिधानचिंतामणौ नाममालायां सामान्यकांडः षष्ठः ॥ ६ ॥ ॥ अपरमपि पुस्तकमस्ति तस्य पत्राणि ९१

---

**No. 124.** ग्रंथनाम, **अभिधानचिंतामणिनाममालायाः टीका.** Name: A commentary on the Nâma-mâlâ, a portion of the Abhidhâna-Chintâmaṇi.

पत्राणि २०४, folios 204; पंक्तयः १५, lines 15; अक्षराणि ५२, letters 52.

ग्रंथसंख्या ९९८७.

संवत् १६७०. Samvat 1670.

कर्ता, **आचार्यश्रीहेमचंद्रः** Author, Śrî Hemachandra.

आरंभः । धर्मतीर्थिकृतां वाचं नत्वातत्वाभिधायिनीं ॥ स्वोपज्ञनाममालाया विवृतिं विदधाम्यहम् ॥ १ ॥ श्रेयोर्थमयमारंभः किंतत्रात्मविकत्थनैः ॥ परात्मनिंदास्तोत्रे हि नाद्रियंतेमनीषिणः ॥ २ ॥ प्रामाण्यं वासुकेर्व्याडेर्व्युत्पत्तिर्धनपालतः ॥ प्रपंचश्च वाचस्पतिप्रभृतेरिहलक्ष्यताम् ॥३ ॥ प्रणिपत्येत्यादिमश्लोकः ॥ प्रणिपत्यार्हत इति मंगलार्थम् ॥

समाप्तिः । अव्ययानामनंतत्वाद्दिङ्मात्रमिदं प्रदर्शितम् ॥ यदाहुः ॥ इयंत इति संख्यानं निपातानां न विद्यते ॥ प्रयोजनवशादेते निपात्यंते पदे पदे इति ॥ ॥ ॥ इत्याचार्यश्रीहेमचंद्रविरचितायां स्वोपज्ञाभिधानचिंतामणिनाममालाटीकायां सामान्यकांडः षष्ठः समाप्तः ॥ ॥

**No. 125.** ग्रंथनाम, **अभिधानरत्नमाला हलायुधनाम्ना प्रसिद्धा.** Name: Abhidhâna-ratna-mâlâ *alias* Halâyudha.

पत्राणि ७९, folios 79; पंक्तयः ८, lines 8; अक्षराणि ३०, letters 30. शकः १७९६.

कर्ता, **भट्टहलायुधः** Author, Bhatta Halâyudha.

आरंभः। शब्दब्रह्म यदेकं यच्चैतन्यं च सर्वभूतानां ॥ यत्परिणामस्त्रिभुवनमखिलमिदं जयति सा वाणी ॥ १ ॥ इयममरदत्तवररुचिभागुरिवोपालितादिस्तृभ्यः ॥ अभिधानरत्नमाला कविकंठविभूषणार्थमु(च्छ्रि)यते॥ २ ॥ स्वर्गनाम ।॥ स्वः स्वर्गः सुरसद्मत्रिदशावासस्त्रिविष्टपं त्रिदिवम्

समाप्तिः । स्वस्तिनाम ॥ स्वस्ति स्यान्मंगलादिषु ॥ इतिनाम ॥ इतिशब्दः स्मृतो हेतौ प्रकारादिसमाप्तिषु ॥ ॥ इति श्रीभट्टहलायुधकृतायामभिधानरत्नमालायामनेकार्थकांडं समाप्तम् ॥ ॥

---

**No. 126.** ग्रंथनाम, **अमरकोशस्य लिंगणभट्टी टीका** Name: Limganabhatta's Commentary on the Amarakosa.

पत्राणि प्र० कांडस्य ५१, द्वि० कांडस्य ५८, तृ० कांडस्य ८: folios, 1st canto, 51; 2nd canto, 58; 3rd canto, 8; पंक्तयः ११, lines 11; अक्षराणि ३६, letters 36.

कर्ता, **लिंगणभट्टः**. Author, Limganabhatta.

आरंभः। पापपर्वतकोटीनां शतकोटिं भजामहे ॥ मस्करिस्तोमसर्वस्वं मंत्रकूटं तपस्विनम् ॥ १ ॥ शिवं हरिं विधातारं तत्वतस्तत्सुतान् गुरून् ॥ नत्वा समस्तप्रत्यूहशांतये मंगलाय च ॥ २ ॥ पदवाक्यप्रमाणज्ञः क्षीरस्वाम्यादिसूरिभिः ॥ कृतान् ग्रंथान् समालोक्य बालानां सुखबुद्धये ॥ ३ ॥ यत्कृतं सुरसिंहेन नामलिंगानुशासनं ॥ तत्रस्थानां पदानां च व्यावृत्तिर्वक्ष्यते मया ॥ ४ ॥ यस्येति ॥ हे धीराः विद्वांसः ।

समाप्तिः । उक्तमित्यस्यार्थः ॥ सनाम्यकं नाम्यवर्गेण सहितम् ॥ स्वश्च व्योम च दिक च कालश्च धीश्च शब्दश्च आदिशब्देन एतद्धर्मसंगतं देवासुरदिश्यदिगीश्वरादिकं गृह्यते ॥ पातालं च भोगि च नरकश्च वारि च तेषां वर्गाणां संगतं कुहरादिकं तत्तद्वर्गांतर्भावि चोक्तमित्यर्थः ॥ ॥ इति लिंगणभट्टसूरिविरचितायाममरकोशपदविवृतौ प्रथमं कांडं समाप्तम् ॥ ॥ एवं द्वितीयम् ॥ तृतीयं त्रुटितम् ।

**No. 127**. ग्रंथनाम, **एकाक्षरनिघंटुः** Name: Ekâkshara-nighaṇṭu.

पत्राणि ४, folios 4; पंक्तयः ९, lines 9; अक्षराणि ३२, letters 32.

कर्ता, **भास्करः** Author, Bhâskara.

आरंभः। अकारो ब्रह्मविष्ण्वीश कमलेशगणे रणे ॥ गोखंडेतःपुरे हतौ भूषणेंध्राविभेज्ययोः ॥ १ ॥ आकारस्तु घटे भावे परितापे पितामहे ॥

समाप्तिः। अप्राचुर्यात्प्रयोगस्य लिंगं क्वचिदुपस्थितं ॥ एकाक्षरेषु शब्देषु तद्बुध्यं लक्ष्यवेदिभिः ॥ ७६ ॥ इति जगदुपकारिण्यां भास्करविबुधेन संगृहीतायामेकाक्षरकांडोयं पूर्णो नानार्थरत्नमालायाम् ॥ ७७ ॥ ॥ इति श्री भास्करसूरिविरचित एकाक्षरनिघंटुः समाप्तः ॥ ॥

---

**No. 128.** ग्रंथनाम, **द्विरूपकोश** : Name: Dvirûpa-kośa.

पत्राणि १८, folios 18; पंक्तयः ११, lines 11; अक्षराणि ३४, letters 34.

शक : १७७६ Śaka 1776.

कर्ता, **महेश्वरः**. Author, Maheśvara.

आरंभः। रामानलव्योमभवैः शककालेभिलक्षिते ॥ कोशं विश्वप्रकाशाख्यं निरमात्थ महेश्वरः ॥ १ ॥ प्रबोधमाधातुमशाद्विकानां कृपामुपेत्यापि सतां कवीनां ॥ कृतो माया रूप --- शब्दभेदप्रकाशोऽखिलवाक्यबोधे ॥ २ ॥ प्रायो भवेद्यः प्रचुरप्रयोगः प्रामाणिकोदाहरणप्रतीतः ॥ रूपादिभेदेषु विलक्षणेषु विचक्षणो निश्चितुवातमेव ॥ ३ ॥ क्वचिन्मात्राकृतो भेदः क्वचिद्वर्णकृतोत्र वा ॥ क्वचिद्व्ययर्यातरालेखाशब्दानामुदितः क्वचित् ॥ १४ ॥

समाप्तिः। इदडेल्पाक्षरं द्वंद्वं स्तोत्रं चेद्भेदकं क्वचित् ॥ ३० ॥ अयपयः हनूकूर्वीदित्यत्र पदद्वयम् ॥ ॥ इति विश्वप्रकाशस्य द्विरूपकोशः समाप्तः ॥ ॥

---

**No. 129**. ग्रंथनाम, **नाममाला**. Name: Nâma-mâlâ.

पत्राणि १७, folios 17; पंक्तयः १३, lines 13; अक्षराणि ४०, letters 40.

शक : १७७४: Śaka 1774.

कर्ता, **पाठकहर्षकीर्तिः**. Author, Pâṭhakaharshakîrti.

आरंभः। प्रणम्य परमात्मानं सच्चिदानंदमीश्वरं ॥ गृह्णाम्यहं नाममालां मालामिव मनोरमाम् ॥ १ ॥ वाग्देवी शारदा ब्राह्मी भारती गीः सरस्वती ॥ हंसयाना ब्रह्मपुत्री सा सदा वरदास्तु नः ॥ २ ॥

समाप्तिः। ब्रह्मक्षत्रियविट्शूद्रसंकीर्णाख्यैर्मनोरमैः ॥ वर्गैस्तृतीयः कांडोयं परितो हर्षकीर्तिना ॥ ६३ ॥ इति संकीर्णवर्गः ॥ ॥ श्रीमन्नागपुरे कणा-

द्रयतमागच्छाधिपासज्जयः सूरिश्रीप्रभुचंद्रकीर्तिगुरवस्तेषां पदातिग्रहात् ॥ भूयो भिक्षुजनोचितां लघुतरां श्रीनाममालामिमां चक्रे पाठकहर्षकीर्तिरखिलां श्वेतांबरग्रामणीः ॥ १ ॥ २ ॥ ॥ इति नाममाला समाप्ता ॥ ॥

---

**No. 130.** ग्रंथनाम, **महीपकोशः शब्दरत्नाकरइत्यपरं नाम.** Name: Mahîpa-kośa *alias* Śabda-ratnâkara.

पत्राणि ४२, folios 42; पंक्तयः १४, lines 14; अक्षराणि ४०, letters 40. संवत् १४९३

कर्ता, **सचिवमहीपः**. Author, Sachivamahîpa.

आरंभः । सानंदं नादिदेवेशकंकणाद्यैः स्तुतानया ॥ करोतु श्रुतदेवी वः सा शिवानि दिवानिशम् ॥ १ ॥ वर्गमिश्रैः स्फुटं कांडैः सांगं शास्त्रविदां श्रिये ॥ शब्दरत्नाकरं त्वंताथादियोगात्तनोम्यहम् ॥ २ ॥ साधर्म्याद्रूपभेदाच्च कचित्स्त्रीपुंनपुंसकं ॥ न द्वंद्वो यत्र तज्ज्ञेयं भिन्नलिंगं स्वरूढित : ॥ ३ ॥ स्वर्गः स्वरव्ययंनाकस्त्रिदिवोस्त्रीत्रिविष्टपम्

समाप्तिः । द्योगते ऽ नागतेन्हि श्वः स्यादेवमवधारणे ॥ अव्ययवर्ग : ॥ संकीर्णैरव्ययैर्वर्गौ सामान्ये समुदीरितौ ॥ १४ ॥ पाणिन्यमरहेमादिशास्त्रेभ्यः शब्दसंग्रहम् ॥ सन् महीपः समतनोत्प्राग्वाटनरपुंगवः ॥ १५ ॥ ॥ इति सचिवमहीपकृतौ महीपकोशनाम्नि शब्दरत्नाकरे सामान्यकांडश्चतुर्थः संपूर्णः ॥ ॥

---

**No. 131.** ग्रंथनाम, **राजव्यवहारकोशः** Name: Râjavyavahâra-kośa.

पत्राणि १८, folios 18; पंक्तयः ११, lines 11; अक्षराणि ३४, letters 34. शक : १७७६ : Śaka 1776.

कर्ता, **रघुनाथपंडितः** Author, Raghunâthpandita.

आरंभः । राजा ज्ञेयः पातशाहः स्वामी साहेब ईरितः ॥ अंतःपुरं तु दरुनीग्राहुर्यवनभाषया ॥ १ ॥ युवराजा परिज्ञेयो वलीहदनामकः ॥ शाहाजादा राजपुत्रः प्रधानः पेशवा तथा ॥ २ ॥ अमात्यः स्यान्मुजुमदारः सेनाकर्ता हुकूमतः प्रवीणस्तु डबीरः स्यात् सुर्निसः सचिवस्तथा ॥ ३ ॥ वाकेनिसोपि मंत्रीस्यान्न्यायाधीशो प्यदालतः ॥ कार्मुकी तु सुमंतः स्यात्सभा तु स्यान्मजालसी ॥ ४ ॥

समाप्तिः । हणंबारो गोपतिः स्याद्दासीवादिति शब्दित : ॥ डिंडीरवस्तु धांडोरा ढालस्यादापणध्वजः ॥ १९ ॥ ॥ इति श्रीशिवच्छत्रपतिप्रियामात्येन नारायणाध्वरिसूनुना रघुनाथपंडितेन शिवराजनियोगतः कृते राजव्यवहारकोशे पण्यवर्गो नाम दशमः समाप्तः ॥ ॥

**No. 132.** ग्रंथनाम, **शब्दप्रकाशः द्विरूपः** Name: Śabda-prakâśa.
पत्राणि १९, folios 19; पंक्तयः १०, lines 10; अक्षराणि ३२, letters 32.

आरंभः। प्रबोधमाधातुमशाब्दिकानां कृपामुपेत्यापि सतां कवीनां ॥ कृतो मया रूपमवाप्य शब्दभेदप्रकाशोऽखिलवाङ्मयाब्धेः ॥ १ ॥ परिभाषाग्रे ॥ २ ॥ ३ ॥ ४ ॥ विद्यादगारमागारमपगामापगामपि ॥ अरातिमारातिमथो अमआमश्च कीर्तितः ॥ २ ॥ इत्यादिः

समाप्तिः। कर्तुं चेतश्चमत्कारं सतां हर्तुं विपर्ययं ॥ संशयं च निराकर्तुमयमस्मत्परिश्रमः ॥ ७६ ॥ छंदोनुप्रासयमकश्लेषाचित्रेषु निर्णयः ॥ एष्वेवास्योपयोगश्च कथितुं जानतोपि वां ॥ ७७ ॥ ॥ इतिशब्दप्रकाशः समाप्तः ॥ पंचत्रिंशान्वितशतात्रेयश्लोकसंग्रहः ॥ अनुष्टुप्जातिसंदृब्धो लोके श्लोककरः कवेः ॥ १ ॥

---

**No. 133.** ग्रंथनाम, **एकावली टीका च तरलाख्या**: Name: Ekâvalî, with a commentary entitled the Taralâ.

पत्राणि ११९, folios 119; पंक्तयः १३, lines 13; अक्षराणि ५२, letters 52.
शकः १७३६. Śaka 1736.
कर्ता, **विद्याधरः** Author, Vidyâdhara; टीकाकरो **मल्लिनाथः** Commentator, Mallinâtha.

आरंभः। प्रालेयाचलकन्यकाकुचतटीपत्रावलीशिल्पिनः प्रेंखद्भालविलोचनानलशिखानिष्पीतचेतो भुवः ॥ देवस्येंदुविभूषणस्य सुचिरं पादारविंदद्वयं युष्मान् पातु सुरासुरेश्वरशिरोरत्नांशुकिंजल्कितं ॥ १ ॥ ननु नमस्कारात्मकं कर्म तत्किं शास्त्रस्यांगमिति प्रथमत एव क्रियते प्रधानमिति वा इत्यादिः

टीकारंभः। अग्रे कृत्वा प्रियसहचरीमंतिके संप्रयांतीं व्रीडाभारादवनतमुखीमंबिकावल्लभो वः॥ लोलापांगां प्रणयमधुरं लोचनांतेन पश्यन्नंतस्तुष्यन्नवतु भगवानंबिकावल्लभो वः॥ १ ॥ २ ॥ ३ ॥ ४ ॥ मल्लिनाथः कविः सोयमेकावल्यामलंकृतौ॥ टीकारत्नं निबध्नाति तरलं नामनामतः ॥ ५ ॥ एकावली गुणवतीयमलंक्रियापि यद्वैशसादजनिकोशगृहेषु गुप्ता ॥ तेनोज्वलेन तरलेन समेत्य धन्यैः कंठेषु चाप्यहृदयेषु च धीयतां सा ॥ ६ ॥ शास्त्रारंभे शिष्टाचारं प्रमाणयन्नित्यादिः

समाप्तिः। प्रतिभटकांताकुचतटमकरीलुंटाकचापटंकारः ॥ वीरनृसिंहइवाजौ वीरनृसिंहश्चिरं जयति ॥ १ ॥ अत्र लाटानुप्रासेन सहानन्वयस्यैकवाचकानुप्रवेशो न

संकरः ॥ ॥ इति श्रीमतो विद्याधरस्य कृतौ एकावलीनामन्यलंकारशास्त्रेऽर्थालं-
कारनिरूपणं नामाष्टम उन्मेषः ॥ ८ ॥ ॥

॥ समाप्तोयं ग्रंथः ॥

टीकांतः । इह वीरनृसिंह इत्येकस्मिन्वाचकेऽनन्वये लाटानुप्रासलुप्तोपमयोर-
नुप्रवेशादेकवाचकानुप्रवेशलक्षणः संकरोयमित्याह ॥ अत्रेति संकरः ॥ जगति
विविधविद्यासिंधुमुष्टिंधयानां वरभणितिपरीक्षा युज्यते सज्जनानां ॥ तदिह मम
निबंधे दूषणं भूषणं वा भवति यदि विदग्धैस्तद्ध्रुवश्यं विमृश्यं ॥ १ ॥ पारीणाः
पदसागरस्य कतिचित्तंत्रे स्वतंत्राः परे केचित्कर्कशतास (?) वक्रभणितिप्रौढिप्रियं-
भावुकाः ॥ अन्ये सत्कवितामृताब्धिलहरीमृष्टांशमुष्टिंधया नैते केपि वयं तु किंतु
त इमे सर्वे बहूकुर्वते ॥ २ ॥ ॥ इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपा-
ध्यायकोलाचलमल्लिनाथसूरिविरचितायामेकावलीव्याख्यायां तरलाख्यायामर्थालं-
कारनिरूपणं नामाष्टम उन्मेषः ॥ ॥

---

**No. 134.** ग्रंथनाम, **कविकल्पलता.** Name: Kavi-kalpa-latâ.

पत्राणि ५५, folios 55; पंक्तयः १२, lines 12; अक्षराणि ३६, letters 36.

ग्रंथसंख्या, १४८९.

संवत्, १७४६. Samvat, 1746.

कर्ता, देवेश्वरः. Author, Deveśvara.

आरंभः । गंगावारिभिरुक्षिताः फणिफणैरुत्पल्लवास्तच्छिखारत्नैः कोरकिताः सु-
धांशुकलया स्मेरैकपुष्पश्रियः ॥ आनंदाश्रुपरिप्लुताक्षिहुतभुग्धूमैर्मिलद्दोहदा नाल्पं
कल्पलताः फलं ददतु वोभीष्टं जटा धूर्जटेः ॥ १ ॥ मालवेंद्रमहामात्यश्रीमद्वा-
ग्भटनंदनः ॥ देवेश्वरः प्रतनुते कविकल्पलतामिमां ॥ २ ॥ प्रतिभाभाविता-
त्मानः कवित्वं के न कुर्वते ॥ अन्यत्र कविताधानकुशला विरलाः पुनः ॥ ३ ॥
यदन्यैर्वेलनक्षुण्णं तत्र संचरतो मम ॥ पदे पदे प्रस्खलतः संतः संत्ववलंबनं ॥४॥
कविशिक्षाशतं वीक्ष्य कवींद्रानुपजीव्य च ॥ निबद्धेयं मया धीरास्त्वरितश्लोक-
सिद्धये ॥ ५ ॥ इत्यादिः ।

समाप्तिः । आविष्कृतो वसुमतीसुमतीश्वरेण देवेश्वरेण कविना कविनायकेन ॥
काव्यब्रमानसमुद्रे समुदेतु भूमा भूमाविहास्ति कविकल्पलतावतारः ॥ ७ ॥ ॥
इति श्रीकविकल्पलतायां चतुर्थस्तबके सप्तमं कुसुमं ॥ ॥

**No. 135.** ग्रंथनाम, **काव्यप्रकाशः कमलाकरीटीकासहितः.** Name: Kâvyaprakâśa, with a Commentary entitled the Kamalâkarî.

पत्राणि १९६, folios 196; पंक्तयः ११-१२; lines 11—12; अक्षराणि ६०, etters 60.

ग्रंथसंख्या ८२४०.

कर्ता, **मम्मटः**, टीकाकारः; **कमलाकरः.** Author, Mammaṭa; Commentator, Kamalâkara.

आरंभः । ग्रंथारंभे विघ्नविघाताय समुचितेष्टदेवतां ग्रंथकृत्परामृशति ॥ नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतंत्रां ॥ नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥ १ ॥ इत्यादिः ।

टीकारंभः । नत्वा गणेशं वाग्देवीं सांबं शंभुं च राघवं ॥ श्रीरामकृष्णपितरं नत्वोमाख्यां च मातरं ॥ १ ॥ नारायणात्मजश्रीमद्रामकृष्णात्मजः कृती ॥ काव्यप्रकाशगां व्याख्यां तनोति कमलाकरः ॥ २ ॥ काव्यप्रकाशे टिप्पण्यः सहस्रं संति यद्यपि ॥ ताभ्यस्त्वस्या विशेषो यः पंडितैः सोवधार्यतां ॥ ३ ॥ स्वकृतकारिका व्याचिख्यासुराद्यश्लोकस्य अवतारिकामाह ॥ ग्रंथेति ॥ एकार्थको वाक्यसंदर्भो ग्रंथ इत्यादिः ।

समाप्तिः । संपूर्णमिदं काव्यलक्षणं ॥ इत्येष मार्गो विदुषां विभिन्नोप्यभिन्नरूपः प्रतिभासते यत् ॥ न तद्विचित्रं यदमुत्र सम्यग्विनिर्मिता संघटनैव हेतुः ॥ १ ॥ इति काव्यप्रकाशेऽर्थालंकारनिर्णयो नाम दशम उल्लासः ॥ ॥

टीकांतः । इतीति ॥ विदुषां ध्वनिकृद्वामनादीनां भिन्नोपि मार्गः अविरोधेन यत्संगृहीतः यत्प्रतिभासते तत्र चित्रं यद्यस्मादमुत्र ग्रंथे संघटना संग्रहेण संदर्भ एव हेतुः कृता सर्वसंग्रहार्थोयं ग्रंथः अतो न तैः सिद्धिरित्यर्थः ॥ ॥ गुणिनोनंतपुत्रस्य विनोदाय सतां मुदे ॥ कमलाकरसंज्ञेन श्रम एष विनिर्मितः ॥ १ ॥ अग्रे स्वस्य तर्कादिशास्त्रप्रावीण्यबोधक एकः श्लोकः ॥ २ ॥ ततः स्ववंशश्लोकः ॥ ३ ॥ ४ ॥ ॥ इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणजगद्गुरुश्रीमद्रामेश्वरभट्टसूरिसूनुनारायणभट्टसुतविद्वन्मुकुटहीरांकुरश्रीरामकृष्णभट्टसुतमहामहोपाध्यायश्रीकमलाकरभट्टकृतायां काव्यप्रकाशव्याख्यायां दशमोल्लासः ॥ ॥

---

**No. 136.** ग्रंथनाम, **जयरामी टीका काव्यप्रकाशस्य.** Name: Jayarâmî, a Commentary on the Kâvya-prakâśa.

पत्राणि १४९, folios 149; पंक्तयः १०, lines 10; अक्षराणि ६८, letters 68.

**कर्ता, जयरामभट्टाचार्यः.** Author, Jayarâma-Bhaṭṭâchârya.

आरंभः । श्रीजयरामः सुकृती नत्वा शंभोः पदांभोजे ॥ काव्यप्रकाशटीकां तनुते विद्वद्विनोदाय ॥ १ ॥ समीहितकर्मारंभे कार्ये शिष्टाचारपरंपरायातं मंगलं ग्रंथकृत् आचरितवाननुपनिबद्धवांश्च व्याख्यातृश्रोतृणामनुषंगतोपि मंगलसंपत्तये ॥ तथा कृतमपि हि मंगलं विघ्नं विनाशयति । हरिर्हरति पापानि दुष्टचित्तैरपि स्मृत इति स्मृतेः ॥ अत एव वृत्तिकृदपि तन्निबद्धश्लोकमवतारयति ॥ ग्रंथेत्यादिः ।

समाप्तिः । संदानितकादिषु वाक्यसमासैर्न नैकव्यमिति तत्र मध्यदीर्घसमासे एव संघटने त्रिष्वेव प्रबंधगतेषु तद्गतमौचित्यं ॥ एवमन्यदप्यूह्यं ॥ ॥ इति श्रीजयरामेण कृते काव्यप्रकाशव्याख्याने अष्टमोल्लासः ॥ ॥

---

**No. 137. ग्रंथनाम, काव्यप्रदीपः.** Name: **Kâvya-pradîpa.**

पत्राणि २४७, folios 247; अक्षराणि ४०, letters 40.

संवत् १८३६. Saṁvat 1836.

**कर्ता, महोपाध्यायो गोविंदः.** Author, Mahopâdhyâya Govinda.

आरंभः । सोनोदेव्याः प्रथमतनयः केशवस्यात्मजन्मा श्रीगोविंदो रु[चि]करकवेः स्नेहपात्रं कनीयान् ॥ श्रीमन्नारायणचरणयोः सम्यगाधाय चित्तं नत्वा सारस्वतमपि महः काव्यतत्वं व्यनक्ति ॥ १ ॥ वचनसंदर्भविशेषरूपस्य ग्रंथस्य प्रारिप्सितत्वेन स्तोतुमुचितायाः सेव्यमानायाश्च वाग्देव्या आस्पदभूतां कविभारतीं तदभिन्नत्वेनाध्यवसितां प्रारिप्सितप्रतिबंधकदुरितशांतये ग्रंथकृत् स्तौतीत्यादिः ॥

समाप्तिः ॥ तदेते अलंकारदोषा यथासंभवमन्येप्येवंजातीयकाः प्रोक्तजात्यंतर्भाविता इति पृथक् प्रतिपादनमर्हंतीति कल्याणमास्तां ॥ संपूर्णं काव्यलक्षणं ॥ ज्येष्ठे सर्वगुणैः कनीयसि वयोमात्रेण पात्रे धियां गात्रेण स्मरगर्वखर्वणपरे निष्ठाप्रतिष्ठाश्रये ॥ श्रीहर्षे त्रिदिवं गते मयि मनोहीने च कः शोधयेदत्राशुद्धमहो महत्सु विधिना भारोयमारोपितः ॥ १ ॥ परिशीलयंतु संतो मनसा संतोषशीलेन ॥ इममद्भुतं प्रदीपं प्रकाशमपि यः प्रकाशयति ॥ २ ॥ दीपिकाद्वितयं कन्ये प्रदीपद्वितयं सुतौ ॥ स्वमतौ सम्यगुत्पाद्य गोविंदः शर्म विंदति ॥ ३ ॥ ॥ इति श्रीमहामहोपाध्यायश्रीगोविंदविरचिते काव्यप्रदीपेऽर्थालंकारनिर्णयो नाम दशम उल्लासः ॥

**No. 138** ग्रंथनाम, **काव्यादर्शः.** Name: **Kâvyâdarśa.**

पत्राणि १८, folios 18; पंक्तयः १५, lines 15; अक्षराणि ४०, letters 40.

संवत् १७३२. Samvat 1732.

कर्ता, **आचार्यदंडी.** Author, Âchârya Daṇḍin.

आरंभः । चतुर्मुखमुखांभोजवनहंसवधूर्मम ॥ मानसे रमतां नित्यं शुक्लरूपा सरस्वती ॥ १ ॥ पूर्वशास्त्राणि संगृह्य प्रयोगानुपलक्ष्य च ॥ यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणं ॥ २ ॥

समाप्तिः । शब्दार्थालंक्रियाश्चित्रमार्गाः सुकरदुष्कराः ॥ गुणदोषाश्च काव्यानामिति संक्षिप्य दर्शिताः ॥८३॥ व्युत्पन्नबुद्धिरमुना विधिदर्शितेन मार्गेण दोषगुणयोर्वशवर्तिनीभिः ॥ वाग्भिः कृताभिसरणे मदिरेक्षणाभिर्धन्यो युवेव रमते लभते च कीर्तिं ॥ १८४ ॥ ॥ इत्याचार्यदंडिनः कृतौ काव्यादर्शे तृतीयः परिच्छेदः ॥

---

**No. 139.** ग्रंथनाम, **काव्यादर्शस्य टीका वैमल्यविधायिनी.** Name: Vaimalya-vidhâyinî, a Commentary on Kâvyâdarśa.

पत्राणि २३, folios 23; पंक्तयः १५, lines 15; अक्षराणि ४८, letters 48.

ग्रंथसंख्या १०३५.

संवत् १७३२. Samvat 1732.

कर्ता, **मल्लिनाथः.** Author, Mallinâtha.

टीकादिः । तत्र तावत् प्रथमपरिच्छेदे माधुर्यगुणाभिधानप्रस्तावे ॥ आवृत्तिमेव संघातगोचरां यमकं विदुः । तत्तु नैकांतमतः पुरतः पश्चाद्विधास्यते इति प्रतिज्ञातमवसरप्राप्तं यमकं तावदाह ॥ अव्यपेतेत्यादि ॥

टीकांतः । अदोषं गुणालंकारयोगि काव्यं कुर्वाणः पुण्यवान्—वान् यशस्वी च भवतीति शुभं ॥ १७८ ॥ भट्टश्रीमल्लिनाथेन कृतया टीकयानया ॥ विदुषामुपकाराय प्रीयतां देवकीसुतः ॥ १ ॥ ॥ इति भट्टजगन्नाथात्मजभट्टमल्लिनाथविरचितायां दंडिकाव्यादर्शटीकायां तृतीयः परिच्छेदः ॥ ॥ समाप्ता चेयं वैमल्यविधायिनी टीका ॥

---

**No. 140.** ग्रंथनाम, **कोविदानंदः कादंबिनीटीकया समेतः.** Name: Kovidânanda, with a Commentary entitled the Kâdambinî.

पत्राणि १३, folios 13; पंक्तयः १५, lines 15; अक्षराणि ३६, letters 36.

ग्रंथसंख्या ४३८.

शक: १७८३. Śaka 1783.

कर्ता, आशाधरभट्ट:. Author, Âśâdharabhaṭṭa.

आरंभ: । त्रिनयनलसत्पंचास्यश्रीः षडाननंदनः सततमहिमा सप्तर्ष्यार्घैः कृतस्तुतितोषितः ॥ जयति जगतां व्याकुर्वाणो जयाकृतिनामनी पुनरपि दधत्कंठे कालः स कालकलोज्झितः ॥ १ ॥ प्राचां वाचां विचारेण शब्दव्यापारनिर्णयं ॥ करोमि कोविदानंदं लक्ष्यलक्षणसंयुतं ॥ २ ॥ प्रमाणत्वेन शब्दानां करणत्वं शरादिवत् ॥ तेन व्यापारयुक्तत्वं नियतं स्वार्थसाधने ॥ ३ ॥ शास्त्रादेज्ञा(ज्ञों)तसंकेता लक्ष्यलक्षाः शरा इव ॥ सद्योर्थकारिणः शद्वास्तेन तस्यापि हेतुना ॥ ४ ॥ इत्यादिः ।

टीकारंभ: । प्रणम्य शंकरं सांबं कोविदानंदनामकं ॥ ग्रंथं व्याख्यामि संक्षेपात् स्वकृतं बोधसिद्धये ॥ १ ॥ अथात्र शब्दव्यापारसंशयनिवृत्तिकामैः शिष्यैः प्रेरित आशाधरभट्टनामा कविः संक्षिप्तं युक्तियुक्तं कोविदानंदाख्यं ग्रंथं कुर्वञ्शिवोत्कर्षरूपवस्तुनिर्देशात्मकं मंगलमाचरति ॥ त्रिनयनेति ॥ त्रिभिस्त्रिभिर्नयनैर्लसन् त्रिनयनलसन् ॥ तद्धितेत्यादिना द्विगुगर्भस्तत्पुरुषः ॥ त्रिशब्दस्य वृत्तिविषये वीप्सार्थत्वं ॥ इत्यादिः ।

समाप्ति: । सा सत्तैव परं ब्रह्म शब्दो ब्रह्म परं स्मृतं ॥ द्वे ब्रह्मणी वेदितव्ये इति श्रुत्यनुशासनं ॥ ४० ॥ शब्दब्रह्मविचारेण परं ब्रह्माधिगम्यते ॥ शब्दवृत्तिविचारोयं कृतस्तस्माच्छिवप्रदः ॥ ४१ ॥ शिवस्य भक्त्या समवाप्तसिद्धिर्धीनीरधी रामजिभट्ट आसीत् ॥ तत्सूनुनाशाधरभट्टनाम्ना ग्रंथः कृतोयं सुधियां मुदेस्तु ॥ ४२ ॥ ॥ इति कोविदानंदे तृतीयः परिच्छेदः ॥ ॥

टीकांत: । शब्दब्रह्मेति ॥ शिवप्रदः कल्याणदायकः ॥ यथाह भगवान् भाष्यकारः ॥ एकः शब्दः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति ॥ ४१ ॥ अंते शिवशब्दो मंगलार्थः ॥ ४२ ॥ इति श्रीपदवाक्यप्रमाणज्ञरामजीभट्टात्मजाशाधरभट्टविरचितायां कादंबिनीसमाख्यायां स्वकृतकोविदानंदव्याख्यायां तृतीयः परिच्छेदः संपूर्णः ॥ ॥

---

**No. 141.** ग्रंथनाम, **चंद्रालोकः सटीकः.** Name: Chandrâloka, with a Commentary.

पत्राणि २६, folios 26; पंक्तयः १४, lines 14; अक्षराणि ५८, letters 58.

ग्रंथसंख्या १३१९.

शक: १७७५. Śaka 1775.

**कर्ता, अप्पदीक्षितः**, टीकाकारः, **आशाधरभट्टः**. Author, Appa-dîkshita; Commentator, Âśâdhara-bhaṭṭa.

आरंभः। परस्परतपःसंपत्फलायितपरस्परौ ॥ प्रपंचमातापितरौ प्राञ्चौ जा-यापती स्तुमः ॥ १ ॥ इत्यादिः।

टीकारंभः। शिवयोस्तनयं नत्वा गुरुं च धरणीधरं ॥ कुर्वे कुवलयानंदकारिका-दीपिकां मुदे ॥ १ ॥ आशाधरेण कविना रामजीभट्टसूनुना ॥ क्रियते कारिका-टीका बालानामुपकारिणी ॥ २ ॥ अथ तत्रभवानप्पयदीक्षितनामा कविः सहृदय-हृदयानंदार्थमर्थालंकाराणां लक्ष्यलक्षणोपेताः कारिकाः कृत्वा तद्व्याख्यानरूपं कुवलयानंदाख्यं ग्रंथं कृतवानित्यादिः।

अंतः। एषां दोषागतार्थत्वादर्थदोषतया पुनः ॥ नोक्ताः कुवलयानंदे श-ब्दानां चाप्यलंक्रियाः ॥ २०२ ॥ इति चंद्रालोककारिकाः समाप्ताः ॥

टीकांतः। किं च शब्दानामप्यलंक्रिया यमकादयो नोक्ताः तेषामधमकाव्य-विषयत्वादिति भावः ॥ न चालंकारेषु बालानामिति प्रतिज्ञाभंगः शंक्यः ॥ तत्राल-कारशब्दस्योपमादिषु लाक्षणिकत्वं ॥ २०२ ॥ आशाधरकवेर्वाचं वाचोयुक्तिवि-शारदाः ॥ अनुगृह्णंतु बालस्य काकली कस्य नोदने ॥ १ ॥ ॥ इति कुवल-यानंदकारिकाव्याख्यायामलंकारदीपिकासमाख्यायां तृतीयं परिशेषप्रकरणं स-माप्तं ॥

---

**No. 142.** ग्रंथनाम, **चित्रमीमांसा.** Name: Chitramîmâṅsâ.

पत्राणि ४९, folios 49; पंक्तयः १०, lines 10; अक्षराणि ६४, letters 64.

**कर्ता, अप्पदीक्षितः**. Author, Appadîkshita.

आरंभः। अभिवंद्य चंद्रशेखरमाद्यं गौरीसखं परं ज्योतिः ॥ वितनोमि विपुल-विषयां विशदार्थामर्थचित्रमीमांसां ॥ १ ॥ त्रिविधं तावत्काव्यं ॥ ध्वनिगुणीभूत-व्यंग्यचित्रभेदात् ॥ यत्र वाच्यातिशायि व्यंग्यं स ध्वनिः ॥ इत्यादिः।

समाप्तिः। एवं। पूर्णेंदोः परिपोषकांतवपुषः स्फारप्रभासुस्फुरन्नेदं मंडलमप्ये-(प्य)[पि] ति गगनाभोगो(गा)ज्जिगीषोर्जगत्॥कामस्योच्छ्रितमातपत्रमधुना पांडुप्र-दोषश्रिया मानोन्नेहजनाभिमानदलनोद्योगैकहेवाकिन इत्यपह्नुत्युदाहरणे इत्यपि द्रष्टव्यं ॥ इत्युत्प्रेक्षा ॥

**No. 143.** ग्रंथनाम, **छंदोनुशासनं.** Name: Chhandonuśâsana.

पत्राणि ६५, folios 65; पंक्तयः १५, lines 15; अक्षराणि ५०, letters 50.

ग्रंथसंख्या ३०४६.

**कर्ता, आचार्यहेमचंद्रः.** Author, Âchârya Hemachandra.

आरंभः ॥ ६० ॥ अर्हन् ॥ शब्दानुशासनविरचनानंतरं तत्फलभूतं काव्यमनुशिष्य तदंगभूतच्छंदोनुशासनमारिप्समाणः शास्त्रकार इष्टाधिकृतदेवतानमस्कारपूर्वकमुपक्रमते ॥ वाचं ध्यात्वार्हतीं सिद्ध-शब्दकाव्यानुशासनः ॥ काव्योपयोगिनां वक्ष्ये छंदसामनुशासनं ॥ १ ॥ इत्यादिः ।

समाप्तिः । इह च प्रस्तारसंख्ययोरेवोपयोगो नष्टादयश्चित्रमात्रं ॥ अध्वयोगस्तु पुरुषेच्छानुविधायित्वेनानियतो न च क्षेत्रनियमे फलमस्ति इति निरुपयोगः ॥ पूर्वाचार्यानुसरणात्त्वस्माभिरुक्तः ॥ ॥ इत्याचार्यश्रीहेमचंद्रविरचितायां स्वोपज्ञछंदोनुशासनवृत्तौ प्रस्तारादिव्यावर्णनो (नं) नामाष्टमोध्यायः ॥ ॥

---

**No. 144.** ग्रंथनाम, **पर्यायरूपा छन्दोनुशासनस्य टिप्पणि च.** Name: a commentary on the Chhandonuśâsana consisting of Synonyms.

पत्राणि ४६, folios 46; पंक्तयः १३, lines 13; अक्षराणि ५०, letters 50.

ग्रंथसंख्या २९८७.

संवत् १६५९. Samvat 1659.

आरंभः । छंदोनुशासनपर्यायाः कतिचिल्लिख्यंते ॥ काव्यमिति ॥ कृत इति तद्धितसूत्रं ॥ गणिपिटकमिति ॥ पिटकमिव पिटकं सर्वव्यापकत्वाद्गणानां गणिनां वा पिटकं ॥ गुणालंकारादीनि ॥ माधुर्यौजःप्रसादास्त्रयो गुणाः ॥ उपमादयोलंकाराः ॥ उपयोग इति ॥ कार्यमित्यर्थः ॥ इत्यादिः ।

अंतः ॥ सर्वगुरु ॥ १ ॥ द्विलघु ॥ १० ॥ चतुर्लघु ॥ ४१ ॥ षड्लघु ॥ ९० ॥ अष्टलघु ॥ १६ ॥ दशलघु ॥ ९० ॥ द्वादशलघु ॥ ४१ ॥ चतुर्दशलघु ॥ १० ॥ षोडशलघु ॥ १ ॥ ॥ अष्टमोध्यायः संपूर्णः ॥ ॥ इति श्रीछंदोनुशासनपर्यायाः संपूर्णाः ॥

---

**No. 145.** ग्रंथनाम, **दशरूपकं, आलोकव्याख्यासहितं.** Name: **Daśarûpaka, with Commentary entitled the Âloka.**

पत्राणि ९३, folios 93; पंक्तयः १०, lines 10; अक्षराणि ३८, letters 38.

ग्रंथसंख्या, २२०८.

कर्ता, धनिकः; व्याख्याकारो धनंजयः. Author, Dhanika; Commentator, Dhanañjaya.

आरंभः । इह सदाचारं प्रमाणयता निर्विघ्नेन प्रकरणसमाप्त्यर्थमिष्टयोः प्रकृताभिमतदेवतयोर्नमस्कारः क्रियते श्लोकद्वयेन ॥ नमस्तस्मै गणेशाय यत्कंठः पुष्करायते ॥ मदाभोगघनध्वानो नीलकंठस्य तांडवे ॥ १ ॥ दशरूपानुकारेण यस्य माद्यंति भावकाः ॥ नमः सर्वविदे तस्मै विष्णवे भरताय च ॥ २ ॥ यस्य कंठः पुष्करायते मृदंगवदाचराति ॥ मदाभोगेन घनध्वानो निबिडध्वनिः नीलकंठस्य शिवस्य तांडवे उद्धते नृत्ये ॥ तस्मै गणेशाय नमः ॥ अत्र खंडश्लेषाक्षिप्यमाणोपमाछायोलंकारः ॥ नीलकंठस्य मयूरस्य तांडवे यथा मेघध्वनिः पुष्करायत इति प्रतीतेः ॥ इत्यादिः ।

समाप्तिः । उपमादिष्वलंकारेषु हर्षोत्साहादिष्वंतर्भावान्न पृथगुक्तानि ॥ रम्यं जुगुप्सितमुदारमथाभिनीयमुग्रं प्रसादि गहनं विकृतं च वस्तु ॥ यद्वाप्यवस्तु कविभावकभाव्यमानं तन्नास्ति यन्न रसभावमुपैति लोके ॥ १ ॥ विष्णोः सुतेनापि धनंजयेन विद्वन्मनोरागनिबंधहेतुः ॥ आविष्कृतं मुंजमहीशगोष्ठीवैदग्ध्यभाजा दशरूपमेतत् ॥ २ ॥ ॥ इति श्रीविष्णुसूनुना धनंजयेन कृते दशरूपालोके रसविचारश्चतुर्थः प्रकाशः समाप्तः ॥ ॥

---

**No. 146.** ग्रंथनाम, **प्रस्तारचिंतामणिः सभाष्यः.** Name: Prastâra-chintâmaṇi, with a Commentary.

पत्राणि ५६; folios 56; पंक्तयः ११; lines 11; अक्षराणि ३६, letters 36.

शकः १७८७. Śaka 1787.

कर्ता, **चिंतामणिज्योतिर्विद्**, भाष्यकारोपि स एव. Author and Commentator, Chintâmaṇijyotirvid.

मूलारंभः । सकलविमलचंचच्चंचरीकांबुजानि स्वकरनिकरहारैर्द्योतयन् प्रातरुद्यन् ॥ रमणरमणरामारामरामानुरागप्रकरसुखकरोर्को मंगलं नस्तनोतु ॥ १ ॥ ॥ २ ॥ ३ ॥ गोविंदः समभूत्क्षितौ क्षितिभृतां मान्यो बुधैः सेवितः श्रीमत्पाणिनिशास्त्रनिष्ठसुमतिः काव्य(व्या)द्यलंकारवित् ॥ श्रीमज्यौ(ज्ज्यौ)तिषिकाग्रगण्यगणनागण्यस्तदीयात्मजः श्रीचिंतामणिरेष संवितनुते प्रस्तारचिंतामणिं ॥ ४ ॥ ५ ॥प्रस्तार-

सूचिपातालमात्रापिंडा बुधैः स्मृताः ॥ उद्दिष्टं नष्टमेरू च पताकाप्रत्यया नव ॥ ६ ॥ अधो लघुं गुरोराद्यात्पुरतस्तु यथोपरि ॥ पश्चाद्दद्याद्गुरून्नेवं वर्णप्रस्तार ईदृशः ॥ ७ ॥ इत्यादिः ॥

भाष्यारंभः । दंताग्रेणापि शैलप्रचयनिखनने यः पटुः शैशवेपि स्फूर्जद्दिव्याप्रवाहं करटयुगसरद्दाननीरच्छलेन ॥ धत्ते मत्तेभराजाननमिह कलये केवलं विघ्नपूरच्छेत्तारं कार्यसिद्ध्यै प्रतिदिवसमहं सेवितं तं महद्भिः ॥ १ ॥ ॥ २ ॥ समस्तविद्याकृतिनां वरिष्ठं गोविंदतातं सुगुणैर्गरिष्ठं ॥ चिंतामणिः संतनुते प्रणम्य प्रस्तारचिंतामणिभाष्यमेतत् ॥ ३ ॥ अथ ग्रंथकृद् ग्रंथारंभे कृतं मंगलं शिष्यशिक्षायै मालिनीछंदसा निबध्नाति ॥ सकलेति ॥

मूलसमाप्तिः । प्रस्तारविस्तारविचित्रचित्रं प्रस्तारचिंतामणिनामधेयं ॥ गोविंददैवज्ञतनूद्भवोयं चिंतामणिर्ग्रंथममुं व्यधत्त ॥ २ ॥ इति प्रस्तारचिंतामणौ तृतीयः परिच्छेदः ॥ ॥ संपूर्णोयं ग्रंथः ॥

भाष्यसमाप्तिः । स्यादिंद्रवज्रा यदि तौ जगौ गः ॥ २८ ॥ अग्रे समाप्तिश्लोकाः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ध्यात्वा गाणपतं पदाब्जयुगलं बुद्ध्या विचार्य स्फुटं छंदःशास्त्रमनंतभेदसहितं श्रीपिंगलाद्योदितं ॥ शाके द्वीषुतिथीमिते १५९२ शिवपुरे दैवज्ञचिंतामणिर्भाष्यं तोषकरं सतां स निरमात् प्रस्तारचिंतामणेः ॥ ५ ॥ ॥ इति श्रीमद्गोविंदज्योतिर्वित्तनूजचिंतामणिज्योतिर्विद्विरचिते प्रस्तारचिंतामणिभाष्ये खंडप्रस्ताराख्यस्तृतीयः परिच्छेदः ॥ ॥

---

**No. 147.** ग्रंथनाम, **प्रस्तारपत्तनं.** Name: **Prastâra-pattana.**

पत्राणि १२, folios 12; पंक्तयः १९, lines 19; अक्षराणि ३२, letters 32.

कर्ता, **कृष्णदेवः.** Author, Krishṇadeva.

आरंभः । नत्वा गणेशं सीतेशं शेषं च सकलार्थदं ॥ छंदःप्रस्तारसरणिः कृष्णदेवेन दर्श्यते ॥ १ ॥ सत्सु ग्रंथेषु बहुषु च्छंदोविस्तारवीचिषु ॥ समुद्र(द्रे)स्सु(षु) ममोद्योगः कोपि कूपायते नृणां ॥ २ ॥

अंतः । पूर्वं दद्याद्गुरून्यस्य शेषास्ताः संभवे सति ॥ नोचेत्ताः केवलं दद्यान्मात्राप्रस्तारकृत्क्रमे ॥ ६७ ॥ इति मा० प्र० ॥ अथ मात्रासूची ॥ यावत्प्रस्तार– । अग्रे ग्रंथः खंडितः ।

---

**No. 148.** ग्रंथनाम, **रसगंगाधरः.** Name: **Rasagaṅgâdhara.**

पत्राणि ६१५, folios 615; पंक्तयः ६, lines 6; अक्षराणि २४, letters 24.

कर्ता, **जगन्नाथपंडितः**. Author, Jagannâtha Paṇḍita.

आरंभः । स्मृतापि तरुणातपं करुणया हरंती नृणामभंगुरतनुत्विषां वलयिता शतैर्विद्युतां ॥ कलिंदगिरिनंदिनीतटसुरद्रुमालंबिनी मदीयमतिचुंबिनी भवतु कापि कादंबिनी ॥ १ ॥ अग्रे गुरुवंदनस्वप्रशंसाग्रंथावतरणिकादिश्लोकाः ॥ ८ ॥ तत्र कीर्तिपरमाह्लादगुरुराजदेवताप्रसादाद्यनेकप्रयोजनकस्य काव्यस्य व्युत्पत्तेः कविसहृदययोरावश्यकतया गुणालंकारादिभिर्निरूपणीये तस्मिन् विशेष्यतावच्छेदकं तदितरभेदबुद्धौ साधनं तल्लक्षणं तावन्निरूप्यते ॥ रमणीयार्थप्रतिपादकः शब्दः काव्यमित्यादिः ॥

समाप्तिः ॥ इति रसगंगाधरे पर्यायोक्तप्रकरणं ॥ अथ व्याजस्तुतिः ॥ आमुखप्रतीताभ्यां निंदास्तुतिभ्यां स्तुतिनिंदयोः क्रमेण पर्यवसानं व्याजस्तुतिः ॥ अग्रे ग्रंथः खंडितः ॥

---

**No. 149.** ग्रंथनाम, **रसतरंगिणी, नौकाटीकया सहिता.** Name: Rasataraṅgiṇî, with a Commentary, the Naukâ.

पत्राणि १६५, folios 165; पंक्तयः १०, lines 10; अक्षराणि ४४, letters 44.

शकः १७२८. S'aka 1728.

कर्ता, **भानुदत्तः.** Author, Bhânudatta. टीकाकारो, **गंगारामः** Commentator, Gaṅgârâma.

आरंभः । लक्ष्मीमालोक्य लुभ्यन्निगममुपहसञ्शोचयन् यज्ञजंतून् क्षत्रं शोणाक्षि पश्यन् समिति दशमुखं वीक्ष्य रोमांचमंचन् ॥ हृत्वा हैयंगवीनं चकितमपसरन् म्लेच्छरक्तैर्दिगंतान् सिंचन् दंतेन भूमिं तिलमिव तुलयन् पातु वः पीतवासाः ॥ १ ॥ भारत्याः शास्त्रकांतारश्रांतायाः शांतिकारिणी ॥ क्रियते भानुना भूरिरसा रसतरंगिणी ॥ २ ॥ ३ ॥ ४ ॥ हेतोः पूर्ववृत्तित्वनियमादतः पूर्वमेव तस्योपन्यासः समुचितः ॥ रसस्य हेतवो भावादयस्तेन तेभ्यः पूर्वं भावादय एव निरूप्यंते ॥ इत्यादिः ।

टीकारंभः । लीलागृहीतगात्रं नवरसपात्रं सुतं यशोदायाः ॥ श्रीभानुतरंगिण्या नौकायाः कर्णधारमहमीडे ॥ १ ॥ गंगारामेण मया यत्नात्कोपादिव बलरामेण ॥ प्राक्प्रवणाप्यर्वाक्प्रवणासौ क्रियते तरंगिणी भानोः ॥ २ ॥ प्रारिप्सितप्रतिबंधकदुरितविध्वंसपटीयसीमाशिषं शिष्यशिक्षायै निबध्नन् श्रीभानुदत्तमिश्रो निरूपणीयरसस्योत्तमनायकालंबनतया पुरुषोत्तमं परामृशतीत्यादिः ।

समाप्तिः । विद्वद्वारिधराः स्नेहं तथा वर्षंतु संततं ॥ लभते विपुलां वृद्धिं यथा

रसतरंगिणी ॥ १ अवगाहस्व वाग्देवि दिव्यां रसतरंगिणीं ॥ अस्मत्पद्येन प-द्येन रचय श्रुतिभूषणं ॥ २ ॥ यावद्भानोः सुता कापि कालिंदी भुवि वर्तते ॥ तावत्तिष्ठतु मे भानोरेषा रसतरंगिणी ॥ ३ ॥ ॥ इति श्रीभानुदत्तमिश्रविरचितायां रसतरंगिण्यां रसाभासनिरूपणं नामाष्टमस्तरंगः ॥ ॥ समाप्तोयं ग्रंथः ॥ ॥

टीकांतः । यावदिति ॥ एतेन रसतरंगिणीपदप्रवृत्तिनिमित्तमुक्तमिति र ( ग )-म्यते ॥ प्राचां श्लाघ्या शिरसा जन्होरिव मम्मटस्य कुक्षि [ ग ] ता ॥ अधिधरणि मया नीता तरंगिणीयं भगीरथेनेव ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ॥ इति श्रीजड्युपनामकगंगारामविरचितायां नौकाख्यायां रसतरंगिणीव्याख्यायामष्टमस्तरंगः ॥

---

**No. 150. ग्रंथनाम, रसमंजरी.** Name: Rasa-mañjarî.

पत्राणि ३१, folios 31; पंक्तयः ५, lines 5; अक्षराणि ४२, letters 42.

ग्रंथसंख्या ४०७.

कर्ता, भानुदत्तः. Author, Bhânudatta.

आरंभः । आत्मीयं चरणं दधार पुरतो निम्नोन्नतायां भुवि स्वीयेनैव करेण कर्षति तरोः पुष्पं श्रमाशंकया ॥ तल्पे किं च मृगत्वचा विरचिते निद्राति भागैर्निजैरंतःप्रेमभरालसां प्रियतमामंगे दधानो हरः ॥ १ ॥ विद्वत्कुलमनोभृंगरसव्यासंगहेतवे ॥ एषा प्रकाश्यते श्रीमद्भानुना रसमंजरी ॥ २ ॥ तत्र रसेषु शृंगारस्याभ्यर्हितत्वेन तदालंबनविभावत्वेन नायिका तावन्निरूप्यते इत्यादिः ।

समाप्तिः । माध्वीकस्यंदसंदोहसुंदरीं रसमंजरीं ॥ कुर्वंतु कवयः कर्णभूषणं कृपया मम ॥ ३७ ॥ तातो यस्य गणेश्वरः कविकुलालंकारचूडामणिर्देशो यस्य विदेहभूः सुरसरित्कल्लोलकिर्मीरिता ॥ पद्येन स्वकृतेन तेन कविना श्रीभानुना योजिता वाग्देवीश्रुतिपारिजातकुसुमस्पर्द्धाकरी मंजरी ॥ ३८ ॥ ॥ इति श्रीकविरत्नभानुदत्तविरचिता रसमंजरी संपूर्णा ॥ ॥

---

**No. 151. ग्रंथनाम, रसमंजरीटीका.** Name: a Commentary on the Rasa-mañjarî.

पत्राणि १५, folios 15; पंक्तयः १३, lines 13; अक्षराणि ४८, letters 48.

ग्रंथसंख्या ५८५.

आदिः । आरंभस्य चत्वारि पत्राणि खंडितानि ॥ स[क]ला रूचयः दीप्तयो यासां ताः ॥ प्रोष्ठीपृष्ठस्य स्वत एवारुणत्वेपि लाक्षारससंपर्कादत्यंतारुणत्वं यथा तथा चक्षुषः स्वाभाविकारुणत्वसत्वेपि कोपवशादाधिकारुणत्वं ॥ १७ ॥

अंतः । तात इति ॥ कविवर्गालंकरणशिखामणिः गणेश्वराख्यस्तातो यस्य ॥ तथा सुरसरितो भागीरथ्याः कल्लोलास्तरंगास्तैः किर्मीरिता विचित्रिता विदेहभूर्देशो यस्य वसतिः ॥ तेन श्रीभानुना कविना स्वकृतेन पद्येन ॥ एकवचनमविवक्षितं ॥ योजिता वाग्देव्याः श्रोत्रे यत्पारिजातकुसुमं तत्सदृशी मंजरीव मंजरी जयत्वाकल्पं तिष्ठतु ॥ ३९ ॥ ॥ इति रसमंजरीव्याख्यानं समाप्तं ॥ ॥

---

**No. 152.** ग्रंथनाम, **वाग्भटालंकारः वृत्तिसहितः**. Name: Vâgbhaṭâlaṅkâra, with a Commentary.

पत्राणि ५३, folios 53; पंक्तयः १३, lines 13; अक्षराणि ४०, letters 40

ग्रंथसंख्या १६५०.

संवत् १७११. Saṁvat 1711.

कर्ता, **वाग्भटः**. Author, Vâgbhaṭa. वृत्तिकारः, **समयसुंदरः**. Commentator, Samayasundara.

आरंभः । श्रियं दिशतु वो देवः श्रीनाभेयजिनः सदा ॥ मोक्षमार्गं सतां ब्रूते यदागमपदावली ॥ १ ॥ साधुशब्दार्थसंदर्भं गुणालंकारभूषितं ॥ स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये ॥ २ ॥ प्रतिभा करणं तस्य व्युत्पत्तिस्तु विभूषणं ॥ भृशोत्पत्तिकृदभ्यास इत्याद्यकविसंमतं ॥ ३ ॥ इत्यादिः ।

टीकारंभः । पार्श्वनाथं जिनं नत्वा वृत्तिं समयसुंदरः ॥ अलंकारस्य कुरुते काव्यस्य सुगमां स्फुटं ॥ १ ॥ स श्रीनाभेयजिनः श्रियं वो युष्माकं दिशतु ॥ श्रीनाभेयजिनः उपयुक्तशब्दस्य मध्यपदलोपी समासः ॥ सः कः यदागमपदावली सतां मोक्षमार्गं ब्रूते ॥ यस्य आगमः सिद्धांतः तस्य पदानि यदागमपदानि तेषां आवली श्रेणिः ॥ अन्यापि या पदावली भूमिप्रतिबिंबितचरणश्रेणिर्भवति सतां सज्ज्ञानिनां मार्गं वर्त्म ब्रूते ज्ञापयति इत्यर्थांतरलेशः ॥ १ ॥ इत्यादिः ।

समाप्तिः । सम्यग्ज्ञानसमुत्थानः शांतो निःस्पृहनायकः ॥ रागद्वेषपरित्यागात्सम्यग्ज्ञानस्य चोद्भवः ॥ ३१ ॥ दोषैरुज्झितमाश्रितं गुणगणैश्चेतश्चमत्कारिणं नानालंकृतिभिः परीतमभितो रीत्या स्फुरंत्या सतां ॥ तैस्तैस्तन्मयतां गतं नवरसैराकल्पकालं कविस्रष्टारो घटयंति काव्यपुरुषं सारस्वताध्यायिनः ॥ ३२ ॥ ॥ इति श्रीवाग्भटालंकारे पंचमः परिच्छेदः ॥ ॥

टीकांतः । स्वच्छे खरतरगच्छे श्रीजिनचंद्रसूरयः ॥ तेषां सकलचंद्राख्यः शिष्यः प्रथमतोभवत् ॥ १ ॥ तच्छिष्यसमयसुंदररचितालंकारवृत्तिरतिसुगमा ॥ अमदाबादे नगरे करनिधिशृंगारसंख्याब्दे ॥ २ ॥ न मया व्याकृते चर्चा न युक्तिः कापि दर्शिता ॥ किं त्वर्थालापनं चक्रे हरिराममुनेः कृते ॥ ३ ॥ ॥ इति श्रीसमयसुंदरोपाध्यायविरचिता श्रीवाग्भटालंकारवृत्तिः संपूर्णा ॥ ॥

**No. 153.** ग्रंथनाम, **वृत्तद्युमणिः.** Name: Vrittadyumaṇi.

पत्राणि ६६, folios 66; पंक्तयः ८, lines 8; अक्षराणि ३०, letters 30.

शकः १७८८, क्षयाब्दे श्रावणे. Śaka 1788.

कर्ता, **चंद्रचूडोपाभिधो गंगाधरपुत्रो यशवंतः.** Author, Yaśavanta Gangâdhara Chandrachûḍa.

आरंभः । स्वीयजनप्रत्यूहध्वांतद्युमणिर्दयोदपरिपूर्णः ॥ रिपुचयखंडनचंडः करितुंडो भवतु भक्तभव्याय ॥ १ ॥ अग्रे मंगलानि ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ अस्याग्रे स्ववंशादिवर्णनार्याः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ अच्छंदः सच्छंदो वाङ्मयमखिलं द्विधा व(वि)धातव्यं ॥ गद्यादिकमच्छंदः सच्छंदः स्पष्टमीर्येतेत्र मया ॥ १५ ॥

समाप्तिः । इह च प्रस्तारसंख्ययोरेवोपयोगो नष्टादयश्चित्रमात्रं ॥ अध्वयोगस्तु पुरुषेच्छानुविधायित्वेनानियतो न क्षेत्रनियमे फलमस्तीति निरुपयोगः ॥ पूर्वाचार्यानुस्मरणात्त्वस्माभिरप्युक्तः ॥ ॥ इति प्रस्तारनष्टोद्दिष्टसर्वैकद्यादिगक्रिंयाप्रमुखाः सर्वे प्रत्ययाः समाप्ताः ॥ अग्रे स्वोक्तं सप्रमाणामित्यादि श्लोकत्रयं ॥ ८४ ॥ ८५ ॥ ८६ ॥ माता यस्य तु पार्वती जनयिता गंगाधरः क्ष्मातले विख्यातो यशसा श्रिया समजनि श्रीविष्णुवृद्धान्वये ॥ यो नाम्ना यशवंत इत्यजितपत्पाथोजभृंगायितस्तेनेदं रचितं विभाव्य निपुणं छंदः सदाल्हादकृत् ॥ ८७ ॥ शाके श्रीशालिवाहाव्हयधरणिपतेरद्रियुक्तग्रहर्तुक्ष्मासंख्ये १६९७ मन्मथेब्दे दहनमिततिथौ माधवे माधवर्तौ ॥ कर्क्षे पक्षे वलक्षे क्षितितनुजदिने पारिभद्रे पुरे श्रीभीमांभोभाजि वृत्तद्युमणिरयमभून्मल्लहर्तुः समीपे ॥ ८८ ॥ ॥ इति वृत्तद्युमणौ प्रस्तारनष्टोद्दिष्टादिप्रत्ययव्यावर्णनो (नाम नं) द्वादशः किरणः ॥ ॥

---

**No. 154.** ग्रंथनाम, **वृत्तरत्नाकरः सेतुटीकया सहितः.** Name: Vrittaratnâkara, with a Commentary entitled the Setu.

पत्राणि, २५, folios 25; पंक्तयः १३, lines 13; अक्षराणि ४४, letters 44.

संवत् १९१३. Saṁvat 1913.

कर्ता, **केदारभट्टः.** Author, Kedârabhaṭṭa. टीकाकारो, **भास्करशर्मा.** Commentator, Bhâskara.

आरंभः । सुखसंतानसिध्य(द्ध्य)र्थं नत्वा ब्रह्माच्युतार्चितं ॥ गौरीविनायकोपेतं शंकरं लोकशंकरं ॥ १ ॥ वेदार्थशैवशास्त्रज्ञः पव्वेकोभूद्द्विजोत्तमः ॥ तस्य पुत्रोस्ति केदारः शिवपादार्चने रतः ॥ २ ॥ तेनेदं क्रियते छंदो लक्ष्यलक्षणसंयुतं ॥ वृत्तरत्नाकरं नाम बालानां सुखसिद्धये ॥ ३ ॥ पिंगलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा ॥ मात्रावर्णविभेदेन छंदस्तदिह कथ्यते ॥ ४ ॥ इत्यादिः ।

टीकारंभः । प्रस्फुरन्मधुपचुंबितपद्मापंकजातजनिपंकजनीयं ॥ बुध्यते किल जडापि च यस्मात्सारणं तदिह धाम नमामः ॥ १ ॥ श्रीगुरून् पितरौ चापि नत्वा भास्करशर्मणा ॥ वृत्तरत्नाकरे सेतुर्यथामति विरच्यते ॥ २ ॥ ग्रंथारंभे यमधिकृत्य प्रवर्तते तत्प्रयोजनमिति गौतमसूत्रोक्तेः ॥ सप्रयोजनं शिवप्रणामरूपं मंगलं निबध्नन् ग्रंथस्य संबंधप्रयोजने श्लोकत्रयेणाहेत्यादिः ।

समाप्तिः । संख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्तितः ॥ वृत्तस्यांगुलकी व्याप्तिरधः कुर्यात्तथांगुलं ॥ ९ ॥ वंशेभूत्कश्यपस्य प्रकटगुणगणः शैवसिद्धांतवेत्ता विप्रः पव्वेकनामा विमलतरमतिर्वेदशास्त्रार्थवेत्ता ॥ केदारस्तस्य सूनुः शिवचरणयुगाराधनैकाग्रचित्तश्छंदस्तेनाभिरामं प्रविरचितमिदं वृत्तरत्नाकराख्यं ॥ १० ॥ ॥ ॥ इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकरे षष्ठोध्यायः ॥ ॥

टीकांतः । शास्त्राणि न्यायादीनि तेषां तात्पर्यार्थस्य वेत्ता इत्यर्थः ॥ अत्र वृत्त्यनुप्रासः शब्दालंकारः ॥ गुणगणेति वर्णसाम्यात् ॥ १० ॥ त्र्यंबकेश्वरपुरीकृतवासादग्निहोत्रकुलनीरधिचंद्रात् ॥ पुण्यपूर्वपुरुषोत्तमभट्टादुद्बभूव सुकृती हरिभट्टः ॥ १ ॥ २ ॥ तस्मादुद्भूतकीर्तेः कृतसुकृतभरान्मंत्रतंत्रस्वतंत्रः साधूनामग्रगण्यो गददलनविधौ मानवानां शरण्यः ॥ काशीक्षेत्राधिवासी हृतकठिनमहच्छत्रुषड्वर्गदंभः श्रीमानायाजिभट्टः सुरयजनरतः शुद्धधीराविरासीत् ॥ ३ ॥ सेतुस्तत्तनयेन शैवनगरे सद्वृत्तरत्नाकरे नेतुं भास्करशर्मणा विरचितः पारं बुधानां गणं ॥ तेनानम्रसुरेंद्रसिद्धनिकरव्यालोलमौलिस्खलच्चंचद्रत्नमरीचिरंजितपदो येवो रविः प्रीयतां ॥ ४ ॥ ५ ॥ अक्षिवन्हिहयभूमितवर्षे १७३२ सद्बसंतसमदे मधुशुक्ले ॥ आगतः प्रतिपदीह समाप्तिं सेतुरेष बुधसंघमुदेस्तु ॥ ६ ॥ ॥

---

**No. 155.** ग्रंथनाम, **वृत्तसारः**. Name: Vṛitta-sâra.

पत्राणि १०, folios 10; पंक्तयः ७, lines 7; अक्षराणि २४, letters 24.

कर्ता, **भारद्वाजः**. Author, Bhâradvâja.

आरंभः । चतुर्मुखी यत्र चतुर्गवाक्षी दंतावली कांडपटी च यत्र ॥ यत्र स्म चेव्यः श्रुतयः समस्तास्तद्धातुरंतःपुरमंतरस्तु ॥ १ ॥ बुभुत्सु[सु]खबोधाय लक्ष्यलक्षणसंयुतः ॥ क्रियते वृत्तसारोयं भारद्वाजेन धीमता ॥ २ ॥ मस्त्रिगुरुर्यो मुखलो मध्यलघू रोंतगः सगणः ॥ तोंऽतलघुर्मध्यगुरुजो मुखगो भस्त्रिलो नः स्यात् ॥ ३ ॥ लः सरलो गो वक्रः ॥ इत्यादिः ।

समाप्तिः । चरमार्द्धेन समानं पूर्वार्द्धं यत्र चार्यायाः ॥ उपगीतिः सा कथिता दर्वीकरसार्वभौमेन ॥ ४६ ॥ यथा ॥ उपगीति कुरंगशिशो मा गाः श्रुतिसुखल-

वस्पृहया ॥ व्याधं किमिति न पश्यासि चापन्यस्तेषुमिह पुरतः ॥ ४७ ॥ भारद्वाजेन रुचिरं वृत्तसारमिमं कृतं ॥ पश्यंतः सादरं प्रीतिं लभंतां कवितोत्सुकाः ॥ ४८ ॥ ॥ ॥ इति भारद्वाजविरचितो वृत्तसारः संपूर्णः ॥ ॥

---

**No. 156.** ग्रंथनाम, **वृत्ताभिरामः.** Name: Vṛittâbhirâma.

पत्राणि १०, folios 10; पंक्तयः १२, lines 12; अक्षराणि ४०, letters 40.

ग्रंथसंख्या ३००.

कर्ता, **रामचंद्रपंडितः.** Author, Râmachandra Paṇḍita.

आरंभः । श्रीमत्सीतारमणं सुरनुतचरणं जगत्रयीशरणं ॥ प्रणताभीतिवितरणं निरुपमकरुणं नमामि भवहरणं ॥ १ ॥ २ ॥ श्रीपिंगलाद्युक्तलक्ष्मच्छंदोज्ञानस्य सिद्धये ॥ वृत्ताभिरामनामायं ग्रंथो रामेण रच्यते ॥ ३ ॥ इत्यादिः ।

समाप्तिः । मात्रामेरुरयं स्यान्मात्राच्छंदःसुकोविदैरुदितः ॥ इति वृत्तबोधहेतुः प्रस्तारादिक्रिया मया गदिता ॥ ३९ ॥ ॥ इति वृत्ताभिरामे पंचमोध्यायः ॥ ५ ॥

---

**No. 157.** ग्रंथनाम, **वृत्तिवार्तिकं.** Name: Vṛitti-vârtika.

पत्राणि १७, folios 17; पंक्तयः ११, lines 11; अक्षराणि ४०, letters 40.

ग्रंथसंख्या ४६७.

कर्ता, **अप्पयदीक्षितः.** Author, Appaya Dîkshita.

आरंभः । विश्वं प्रकाशयंती व्यापारैल (लै) क्षणाभिधाध्वननैः ॥ नयनैरिव हरमूर्तिर्विविधोपास्या सरस्वती जयति ॥ १ ॥ वृत्तयः काव्यसरणावलंकारप्रबंधृ(द्धृ)भिः ॥ अभिधा लक्षणा व्यक्तिरिति तिस्रो निरूपिताः ॥ २ ॥ तत्र क्वाचित्कचिद्वृद्धैर्विशेषा न स्फुटीकृताः ॥ निष्टंकयितुमस्माभिः क्रियते वृत्तिवार्तिकं ॥ ३ ॥ तत्र शक्त्या प्रतिपादकत्वमभिधा ॥ सा च त्रिधा ॥ रूढिर्योगो योगरूढिश्च ॥ इत्यादिः ।

समाप्तिः । तस्मादेतादृशस्थले समभिव्याहारादभेदप्रतीत्यभ्युपगमेन न कश्चिद्दोष इति व्यर्थो लक्षणोपपादनप्रयासः ॥ न चैवं सर्वत्र विषयिपदसामानाधिकरण्यस्थले समभिव्याहारादभेदप्रतीतेर्वक्तुं शक्यत्वात्क्वाचिदपि सारोपलक्षणा न स्यादिति वाच्यं ॥ इष्टापत्तेः ॥ ॥ इति वृत्तिवार्तिकेप्पयदीक्षितकृते लक्षणावृत्तिनिर्णयो नाम द्वितीयः परिच्छेदः संपूर्णः ॥ ॥

**No. 158.** ग्रंथनाम, **व्यंग्यार्थकौमुदी रसमंजर्याष्टीका.** Name: Vyangyârtha-kaumudî, a Commentary on the Rasa-mañjarî.

पत्राणि, १३९. folios 139; पंक्तयः १०, lines 10; अक्षराणि ३२, letters 32.

ग्रंथसंख्या २९०९.

कर्ता, अनंतपंडितः. Author, Ananta Paṇḍita.

आरंभः । सर्वे साधुजनाः सदा यतहृदा सत्संप्रदायादलं यज्ज्ञानाय कणादगौतममतान्यालोच्य तत्वार्थदान् ॥ वेदांतान् परिशीलयंति रहसि स्वानंदकंदाकरं वंदे तं जगदीश्वरं दयितया सानंदमालिंगितं ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ सरस्वतीमंगलं ॥ ५ ॥ आसीदासीमभूमीपतिपरिवृढोद्दडचंडप्रतापज्वालामालाकरालीरलशमनमहावारिवाहप्रवाहः ॥ विद्वद्दानांबुधाराचिरपरिचयोत्पादितानल्पधर्मः स्वःशाखी(खि)ख्यातकीर्तिः प्रमुदितहृदयः काशिराजाभिधानः ॥ ६ ॥ ७ ॥ तद्वंशजो धनुरिवाभवदेकवीरः सत्पार्थिवप्रकरकेलिविलासशाली ॥ यो लक्षदः क्षितितले किल मार्गणानां राजा प्रतापवररुद्रमनोजकांतिः ॥ ८ ॥ ९ ॥ अजनि ततो जनगीयमानकीर्तिर्मधुकरशाह इति प्रसिद्धनामा ॥ जगति जनार्दनैकचिंतनचित्तः स्फुरदुरुसूर्यसहस्रकोटिधामा ॥ १० ॥ ११ ॥ १२ ॥ तस्मादभूच्छ्रीवरवीरसिंहदेवाभिधानः प्रभुतानिधानं ॥ कलासु सर्वास्वपि पुण्यदासु विशारदः शारदचंद्रकांतिः ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ तदात्मजः साधुगुणैरुपेतः श्रीचंद्रभानुः प्रथितः पृथिव्यां ॥ वर्वर्ति सर्वोपरि गीतकीर्तिः सदा मुदा ध्यानपरः परेशे ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ विद्वद्भिः समुपाश्रिता मुनिगणव्रातैः पुराणैः पुरा शाखाभिर्निगमद्रुमस्य रचिता विद्यातरिः सादरं ॥ मग्नाप्यत्र दरिद्रभावजलधौ सत्कर्णधाराधिकश्रीवीरोद्भटचंद्रभानुविभुना येनाधुना तार्यते ॥ २८ ॥ व्यंजनामग्नचित्तेन गौतमीतीरवासिना ॥ श्रीत्र्यंबकतनूजेन पंडितानंतशर्मणा ॥ २९ ॥ रसिकश्रुतिभूषास्ति भुवि या रसमंजरी ॥ व्यंग्यार्थकौमुदी तस्यास्तन्यते तत्कुतूहलात् ॥ ३० ॥ युग्मं ॥ अग्रे विद्वत्प्रार्थनादिश्लोकाः ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ विशिष्टशिष्टेष्टकर्तव्यतापरिप्राप्तं मंगलमनुषंगतो व्याख्यातृश्रोतृमंगलाय निबध्नाति ॥ आत्मीयमित्यादिना ॥ इत्यादिः ।

समाप्तिः । दामोदरः कृष्णः एवं च व्यसनशालित्वं तेन च दुर्लभदर्शनत्वं द्योत्यते ॥ लोचनगोचरः नयनविषयीभवतु ॥ १३६ ॥ ॥ इति श्रीत्र्यंबकपंडितात्मजानंतपंडितविरचितायां रसमंजरीव्यंग्यार्थकौमुद्यामवस्थानिरूपणं समाप्तिमगमत् ॥ ॥ ग्रंथसमाप्तिं सूचयन् कवीन् स्वकृतग्रंथश्रवणांगिकारं प्रार्थयाति ॥ माध्वीकेत्याद्युभाभ्यां ॥ अग्रे अंतिमपत्रं नष्टमित्युपरम्यते ॥

**No. 159.** ग्रंथनाम, **शृंगारतिलकः.** Name, Sṛiṅgâratilaka.

पत्राणि ३३, folios 33; पंक्तयः ८, lines 8; अक्षराणि २८, letters 28.

ग्रंथसंख्या ४६१.

संवत् १७८१; शकः १६४५. Saṁvat 1781; Śaka 1545.

कर्ता, **रुद्रभट्टः.** Author, Rudrabhaṭṭa.

आरंभः । शृंगारी गिरिजानने सकरुणो रत्यां प्रवीरः स्मरे बीभत्सोस्थिभिरुत्फणी च भयकृन्मूर्त्याद्भुतस्तुंगया ॥ रौद्रो दक्षविमर्दनेन हसकृन्नग्नः प्रशांतश्चिरादित्थं सर्वरसात्मकः पशुपतिर्भूयात्सतां भूतये ॥१॥ आख्यातनाम रचनाचतुरस्रसंधि सद्वागलंकृतिगुणं सरसं सुवृत्तं ॥ आसेदुषामपि दिवं कविपुंगवानां तिष्ठत्यखंडमिह काव्यमयं शरीरं ॥२॥ काव्यं शुभे परिचिते खलु नो खलेभ्यः कश्चिद्गुणो भवति संप्रति यद्यपोह ॥ कुर्यात्तथापि सुजनार्थमिदं यतः किं यूकाभयेन परिधानविमोक्षणं स्यात् ॥ ३ ॥ ४ ॥ प्रायो नाट्यं प्रति प्रोक्ता भरताद्यै रसस्थितिः ॥ यथामति मयाप्येषा काव्यं (प्र)ति निगद्यते ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ शृंगारहास्यकरुणारौद्रवीरभयानकाः ॥ बीभत्साद्भुतशांताश्च नव नाट्ये रसाः स्मृताः ॥ ९ ॥ इत्यादिः ।

समाप्तिः । शृंगारतिलको नाम ग्रंथोयं ग्रथितो मया ॥ व्युत्पत्तये निषेवंते कवयः कामिनः स्वयं ॥ ८१ ॥ रम्या काव्यकथा कीदृग्वैदग्धी को रसात्मकः ॥ किं गोष्ठीमडनं हंत शृंगारतिलकं विना ॥ ८२ ॥ त्रिपुरवधादेव गतामुल्लासमुमां समस्तविबुधनतां ॥ शृंगारतिलकविधिना पुनरपि रुद्रः प्रसादयति ॥८३॥ ॥ इति श्रीरुद्रभट्टविरचिते काव्यालंकारे शृंगारतिलकाभिधाने तृतीयः परिच्छेदः ॥ ॥

---

**No. 160.** ग्रंथनाम, **शृंगारामृतलहरी.** Name: Śṛiṅgârâmṛita-lahari.

पत्राणि १६, folios 16; पंक्तयः १५, lines 15; अक्षराणि ४०, letters 40.

संवत् १७७८. Saṁvat 1778.

कर्ता, **सामराजदीक्षितः.** Author, Sâmarâja Dikshita.

आरंभः । सिंधुसुताकुचकुंकुमपाटलवक्षःस्थलं किमपि ॥ उपवीणितं च निगमैः सजटाजालं महः कलये ॥ १ ॥ नरहरिविंदुपुरंदरजनुषा विदुषाथ सामराजेन ॥ शृंगारामृतलहरी विरच्यते रसिकजीवातुः ॥२॥ तत्र तावद्रसो विचार्यते ॥ स्थायी भावो रसः ॥ ननु स्थायित्वव्यपदेशतया रसस्य नरत्वया

पत्तेः ॥ मैवं ॥ विरुद्धाविरुद्धभावानभिभाव्यतया स्थायित्वव्यपदेशो न तु नित्यतयेत्यादिः ॥

समाप्तिः । मलयानिलो यथा ॥ भृंगश्रेणीकृपाणी सरसिरुहवनीधूलिभिर्धूसरांगः ॥ पंपासंपातकंपस्खलितगतिरलं माधवीमल्लिकासु ॥ मंदं मंदं विसर्पन् मलयगिरिदरीगव्हरेभ्यो दुकूलं कर्षन् कर्नाटकांताकुचकलशगतं वाति मत्तः समीरः ॥ १४ ॥ अनुभावव्यभिचारिभावाश्च ग्रंथांतरेषूह्यः ॥ इह ग्रंथगौरवान्न लिखिताः ॥ ॥ इति श्रीमत्कविकुलतिलकनरहरिविंदुकुलोत्त(त्तं)सश्रीसामराजदीक्षितविरचिता शृंगारामृतलहरी समाप्ता ॥ ॥

---

**No. 161.** ग्रंथनाम, **सुधासागरः काव्यप्रकाशटीका.** Name: Sudhâsâgara, a Commentary on the Kâvya-prakâśa.

पत्राणि ४१५, folios 415 ; पंक्तयः १८, lines 18 ; अक्षराणि ४४, letters 44.

ग्रंथसंख्या १०६०९.

संवत् १८१५, Saṁvat 1815.

कर्ता, **भीमसेनः**. Author, Bhîmasena.

आरंभः । जाग्रत्त्रैलोक्यराज्योद्भवविभवपरीरंभसंभावितांघ्रिं क्षीराकूपारकन्यालळितकरतलोन्मृष्टपादारविंदं ॥ कांचीश्रीवत्सहारांगदमुकुटलसत्कौस्तुभोद्भासितांगं लक्ष्मीकांतं प्रसन्नं हृदयसरसिजांतःस्थितं संस्मरामि ॥१॥ श्रीमच्छांडिल्यवंशे कृतविविधमखः कीर्तिमान् दीक्षितोभूद्रंगादासः प्रसिद्धः सुरगुरुसदृशः कान्यकुब्जाग्रगण्यः ॥ तस्माद्वीरेश्वराख्यस्तनय इह महाभाग्यवान् विष्णुभक्तो जातः संकीर्तनीयः सकलबुधजनैर्भूपतीनां सभासु ॥ २ ॥ तस्माच्छ्रीमुरलीधरो हि कवितापांडित्यपुण्यावधिर्जातस्तस्य सुतौ त्रिलोचनशिवानंदौ गुणैस्तत्समौ ॥ शैवे वा पथि वैष्णवे समरसः श्रीमच्छिवानंदतः संजातः किल भीमसेन इति सद्विद्याविनोदी कविः ॥३॥ अग्रे काव्यप्रकाशकरस्य वर्णनश्लोकाः ॥ ४ ॥॥ ५ ॥ ६ ॥ ७ ॥ ततः कृष्णमंगलपद्ये ॥ ८ ॥ ९ ॥ ततो गणेशगुरुशिवमंगलानि ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ शक्यः पंडितमानिनां न विजयः साक्षात्कथंचित्सुराचार्येणापि पुनः सतामनुचितः प्रौढा च वाग्देवता ॥ इत्यालोच्य विवादबुद्धिविधुरो गर्विष्ठगर्वापहं ग्रंथं विद्वदमंदसंमदपदं कुर्वे सुधासागरं ॥ १४ ॥ स्वस्य विनयादि वर्णयति ॥ १५ ॥ १६ ॥ १७ ॥ अभ्यासः पंचमाब्दात्सकलसुखपरित्यागपूर्वं कृतो यो नानाशास्त्रेषु नित्यं निशिततरधियात्यंतरागानुवृत्त्या ॥ तस्येदानीं फलं मे भवतु सहृदयस्वांतसंतो-

षकारि श्रीमत्काव्यप्रकाशोज्ज्वलविवृतिमयं श्रीसुधासागराख्यं ॥ १९ ॥ अथ श्रीमम्मटाचार्यः स्वकृतकाव्यरूपसूत्रारंभरचितं स्वस्वरूपसूचकं मंगलं स्वकीयमनुस्मरन्नाह ॥ ग्रंथारंभे विघ्नविघाताय समुचितेष्टदेवतां ग्रंथकृत् परामृशतीति ॥ अत्र सूत्रकारो वृत्तिकारश्चैक एवेति तत्वं ॥ इत्यादिः ।

अंतः । संपूर्णमिदं काव्यलक्षणमिति ॥ सम्यक् पूर्णं ॥ लेशतोपि न्यूनताविरहादिति भावः ॥ अग्रे संग्रहश्लोकाः ॥ १४ ॥ ततो मंगलानि ॥ ३ ॥ ततः राजानो ह्यविवेकिन इत्येकः श्लोकः ॥ १ ॥ संवद् ग्रहाश्वमुनिभूज्ञाते मासे मधौ शुचौ ॥ त्रयोदश्यां सोमवारे समाप्तोयं सुधोदधिः ॥ १ ॥ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारीणदीक्षितभीमसेनकृते काव्यप्रकाशविवरणे सुधासागरेऽर्थालंकारनिर्णयो नाम दशम उल्लासः समाप्तः ॥ ॥

---

**No 162.** ग्रंथनाम, **योगशास्त्रीयब्रह्मसिद्धांतपद्धतिः.** Name: Brahma-Siddhânta-paddhati of the Yoga-śâstra.

पत्राणि २२, folios 22; पंक्तयः ९, lines 9; अक्षराणि ३६, letters 36.

संवत् १७६६ वर्षे वैशाखशुद्ध ११ भृगुवासरे. Samvat 1766.

आरंभः । अद्वैतपरमं (म) हंसमार्गाणामनुभवाधारवेदांगार्थे कर्मखंडज्ञानखंडतत्वखंडनिरंजनखंड इत्यादिः ।

समाप्तिः । भीरुधर्माकापापकारि ज्ञानी रागी तत्ववित् कर्मशील्ली प्रायेणैते हास्यकामिव यांति ॥ इति योगशास्त्रे ब्रह्मसिद्धांतपद्धतिः संपूर्णा ॥

---

**No. 163.** ग्रंथनाम, **योगशास्त्रप्रक्रिया.** Name: Yogaśâstra-prakriyâ.

पत्राणि १४, folios 14; पंक्तयः १०, lines 10; अक्षराणि ४२, letters 42.

शकः १७५७ पौषे. Śaka 1757.

आरंभः । योगश्चित्तवृत्तिनिरोधः ॥ प्रमाणविपर्ययविकल्पनिद्रास्मृतय इति निरोद्धव्याश्चित्तवृत्तयः पंच ॥ आसां निरोधो योगः ॥ इत्यादिः ।

समाप्तिः । एवं परमाणुष्वात्मादिषु च देशजातिलक्षणैरभिन्नेषु विशेषप्रतिपत्तिर्विवेकजज्ञानादिति ॥ उक्ताः संयमसिद्धयः ॥ ॥ इति पातंजले योगशास्त्रे सुबोधार्थं सामान्यतो योगप्रक्रिया लिखिता ॥ ॥

**No. 164.** ग्रंथनाम, **पातंजलयोगसूत्रं.** Name: **Pâtañjala-Yoga-sûtra.**

पत्राणि ८, folios 8; पंक्तयः १३, १४, १७, lines 13, 14, 17; अक्षराणि २०, letters 20.

कर्ता, **पतंजलिः.** Author, Patañjali.

आरंभः । देहार्द्धयोगः शिवयोः स श्रेयांसि तनोतु वः॥ दुष्प्रापमपि यत्स्मृत्या जनः कैवल्यमश्नुते ॥ १ ॥ त्रिविधान्यपि दुःखानि यदनुस्मरणान्नृणां ॥ प्रयांति सद्यो विलयं तं स्तुमः शिवमद्वयं ॥ २ ॥ पतंजलिमुनेरुक्तिः काप्यपूर्वा जयत्यसौ ॥ पुंप्रकृत्योर्वियोगोपि योग इत्युदितो यया ॥ ३ ॥ अथ योगसूत्रं ॥ अथ योगानुशासनं ॥ १ ॥ योगश्चित्तवृत्तिनिरोधः ॥ २ ॥ तदा द्रष्टुः स्वरूपेवस्थानं ॥ ३ ॥ वृत्तिसारूप्यमितरत्र ॥ ४ ॥ इत्यादिः ।

समाप्तिः । क्षणप्रतियोगी परिणामोपरांतनिर्ग्राह्यक्रमः ॥ ३२ ॥ पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठावाचितिशक्तिरिति ॥ ३३ ॥ इति श्रीपातंजलयोगसूत्रे कैवल्यपादश्चतुर्थः ॥ ॥ समाप्तं योगसूत्रं ॥

---

**No. 165** ग्रंथनाम, **योगसूत्रं वृत्तिसहितं.** Name: Yogasûtra, with a Commentary.

पत्राणि ५७, folios 57; पंक्तयः ९, lines 9; अक्षराणि ३०, letters 30.

शकः १७२२ रौद्राद्बे कार्तिकशुक्लपंचम्यां गुरुवासरे मूलनक्षत्रे. Saka 1722.

कर्ता, **पतंजलिः.** Author, Patañjali. वृत्तिकर्ता, **भोजराजः.** Commentator, Bhojarâja.

आरंभः । अथ योगानुशासनं ॥ १ ॥ योगश्चित्तवृत्तिनिरोधः ॥ २ ॥ इत्यादिः ।

समाप्तिः । पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठावाचितिशक्तिरिति ॥ ३३ ॥ इत्यंतः ।

वृत्त्यारंभः । प्रणम्य नागनायकातपत्रधारिणं हरिं ॥ वृत्तिं पतंजलेरिमां लिखामि योगिमोदिनीं ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ उत्सृज्य विस्तरमुदस्य विकल्पजालं फल्गुप्रकारमवधार्य विचार्यजातं ॥ अंतः पतंजलिमते विवृतिर्मयेयमातन्यते बुधमनःप्रतिबोधहेतुः ॥ ८ ॥ अथेति ॥ अनेन सूत्रेण शास्त्रस्य संबंधाभिधेयप्रयोजनान्याख्यायंते ॥ अथशब्दोधिकारद्योतको मंगलार्थश्च युक्तिर्योगः समाधानमित्यादिः ।

वृत्त्यंतः । शास्त्रांतरेप्येतदेव कैवल्यमित्युपपाद्य कैवल्यस्वरूपं निर्णीतमिति व्याकृतः कैवल्यपादः ॥ ३३ ॥ सर्वे यस्य वशाः प्रतापवसतेः पादांतसेवानतिप्रभ्रश्यन्मुकुटेषु मूर्द्धसु दधत्याज्ञां धरित्रीभृतः ॥ यद्वक्त्रांबुजमापवर्गमसमं वाग्देवतापि श्रिता स श्रीभोजपतिः फणाधिपतिकृत्सूत्रेषु वृत्तिं व्यधात् ॥ १ ॥ इति श्रीधारेश्वरविरचितायां राजमार्तंडाभिधानायां पातंजलयोगशास्त्रवृत्तौ कैवल्यपादश्चतुर्थः ॥ ४ ॥ ॥

---

**No. 166.** ग्रंथनाम, **सांख्यतत्त्वकौमुदी.** Name: Sânkhya-tatva-kaumudî.

पत्राणि ६०, folios 60; पंक्तयः ६, lines 6; अक्षराणि ५०, letters 50.

कर्ता, **वाचस्पतिमिश्रः.** Author, Vâchaspatimiśra

आरंभः ॥ अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां नमामः ॥ अजा ये तां जुषमाणां भजंते जहत्येनां भुक्तभोगां नुमस्तान् ॥ १ ॥ कपिलाय महामुनये मुनये शिष्याय तस्य चासुरये ॥ पंचशिखाय तथेश्वरकृष्णायैते वयं नमस्यामः ॥ २ ॥ इह खलु प्रतिपित्सितमर्थं प्रतिपादयन् प्रतिपादयितावधेयव [च] नो भवति प्रेक्षावतामप्रतिपित्सितं तु प्रतिपादयन्नायं लौकिको नापि परीक्षित इति प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्यत इत्यादिः ।

समाप्तिः । अस्तित्वं योगो वियोगश्चेत्युभयमधिकृत्य स्थितिरिति स्थूलसूक्ष्ममधिकृत्य ॥ मनांसि कुमुदानीव बोधयंती सतां सदा ॥ श्रीवाचस्पतिमिश्राणां कृतिः स्तात्तत्त्वकौमुदी ॥ २ ॥ इति श्रीवाचस्पतिमिश्रविरचिता सांख्यतत्वकौमुदी समाप्ता ॥

---

**No. 167.** ग्रंथनाम, **हठप्रदीपिका.** Name: Haṭha-pradîpikâ.

पत्राणि १५, folios 15; पंक्तयः १०, lines 10; अक्षराणि ४६, letters 46.

संवत्, १८६७ ज्येष्ठशुद्ध चतुर्दश्यां. Saṁvat 1867.

कर्ता, **आत्मारामसुनींद्रः.** Author, Âtmârâmamunîndra.

आरंभः । श्रीआदिनाथाय नमोस्तु तस्मै येनोपदिष्टा हठयोगविद्या ॥ विराजते प्रोन्नतराजसौधमारोढुमिच्छोरधिरोह एव ॥ १ ॥ प्रणम्य श्रीगुरुं नाथं स्वात्मारामेण योगिना ॥ केवलं राजयोगाय हठविद्योपदिश्यते ॥ २ ॥ भ्रांत्या बहुमतध्वांते राजयोगमजानतां ॥ हठप्रदीपिकां धत्ते स्वात्मारामः कृपाकरः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ एतत्पर्यंतं मत्स्येंद्रादियोगिप्रशंसा ॥ सुराज्ये धार्मिके देश इत्यादिः ।

समाप्तिः । यस्मादयं साधकाय भोगे भुक्तिविमुक्तिदः ॥ तस्मात्पुण्यवतामेवमयं योगस्तु सिध्याति ॥ १९ ॥ इयं वज्रोली शक्तिचालनात्पूर्वं ज्ञातव्या ॥ इति श्रीआत्मारामसुनींद्रविरचितायां हठप्रदीपिकायां पंचमोपदेशः ॥ ६ ॥ ॥

---

**No. 168.** ग्रंथनाम, **न्यायप्रकाशः (आपदेवी).** Name: Nyâyaprakâs'a by Âpadeva.

पत्राणि १११, folios 111; पंक्तयः ७, lines 7; अक्षराणि ३२, letters 32.

कर्ता, **आपदेवः.** Author, Âpadeva.

आरंभः । यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयं ॥ प्राप्यते तमहं वंदे गोविंदं भक्तवत्सलं ॥ १ ॥ २ ॥ इह खलु परमकारुणिकेन भगवता जैमिनिना ऋषिणा अथातो धर्मजिज्ञासेत्यादिना द्वादशस्वध्यायेषु धर्मो विचारितः ॥ तत्र वेदेन प्रयोजनमुद्दिश्य विधीयमानोर्थो धर्मः ॥ यथा यागादिः ॥ इत्यादिः ।

समाप्तिः । यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यासि कौंतेय तत्कुरुष्व मदर्पणमिति स्मृतेः ॥ अस्याश्चाष्टकाविस्मृतिवत्प्रामाण्यादित्यन्यत्र विस्तरः ॥ क्वाहं मंदमतिः क्वेयं प्रक्रिया भट्टसंमता ॥ तस्माद्भक्तेर्विलासोयं गोविंदगुरुपादयोः ॥ १ ॥ ग्रंथरूपो मदीयोयं वाग्व्यापारः सुशोभनः ॥ अनेन प्रीयतां देवो गोविंदो भक्तवत्सलः ॥ २ ॥ ॥ ॥ इति श्रीअनंतदेवसूनुना आपदेवेन कृतं न्यायप्रकाशसंज्ञकं मीमांसाप्रकरणं समाप्तं ॥ ॥

---

**No. 169.** ग्रंथनाम, **भाट्टरहस्यं.** Name: Bhâṭṭa-rahasya.

पत्राणि ९९, folios 99; पंक्तयः १३, lines 13; अक्षराणि ४०, letters 40.

कर्ता, **खंडदेवः.** Author, Khaṇḍadeva.

आरंभः । स्मृत्वा स्मृत्वा पुरारातिं तत्प्रसादावलंबनात् ॥ रहस्यं भाट्टतंत्रस्य विशदीकर्तुमीश्महे ॥ १ ॥ यज्ज्ञानाज्जैमिनीयोक्तिः स्फुटीभवति तत्वतः ॥ तद्रहस्यं खंडदेवः प्रकाशयितुमुद्यतः ॥ २ ॥ तत्र द्वादशलक्षण्यां धर्माधर्मावेव जैमिनिनानुष्ठानोपयोगितया विरचितौ ॥ इत्यादिः ।

समाप्तिः । रामप्रतियोगिकस्वत्वाश्रया भूर्भूवृत्तिस्वत्वप्रतियोगी राम इति च फलितोर्थः ॥ तत्सिद्धं सप्तम्यर्थः ॥ शक्यो लाक्षणिको वा सर्वोपि भावनान्वयीति ॥ तदेवं लिंगसंख्यान्यतिरिक्तसुबर्थमात्रस्य सिद्धो भावनान्वयः ॥ ॥ इति श्रीखंडदेवविरचिते भाट्टरहस्ये प्रथमः परिच्छेदः ॥ ॥

**No. 170.** ग्रंथनाम, **मीमांसावार्तिकं.** Name: Mîmânsâ-vârtika.
पत्राणि ३९, folios 39; पंक्तयः ९, lines 9; अक्षराणि ४०, letters 40.
कर्ता, **कुमारिलस्वामी.** Author, Kumârilasvâmî.

आरंभः । भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थोभिधीयते ॥ संबंध तावल्लक्षणद्वयस्य करोति ॥ तत्र प्रथमेध्याये प्रमाणलक्षणं वृत्तामित्युक्तमित्यादिः ।

समाप्तिः । तस्माद्यावदेवालब्ध्वात्मको विधिस्तावत्—कल्प्यते तद्वैदिकं सिद्धे तु विधानश्रुतकल्पनं पौरुषेयत्वादप्रमाणं ॥ सामर्थ्याधीनत्वाद्वाक्यशेषसिद्धेः ॥ आह च यथैव पाठः प्रतिपत्युपायस्तथैव सामर्थ्यमपि श्रुतीनां ॥ तेनैव चैता न समामनंति सहस्रभागं तु समामनेतुः (युः) ॥ १ ॥ इति कृतबहुमार्गं मंत्रविध्यर्थवादैः स्मृतिपरिखमुदारं वेदशालोपगूढं ॥ अनभिभवसमर्थं धर्मदुर्गं प्रविश्य प्रविभजति समस्तामर्थचिंतामिदानीं ॥ २ ॥ इति श्रीभट्टकुमारिलस्वामिविरचिते मीमांसावार्तिके प्रथमाध्यायस्य चतुर्थः पादः ॥

---

**No. 171.** ग्रंथनाम, **मीमांसावार्तिकं.** Name: Mîmânsâ-vârtika.
पत्राणि, आरंभस्य चतुर्दश पत्राणि न संति । अग्रे ८२, folios 82; पंक्तयः ८, lines 8; अक्षराणि ४२; letters 42.
कर्ता, **कुमारिलस्वामी.** Author, Kumârilasvâmî.

आरंभः । असतां वा क्षणभंगशून्यवादानात्मकत्वादीनामसद्धेतुभिर्वा ॥

समाप्तिः । तस्मादाकृतिपक्षोप्यालंभनादिसंभवात् आकृतिरेव शक्यार्थ इति सिद्धं ॥ ॥ इति श्रीभट्टकुमारिलस्वामिकृतौ मीमांसावार्तिके प्रथमाध्यायस्य तृतीयः पादः ॥

---

**No. 172.** ग्रंथनाम, **शास्त्रदीपिका अध्यायश्चतुर्थः.** Name: Chapter IV of the Śâstra-dîpikâ.
पत्राणि ४४, folios 44; पंक्तयः ९, lines 9; अक्षराणि २४ वा २६, letters 24, 26.
कर्ता, **पार्थसारथिमिश्रः.** Author, Pârthasârathimiśra.

आरंभः । अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा ॥ प्रसिद्धे शेषशेषित्वे प्रयुक्तिरधुनोच्यते ॥ शेषिणैव च शेषस्य प्रयुक्तिरिति हेतुता ॥ यद्यपि न सर्वः शेषी शेषस्य प्रयोजकः ॥ तुषोपवापादेः कपालादिप्रयोजकत्वाभावात् ॥ तथापि शेषिण एव शेषाणां प्रयोक्तार इति भवति ॥ इत्यादिः ।

उपसंहारः । सोमयागस्यापि यद्यप्यनेनैव न्यायेनांगांगिभावसंबंध [:] स्तोत्रैरसिद्ध एव तथापि सोमग्रहणस्य स्तोत्रोपाकरणस्य च कालार्थोपि तावत्संयोगः प्रसिद्धः॥ ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपकुर्यादिति ॥ तावता च सोमयागस्य स्तोमानां च सबंधमात्रं सिद्धं ॥ तन्मात्रनिमित्तश्च बहुव्रीहिरिति शक्यते ज्योतिष्टोमपदेन सोमयागोभिधातुमीति तद्विशेषतो यजिस्तस्यैव फलसंबंधं करोति॥ प्रसिद्धरूपे साति सोमयागे न दाक्षणीयादिषु वर्तते तत् ॥ ततः स एवेह फलान्वयेन प्रधानमन्ये तु तदंगभूताः ॥ इति महामहोपाध्यायश्रीपार्थसारथिमिश्रकृतौ शास्त्रदीपिकायां चतुर्थाध्यायस्य चतुर्थः पादः ॥ ॥ चतुर्थाध्यायः समाप्तः ॥

---

**No. 173.** ग्रंथनाम, **अद्वैतजलजातं.** Name: Advaita-jala-jâta.

पत्राणि ८, folios 8; पंक्तयः १३, lines 13; अक्षराणि ४०, letters 40.

शकः १७१९ पिंगलाब्दे श्रावणशुक्ल १०. Śaka 1719.

कर्ता, **नारायणात्मजः पांडुरंगः.** Author, Pâṇḍuraṅga Nârâyaṇa.

आरंभः । श्रीशारख्याचार्यवरप्रत्यक्सच्चित्सुखाद्वयं ब्रह्म ॥ नत्वा सन्मित्रतया विकाश्यतेऽद्वैतजलजातं ॥ १ ॥ इह कश्चिन्नलिकास्थशुकवत्परिभ्रमैर्भूरिभीतोंतेवासी युक्तोपचारकर इत्यादिः ।

समाप्तिः । भगवत्सुरेश्वराचार्यचरणवचनानुभवात्कालत्रयेपि द्वैतराहित्याद्द्वैतत्वेन शिलामौनिमेवेति शिवं ॥ ॥ इति देशिकदिष्टदिशा शिवपदरजसां कृपांशतः शिष्यः ॥ साधनयोगक्षेमाद्ब्रह्मैव ब्रह्मनिष्ठोभूत् ॥ १ ॥ २ ॥ ३ ॥ ॥ इति श्रीमत्पद्वाक्यप्रमाणक्षीरार्णवविहरणश्रीमदद्वैतविद्येंदिरारमणश्रीमन्नारायणपंडितात्मजपांडुरंगविरचितमद्वैतजलजातं संपूर्णतामलभत ॥

---

**No. 174.** ग्रंथनाम, **अद्वैतमकरंदः, रसाभिव्यंजिका टीका च.** Name: Advaita-makaranda, with a Commentary entitled the Rasâbhivyañjikâ.

पत्राणि २९, folios 29; पंक्तयः १०, lines 10; अक्षराणि ३२, letters 32.

शकः १७४६ तारणनामाब्दे फाल्गुनशुक्लतृतीयायां. Śaka 1746.

कर्ता, **लक्ष्मीधरः**; टीकाकारः, **स्वयंप्रकाशयतिः.** Author, Lakshmîdhara; Commentator, Svayamprakâśa-yati.

आरंभः । कटाक्षकिरणाचांतनमन्मोहाब्धये नमः ॥ अनंतानंदकृष्णाय जगन्मंगलमूर्तये ॥ १ ॥ अहमस्मि सदा भामि कदाचिन्नाहमप्रियः ॥ ब्रह्मैवाहमतः सिद्धं सच्चिदानंदलक्षणं ॥ २ ॥ इत्यादिः ।

टीकारंभः । नित्यं निरंतरानंदं चिदूघनं ब्रह्म निर्भयं ॥ श्रुत्या तर्कानुभूतिभ्या-महमस्म्यद्वयं सदा ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ इह खलु लक्ष्मीधरो नाम कश्चित्कवींद्रो निरंतरनित्याद्यनुष्ठानशुद्धस्वांततयेत्यादिः ।

समाप्तिः । उपशांतजगज्जीवशिष्याचार्येश्वरभ्रमं ॥ स्वतःसिद्धमनाद्यंतं परिपूर्ण-महंमहः ॥ २० ॥ लक्ष्मीधरकवेः सूक्तिशरदंभोजसंभृतः ॥ अद्वैतमकरंदोयं विद्व-द्भृंगैर्निपयितां ॥ २८ ॥ इत्यंतः ।

टीकांतः । अद्वैतमकरंदस्य रसाभिव्यंजिका कृता ॥ स्वयंप्रकाशयतिना पुरुषो-त्तमशासनात् ॥ १ ॥ ब्रह्मानंदरसास्वादविद्वद्भिर्विबुधोत्तमैः ॥ रसाभिव्यंजिका ह्येषा परिशील्या सदादरात् ॥ २ ॥ ३ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्री-कैवल्यानंदयोगींद्रपादकमलभृंगायमानस्वयंप्रकाशाख्ययतिविरचिता रसाभिव्यंजि-काख्या अद्वैतमकरंदटीका समाप्ता ॥

---

**No. 175.** ग्रंथनाम, **अद्वैतामृतं.** Name: Advaitâmṛita.

पत्राणि ३०, folios 30; पंक्तयः ११, lines 11; अक्षराणि ३४, letters 34.

संवत् १६१५ श्रीमुखाब्दे चैत्रे कृष्णचतुर्थ्यामिदं पुस्तकं लिखितं. Samvat 1615.

कर्ता, **जगन्नाथसरस्वती.** Author, Jagannâtha-Sarasvatî.

आरंभः । हरिहरसरस्वती यद्गुरुरीड्यः परमहंसानां ॥ स जगन्नाथपदोत्तरस-रस्वतीशब्दसंवेद्यः ॥ १ ॥ कर्मदिकंठालंकारं सारं वेदांतवारिधेः ॥ रचयत्यमल-ग्रंथमद्वैतामृतसंज्ञकं ॥ २ ॥ आसीद्यतिवरः कश्चिद्विवेकाश्रमसंज्ञकः ॥ यत्प्रसादेन बहवो मुक्तिमार्गमुपाश्रिताः ॥ ३ ॥ इत्यादिः ।

समाप्तिः । एतस्य कवलान् पंचास्वाद्य सादरतां गताः ॥ अमृतत्वं प्रयांत्याशु विबुधा यतिसत्तमाः ॥ १७० ॥ ॥ इति श्रीपरमहंसपरिव्राजकाचार्यहरिहरसर-स्वतीप्रियशिष्यपरमहंसपरिव्राजकाचार्यजगन्नाथसरस्वतीविरचितेऽद्वैतामृते पंचमः कवलः ॥

---

**No. 176.** ग्रंथनाम, **आत्मनिरूपणं सटीकं.** Name: Âtma-nirûpaṇa, with a Commentary.

पत्राणि ४०, folios 40; पंक्तयः ८, lines 8; अक्षराणि ४८, letters 48.

ग्रंथसंख्या १०००.

कर्ता, **शंकराचार्यः**; टीकाकारः, **सच्चिदानंदसरस्वती.** Author. Śaṅkarâchârya; Commentator, Sachchidânanda-Sarasvatî.

आरंभः । श्रीगुरुचरणद्वंद्वं वंदेहं मथितदुःमहद्वंद्वं ॥ भ्रांतिग्रहोपशांतिं पांसुमयं यस्य भसितमातनुते ॥ १ ॥ २ ॥ संसारदावपावकसंतप्तः सकलसाधनोपेतः ॥ स्वात्मनिरूपणनिपुणैर्वाक्यैः शिष्यः प्रबोध्यते गुरुणा ॥ ३ ॥ अस्ति स्वयमित्यस्मिन्नर्थे कस्यास्ति संशयः पुंसः ॥ अत्रापि संशयश्चेत्संशयिता यः स एव भवसि त्वं ॥ ४ ॥

टीकारंभः । प्रचंडपाखंडविखंडनोद्यतां त्रयीशिरोर्थप्रतिपादने रतां ॥ बुधैर्नुतां योगकलाभिरावृतां नमामि तां श्रीगुरुनाथमूर्तिं (!) ॥ १ ॥ अथेह वादिजनविजयाग्रणीर्भगवाञ्छंकराचार्यः जिज्ञासुजनानुकंपया सकलवेदांतसिद्धांतरहस्यप्रदर्शनेन परं वेदांतप्रकरणमारभमाणस्तत्प्रकारलक्षणमार्यावृत्तद्वयेनाकरोत् श्रीगुरुमित्यादिः ।

समाप्तिः । अज्ञानांध्यविहंता विरचितविज्ञानपंकजोल्लासः ॥ मानसगगनतलं मे भासयति श्रीनिवासगुरुभानुः ॥ १५६ ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यकृतं स्वात्मनिरूपणप्रकरणं समाप्तं ॥ ॥

टीकांतः । एतावता गुरुदेवतयोरैक्यभावनमेकात्मप्रकाशसाधनमिति प्रतिपादितं भवति ॥ १५६ ॥ चैतन्यामृतरचितो दूरनिरस्तश्यामतासंगः (!) ॥ हृदयसरोजे विरजे भ्रमति भ्रमरो विलक्षणः कश्चित् ॥ १ ॥ ॥ इति श्रीसच्चिदानंदसरस्वतीविरचितार्याव्याख्या समाप्ता ॥ ॥

---

**No. 177.** ग्रंथनाम, **आत्मबोधः**. Name: **Âtmabodha.**

पत्राणि ८, folios 8; पंक्तयः १५, lines 15; अक्षराणि ४८, letters 48.

कर्ता, **शंकराचार्यः**. Author, Śankarâchârya.

आरंभः । तपोभिः क्षीणपापानां शांतानां वीतरागिणां ॥ मुमुक्षूणामपेक्ष्योयमात्मबोधोभिधीयते ॥ १ ॥ बोधोन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनं ॥ पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति ॥ २ ॥ इत्यादिः ।

टीकारंभः । ननु तपोयोगमंत्रयागाद्यनेकसाधनेषु सत्सु मोक्षं प्रति बोध एव किमिति प्राधान्येनोच्यत इत्यत्राह ॥ इत्यादिः ।

उपसंहारः । चिदेव पंच भूतानि चिदेव भुवनत्रयं ॥ विज्ञातमधुना सम्यगहमेव चिदेव हि ॥ ६८ ॥

टीकांतः । ६८ स्पष्टार्थः ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविंदभगवत्पादाचार्यशिष्यश्रीशंकरभगवत्पादाचार्यविरचित आत्मबोधः सटीकः समाप्तः ॥ स्वाज्ञानकल्पितजगत्परमेश्वरत्वजीवत्वभेदकलुषीकृतभूमिभावः ॥ स्वाभाविकस्वमहिमस्थितिरस्ति मोहात्प्रत्यक्चितिर्विजयते भुवनैकयोनिः ॥ १ ॥

**No. 178.** ग्रंथनाम, **द्वादशमहावाक्यसिद्धांतः.** Name: Dvâdaśa-mahâvâkya-siddhânta.

पत्राणि १०९, folios 109; पंक्तयः ७, lines 7; अक्षराणि १५, letters 15.

संवत् १९९९. Saṁvat 1999.

आरंभः । वैकुंठपुरिपर[म]हंसपरिव्राजकाचार्यः संक्षेपतो वेदांतसूत्रमहावाक्यार्थं प्रकटीकरोति ॥ प्रज्ञानरहितसन्यासनिर्मित इत्यादिः ।

समाप्तिः । अथर्वणवेदात्सांख्यदर्शनपातंजलदर्शन(ने) उपदर्शनमंत्रशास्त्राणीति संक्षेपाद्ब्रह्मस्वरूपनिरूपणमिति ॥ ब्रह्मानंदे क्षुद्रानंदादीनामंतर्भूतत्वादिति श्रुतेः ॥ ॥ इति श्रीवेदांतप्रकरणे अथर्वणवेदवाक्यब्रह्मशब्दनिर्णयो नाम त्रयोदशः सिद्धांतः ॥ १३ ॥

---

**No. 179.** ग्रंथनाम, **पूर्णचंद्रोदयः.** Name: Pûrṇa-chandrodaya.

पत्राणि ५६, folios 56; पंक्तय ८, lines 8; अक्षराणि १६, letters 16.

शकः १६३८, दुर्मुखनामसंवत्सरे चैत्रकृष्णामावास्यायां. Śaka 1638.

कर्ता, **नारायणेंद्रसरस्वती.** Author, Nârâyaṇendra-sarasvatî.

आरंभः । विचार्य सर्ववेदांतैः संचार्य त्हृदयांबुजे ॥ प्रचार्य सर्वलोकेषु ह्याचार्यं शंकरं भजे ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ इह खलु ब्रह्मचारिगृहस्थवानप्रस्थपूजनीयचरणारविंदानां परमहंसपरिव्राजकानामित्यादिः ।

समाप्तिः । श्रीगुरुवदनकनककमलमकरंदमुक्ताफलायमानोंकारोपदेशप्रभावप्रतापाविष्करणैरिति सर्वं कमनीयं ॥ ग्रंथप्रशंसाश्लोकाः ॥ ८ ॥ पूर्णचंद्रोदयं नाम वाङ्मयं कुसुमांजलिं ॥ नानाविधार्थसौरभ्यमाधुर्यमकरंदकं ॥ १ ॥ २ ॥ ३ ॥ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ परस्पराभिदात्मानौ परस्परनातिप्रियौ ॥ वृषाकपायीभर्त्तारौ वंदेमहि वृषाकपी ॥ ८ ॥ ॥ इति श्रीमत्परमहसपरिव्राजकाचार्यश्रीभगवन्नारायणेंद्रसरस्वतीविरचितः पूर्णचंद्रोदयो नाम ग्रंथः समाप्तः ॥

---

**No. 180.** ग्रंथनाम, **ब्रह्मतर्कस्तवः तद्विवरणं च.** Name: Brahma-tarka-stava, with a Commentary.

पत्राणि ५०, folios 50; पंक्तयः ११, lines 11; अक्षराणि ४०, letters 40.

संवत् १७४१ ज्येष्ठशुद्धषष्ठ्यां भृगौ. Saṁvat 1741.

विवरणकर्ता, **अप्पयदीक्षितः.** Commentator, Appayadîkshita.

आरंभः । उच्चावचैरुपनिषद्वचनप्रकांडैरुन्मीलितश्रुतिगणैरुपबृंहणैश्च ॥ यस्मादरं समुदितं यमिनामुपास्यं तद्ब्रह्म शंकर भवानिति तर्कयामः ॥ १ ॥ इत्यादिः ।

टीकारंभः । अथ ब्रह्मतर्कस्तवस्य नातिविस्तरं विवरणं क्रियते ॥ तत्र स्तोत्रप्रतिपाद्यसकलार्थप्रतिज्ञापरोयमाद्यश्लोकः ॥ इत्यादिः ।

समाप्तिः । ब्रह्मोपेंद्रप्रमुखविनुतब्रह्मतर्कस्तवोयं भक्तिग्राह्यस्त्वमिति भगवान्निर्मितो भक्तिमात्रात् ॥ अंघ्रिद्वंद्वे तव करुणया निर्गुणोपि त्वदीये पूजापुष्पप्रकरपदवीमेष पुष्णातु नित्यं ॥ इत्यंतः ।

टीकांतः । शिवस्य भक्तिग्राह्यत्वं भावग्राह्यमनीडाख्यं भावानावरकं शिवमिति श्वेताश्वतरोपनिषन्मंत्रेण ॥ कृतकृत्यस्य तृप्तस्य मम किं क्रियते नरैः ॥ बहिर्वाभ्यंतरे वाथ मया भावो हि गृह्यत इत्यादिशिववचनैश्च प्रसिद्धं ॥ ॥ इति श्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरंगराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ ब्रह्मतर्कस्तवविवरणं समाप्तं ॥ ॥

---

**No. 181.** ग्रंथनाम, **भगवद्गीता सटीका.** Name: Bhagavadgîtâ, with a Commentary.

पत्राणि ११६, folios 116; पंक्तयः १३ वा १० वा ८ वा ९; lines 13, 10, 8, 9; अक्षराणि ४८, letters 48.

टीकाकारः, **श्रीधरस्वामी.** Commentator, Śrîdhara-svâmî.

टीकाप्रारंभः । शेषाशेषमुखव्याख्याचातुर्यं त्वेकवक्त्रतः ॥ दधानमद्भुतं वंदे परमानंदमाधवं ॥ १ ॥ श्रीमाधवं प्रणम्योमाधवं विश्वेशमादरात् ॥ तद्भक्तियंत्रितः कुर्वे गीताव्याख्यां सुबोधिनीं ॥ २ ॥ ३ ॥ ४ ॥ इह खलु सकललोकवंदितचरणो विहितावतारः परमकारुणिको भगवान् देवकीनंदनस्तत्वाज्ञानविजृंभितशोकमोहभ्रंशितविवेकतया निजधर्मत्यागपरधर्माभिसंधिपरमर्जुनं धर्मज्ञानरहस्योपदेशप्लवेन तस्माच्छोकमोहसागरादुद्दधार ॥ इत्यादिः ।

टीकोपसंहारः । देहांते देवः परं ब्रह्म तारकं व्याचष्टे यमेवैष वृणुते तेन लभ्य इत्यादिश्रुतिस्मृतिपुराणवचनान्येवं संति समंजसानि भवंति ॥ तस्माद्भगवद्भक्तिरेव मोक्षहेतुरिति सिद्धं ॥ तेनैवे (व) दत (त्त) या भक्त्या तद्गीतानि (वि) वृं(वृ) तिः कृता ॥ अग्रे श्लोकद्वयं ॥ १ ॥ २ ॥ इति श्रीभगवद्गीताटीकायां सुबोधिन्यां श्रीधरस्वामिविरचितायां परमार्थनिर्णयो नामाष्टादशोध्यायः ॥ १८ ॥

---

**No. 182.** ग्रंथनाम, **भामत्यां द्वितीयोध्यायः.** Name: Bhâmatî, Chapter II.

पत्राणि ५८, folios 58; पंक्तयः १६, lines 16; अक्षराणि ५४, letters 54.

संवत् १८०३. Saṁvat 1803.

कर्ता, **वाचस्पतिमिश्रः**. Author, Vâchaspatimiśra.

आरंभः । आद्यपत्राभावाद् द्वितीयपत्राल्लिख्यते । न चैताः प्रधानादिप्रतिपादनपराः शक्यंते इत्यन्यथापितुः( अन्यथयितुं ) ॥ तस्मात्तदनुरोधेन कथंचिच्छ्रुतय एव नेतव्या इत्यादिः ।

समाप्तिः । वैशेष्यात्तु तद्वादस्तद्वादः ॥ त्रिवृत्करणाविशेषेपि यस्य च भूयस्त्वं तेन तस्य व्यपदेश इत्यर्थः ॥ ॥ इति श्रीवाचस्पतिमिश्रविरचिते श्रीभगवत्पादशंकरशारीरकभाष (ष्य) विभागे भामत्यां द्वितीयाध्यायस्य चतुर्थः पादः समाप्तः ॥ इत्यंतः ।

---

**No. 183.** ग्रंथनाम, **भामत्यां तृतीयोध्यायः**. Name: Bhâmatî, Chapter III.

पत्राणि ५९, folios 59; पंक्तयः १७, lines 17; अक्षराणि ४६, letters 46.

संवत् १८३४, सोमवारे. Saṁvat 1834.

कर्ता, **वाचस्पतिमिश्रः**. Author, Vâchaspatimiśra.

आरंभः । तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां द्वितीयतृतीयाध्याययोर्हेतुहेतुमद्भावलक्षणं संबंधं दर्शयन् सुखावबोधार्थं संक्षेपमाह द्वितीयेध्याय इति ।

समाप्तः । तस्मान्मुक्त्यवस्थायामेकरूपावधृतेर्मुक्तिलक्षणस्य फलस्याविशेषो मुक्त इति ॥ ॥ इति वाचस्पतिविरचिते शारीरकभगवत्पादभाष्यविभागे भामत्यां तृतीयोध्यायः समाप्तः ॥

---

**No. 184.** ग्रंथनाम, **मानसोल्लासः**. Name: Mânasollâsa.

पत्राणि २१, folios 21; पंक्तयः १०, lines 10; अक्षराणि ३०, letters 30.

टीकाकारः, **सुरेश्वरः**. Commentator, Sureśvara.

आरंभः । विश्वं दर्पणदृश्यमाननगरीतुल्यं निजांतर्गतं पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ॥ यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ १ ॥ इत्यादिः ।

टीकारंभः । मंगलं दिशतु मे गणाधिपो मंगलं दिशतु मे सरस्वती ॥ मंगलं दिशतु मे महेश्वरो मंगलं दिशतु मे महेश्वरी ॥ १ ॥ आत्मलाभात्परो लाभो

नास्तीति मुनयो विदुः ॥ तल्लाभार्थं कविः स्तौति स्वात्मानं परमेश्वरं ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ सर्वज्ञः सर्वकर्ता च कथमात्मा भविष्यति ॥ शिष्यं प्रतीत्थं पृच्छंतं वक्तुं प्रारभते गुरुः ॥ ७ ॥ इत्यादिः ।

उपसंहारः । परिच्छिन्नमहंभावं परित्यज्यानुषंगिकं ॥ पूर्णाहंभावलाभोस्य स्तोत्रस्य फलमुच्यते ॥ १ ॥ इति ।

दृष्टांतः । प्रकाशात्मिकया शक्त्या प्रकाशप्रभवाकरः ॥ प्रकाशयति यो विश्वं प्रकाशोयं प्रकाशतां ॥ २४ ॥ इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादके प्रबंधे मानसोल्लासे दशमोल्लाससंग्रहः ॥ २५ ॥ मंगलं दिशत्विति स एव श्लोकः ॥ २६ ॥ इति श्रीमत्सुरेश्वरभगवद्विरचिते मानसोल्लासवार्तिके दशम उल्लासः समाप्तः ॥ समाप्तं ॥

---

No. 185. ग्रंथनाम, **विष्णुभक्तिचंद्रोदयः**. Name: Vishṇubhakti-chandrodaya.

पत्राणि ११९, folios 119; पंक्तयः ९, lines 9; अक्षराणि ३२, letters 32.

कर्ता, **नारसिंहारण्यमुनिः**. Author, Nârasiṁhâraṇya-muni.

आरंभः । वंदे श्रीमन्नृसिंहेशपुण्यारण्यं गुरूत्तमं ॥ श्रीसाममंत्रराजं च वैष्णवाह्लादसिद्धये ॥ १ ॥ आविर्बभूव लोकेस्मिन् सद्भक्ताह्लाददायकः ॥ श्रीविष्णुभक्तिचंद्रोदयो विष्णुप्रेमवर्द्धनः ॥ २ ॥ इत्यादिः ।

समाप्तिः । प्रमुदिताननैर्महाभागवतैः श्रद्धया भगवद्रथस्य प्रेरणमाकर्षणं च कार्यं ॥ उक्तं च ॥ रथस्याकर्षणं पूर्वं कुर्वते दैत्यनायकाः ॥ ततः सुराः सिद्धसंघा यक्षगंधर्वमानवाः ॥ इति ॥ ॥ इति श्रीनारसिंहारण्यमुनिविरचिते श्रीविष्णुभक्तिचंद्रोदये पंचदशी कला ॥ ॥

---

No. 186. ग्रंथनाम, **विष्णुसहस्रनामभाष्यं**. Name: Vishṇu-sahasra-nâma-bhâshya.

पत्राणि ४७, folios 47; पंक्तयः १२, lines 12; अक्षराणि ४८, letters 48.

कर्ता, **शंकराचार्यः**. Author, Śaṅkarâchârya.

आरंभः । सच्चिदानंदरूपाय कृष्णायाक्लिष्टकारिणे ॥ नमो वेदांतवेद्याय गुरवे बुद्धिसाक्षिणे ॥ १ ॥ यस्य स्मरणमात्रेणेति० ॥ २ ॥ कृष्णद्वैपायनं व्यासमिति० ॥ ३ ॥ सहस्रमूर्तेः पुरुषोत्तमस्य सहस्रनेत्राननपादबाहोः ॥ सहस्रनाम्नः

स्तवनं प्रशस्तं निरुच्यते जन्मजरादिशांत्यै ॥ ४ ॥ धर्मानभ्युदयानिःश्रेयसोत्पत्तिहेतुभूतान् वेदलक्षणानशेषेणेत्यादिः ।

समाप्तिः । आदरेण यथा स्तौति धनवंतं धनेच्छया ॥ तथा चेद्विश्वकर्तारं को न मुच्येत बंधनादिति व्यासवचनात् ॥ सहस्रनामसंबद्धा व्याख्या सर्वसुखावहा ॥ श्रुतिस्मृतिन्यायमूला रचिता हरिपादयोः ॥१॥ ॥ इति श्रीशंकराचार्यविरचिता सहस्रनामविवृतिः समाप्ता ॥ ॥

---

**No. 187.** ग्रंथनाम, **वेदांतकल्पलतिकाप्रथमस्तबकः.** Name: The first Stabaka of the Vedânta-kalpa-latikâ.

पत्राणि ४८, folios 48; पंक्तयः ११, lines 11; अक्षराणि ३०, letters 30.

आरंभः । मीमांसया कपटतो भुजगांबयेव स्वाधीनतामुपनिषाद्विनतेव नीता ॥ येनोद्धृतामृतफलेन गरुत्मतेव तस्मै नमो भगवतेऽद्भुतशंकराय ॥ १ ॥ २ ॥ ॥ ३ ॥ ४ ॥ मुमुक्षूणामनुष्ठेयं विक्षेपविनिवृत्तये ॥ मोक्षं ससाधनं वच्मि परपक्षनिरासतः ॥ ५ ॥ अथ मोक्षे तत्साधने च विप्रतिपद्यंते विपश्चितः । तत्र लोकायतिकास्तावत् प्राकृतलोकानुसारिणो मनुष्यत्वादिविशिष्ट इत्यादिः ।

समाप्तिः । तत्साधनं च वेदांतवाक्यकरणकोन्यानुपरक्तब्रह्मात्मैक्यसाक्षात्कार एव श्रवणाद्यपनीतप्रतिबंधः सन्निति सर्वं समंजसं ॥ न्यायैर्निर्धूय दुष्टानिह कपिलकणादाक्षि(क्ष) पादादिवादानादायादुष्टमेकं श्रुतिमितममृतद्वारमद्वैतवादं ॥ वेदांतैकप्रमेयं परमसुखमयं ज्ञानमज्ञानशून्यं मोक्षं व्याचक्षते यं कमपि सुकृतिनः सोहमेवास्मि पूर्णः ॥ १ ॥ इति वेदांतकल्पलतिकायां प्रथमः स्तबकः ॥

---

**No 188.** ग्रंथनाम, **वेदांतदीपिका.** Name: Vedânta-dîpikâ.

पत्राणि १६, folios 16; पंक्तयः ११, lines 11; अक्षराणि ३०, letters 30.

कर्त्ता, **शंकराचार्यः.** Author, Śankarâchârya.

आरंभः । निमित्तं मनश्चक्षुरादिप्रवृत्तौ निरस्ताखिलोपाधिराकाशकल्पः ॥ रविर्लोकचेष्टानिमित्त यथा यः स नित्योपलब्धिस्वरूपो महात्मा ॥ १ ॥ इत्यादिः ।

अंतः । उपाधौ यथा भेदता सन्मणीनां तथा भेदिता बुद्धिभेदेषु तेपि ॥ यथा चंद्रिकाणां जले चंचलत्वं तथा चंचलत्वं तवापीह विष्णो ॥ १२ ॥ इत्यंतः ।

टीकारंभः । रामं सर्वगुणातीतं मायागुणसमाश्रयं ॥ नत्वा वेदांतसिद्धांतदीपिकेयं प्रतन्यते ॥ १ ॥ आपातकृतन्यासानां विप्राणामल्पमेधसां ॥ सुखं ब्रह्मपदं गंतुमियमेव भविष्याति ॥२॥ इह यथा रज्जवज्ञा[ना]त्सर्प एव भासते तत्तत्वज्ञानाद्बो-

पशाम्यत्येवमात्माज्ञानादिदं स्वप्नप्रभं जगदधिष्ठे(?)ब्रह्मण्याभासते तत्त[त्व]ज्ञानेन च निवृत्तिमेतीत्यभिप्रेत्य संसारदावानलविप्लुष्टांतःकरणस्य विषयसुखमपि दुः[ख]पक्षे निक्षिप्य हिरण्यगर्भादिसुखेष्वप्युद्विग्नचित्तस्य सर्वमूलाज्ञाननिवृत्तौ यतमानस्य त-न्निवर्तकतत्वज्ञानोत्पत्तौ जीवपरमा[त्म]नोरभेदभावनामुपदिशत्याचार्यः । इत्यादिः ।

टीकांतः । न शंकावकाशलेशोपीति सर्वमवदातं ॥ १२ ॥ शंकराचार्य उवाच ॥ कस्त्वं शिशो कस्य कुतोसि गंता किं नाम ते त्वं कुत आगतोसि ॥ एतन्मयोक्तं वद चार्भक त्वं मत्प्रीतये प्रीतिविवर्द्धनोसि ॥ १ ॥ हस्तामलक उवाच ॥ नाहं मनुष्यो न च देवयक्षो न ब्राह्मणक्षत्रियवैश्यशूद्रः ॥ न ब्रह्मचारी न गृही वनस्थो भिक्षु-र्न चाहं निजबोधरूपः ॥ २ ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविं-दभगवत्पूज्यपादश्रीमच्छंकराचार्यविरचिता वेदांतदीपिका समाप्ता ॥ ॥

---

**No. 189.** ग्रंथनाम, **वेदांतसारः**. Name: Vedânta-sâra.

पत्राणि १५, folios 15; पंक्तयः ८, lines 8; अक्षराणि ५०, letters 50.

कर्त्ता, **सदानंदसरस्वती** Author, Sadânanda-sarasvatî.

आरंभः । अखंडसच्चिदानंदमवाङ्मनसगोचरं ॥ आत्मानमखिलाधारमाश्रये-भीष्टसिद्धये ॥ १ ॥ अर्थतोप्यद्वयानंदानतीतद्वैतभानतः ॥ गुरूनाराध्य वे-दांतसारं वक्ष्ये यथामति ॥ ॥ २ ॥ वेदांतो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि चेत्यादिः ।

उपसंहारः । न तस्य प्राणा उत्क्रामंति ॥ अत्रैव समवलीयंते ॥ विमुक्तश्च विमुच्य इत्यादिश्रुतेः ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यसदानंदसरस्वती-विरचितो वेदांतसारः समाप्तः ॥

---

**No. 190.** ग्रंथनाम, **वेदान्तसारस्य टीका सुबोधिनी.** Name: Subo-dhinî, a Commentary on the Vedânta-sâra.

पत्राणि ४३, folios 43; पंक्तयः ८, lines 8; अक्षराणि ४४, letters 44.

आरंभः । कृष्णानंदं गुरुं नत्वा परमानंदमद्वयं ॥ वक्ष्ये वेदांतसारस्य टीकां नाम्ना सुबोधिनीं ॥ १ ॥ इह खलु कश्चिन्महापुरुषो नित्याध्ययनविध्यधीतस-कलवेदराशीनामित्यादिः ।

अन्तः । यस्मिन् देहे दृढं ज्ञानमपरोक्षं विजायते ॥ तद्देहपातपर्यंतमेव संसार-दर्शनं ॥ १ ॥ पुरापि नास्ति संसार–अस्याग्रिमपत्राभावान्नोपसंहारो लिखितः पूर्णः ।

**No. 191.** ग्रंथनाम, **वैयासिकन्यायमाला सटीका प्रथमाध्यायः.**

**Name**: Vaiyâsika-nyâya-mâlâ, with a Commentary, Chapter I.

पत्राणि २६, folios 26; पंक्तयः ९, lines 9; अक्षराणि ५८, letters 58.

ग्रंथसंख्या, ८४८.

सूत्रकारो, **व्यासः.** Author, Vyâsa. टीकाकारो, **भारतीतीर्थमुनिः.** Commentator, Bhâratî-tîrtha-muni.

आरंभः। प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणं ॥ वैयासिकन्यायमाला श्लोकैः संगृह्यते स्फुटं ॥ १ ॥ इत्यादिः।

॥ अथातो ब्रह्मजिज्ञासा ॥ १ ॥

टीकारंभः। प्रारिप्सितग्रंथस्याविघ्नेन परिसमाप्त्यर्थं प्रचयगमनाय शिष्टाचारपरिपालनाय च विशिष्टेष्टदेवतातत्वं गुरुमूर्त्युपाधियुक्तं नमस्कृत्य ग्रंथारंभं प्रतिजानीते ॥ प्रणम्येति ॥ व्यासेन प्रोक्ता वैयासिकाः वेदांतवाक्यार्थनिर्णायकान्यधिकरणानि न्यायास्तेषामित्यादिः।

अंतः। एतेन सर्वे व्याख्याता व्याख्याताः ॥ ८ ॥

शून्याण्वादिष्वेकबुद्ध्या सर्वबुद्धिर्न युज्यते ॥ स्युर्ब्रह्मण्यपि धानाद्यास्ततो ब्रह्मैव कारणं ॥ १६ ॥

टीकांतः। असच्छब्दश्च नामरूपराहित्याभिप्रायश्चतुर्थाधिकरणे वर्णितः स्वभावकालौ तु पूर्वपक्षत्वेन श्रुत्योपन्यस्तौ ॥ तस्माद्ब्रह्मैव श्रुत्याभिहितं जगत्कारणं न परमाण्वादीति सिद्धं ॥ १६ ॥ ॥ इति श्रीभारतीतीर्थमुनिप्रणीतायां वैयासिकन्यायरत्नमालायां प्रथमोध्यायः ॥ ॥

---

**No. 192.** ग्रंथनाम, **वैयासिकन्यायमाला सटीका द्वितीयाध्यायः.**

**Name**: Vaiyâsika-nyâya-mâlâ, with a Commentary, Chapter II.

पत्राणि २५, folios 25; पंक्तयः ९, lines 9; अक्षराणि ५४, letters 54.

ग्रंथसंख्या, ७८९.

सूत्रकारो, **व्यासः.** Author, Vyâsa. टीकाकारो, **भारतीतीर्थमुनिः** Commentator, Bhâratî-tîrtha-muni.

आरंभः। ॥ स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् ॥ १ ॥

सांख्यस्मृत्यास्ति संकोचो न वा वेदसमन्वये ॥ धर्मवेदः सावकाशः संकोच्योनवकाशया ॥ १ ॥ इत्यादिः।

टीकारंभः । द्वितीयाध्यायस्य प्रथमपादे प्रथमाधिकरणमारचयति ॥ सांख्यस्मृत्येति ॥ अस्मिन् पादे सर्वेष्वधिकरणेषु पूर्वाध्यायोक्तः समन्वयो विषय इत्यादिः ।

अंतः । ॥ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ ९ ॥

जीवान्वयप्रवेशेन सन्निधेः सर्वसर्जने ॥ जीवोऽशक्तः शक्त ईश उत्तमोक्तिस्तथेक्षितुः ॥ १८ ॥

टीकांतः । तस्मादीश्वर एव नामरूपयोः स्रष्टा ॥ कथं तर्हि घटपटादौ कुलालादेर्निर्मातृत्वं ईश्वरप्रेरणादिति ब्रूमः ॥ तस्मादीश्वर एव सर्वकर्तेति सिद्धं ॥ १८ ॥

॥ इति श्रीम० भारतीतीर्थमुनिप्रणीतायां वैयासिकन्यायमालायां द्वितीयोध्यायः ॥ ॥

---

No. 193. ग्रंथनाम, **वैयासिकन्यायमाला सटीका तृतीयोध्यायः**. Name: Vaiyâsika-nyâya-mâlâ, with a Commentary, Chap. III.

पत्राणि ३७, folios 37; पंक्तयः ९, lines 9; अक्षराणि ५८, letters 58.

ग्रंथसंख्या, ११६७.

सूत्रकारो, **व्यासः**; टीकाकारो, **भारतीतीर्थमुनिः**. Author, Vyâsa; Commentator, Bhâratî-tîrtha-muni.

आरंभः । तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां ॥ १ ॥ अवेष्टितो वेष्टितो वा भूतसूक्ष्मैः पुमान् व्रजेत् ॥ भूतानां सुलभत्वेन यात्यवेष्टित एव सः ॥ १ ॥ इत्यादिः ॥

टीकारंभः । तृतीयाध्यायस्य प्रथमपादे प्रथमाधिकरणमारचयति ॥ पूर्वपादप्रतिपादितप्राणोपाधिको जीवः शरीरांतरप्राप्तिवेलायां इतो निर्गच्छन् भाविशरीरबीजैः सूक्ष्मभूतैरवेष्टितो गच्छति पंचभूतानां सर्वत्र सुलभत्वेनेतो नयनस्य निरर्थकत्वादित्यादिः ॥

अंतः ॥ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ १७ ॥ ब्रह्मैव मुक्तिर्न ब्रह्म क्वचित्सातिशयं स्मृतं ॥ अंत एकविधा मुक्तिर्वेधसो मनुजस्य वा ॥ ३६ ॥ इत्यंतः ।

टीकांतः । तस्माच्चतुर्मुखस्य मनुष्यस्य च मुक्तिरेकविधैव ॥ सालोक्यादिविशेषस्तु जन्यरूपत्वादुपासनातारतम्येन सातिशयो भविष्यति मुक्तिस्तु न तादृ-

शीति सिद्धं ॥ ३६ ॥ ॥ इति श्री ० भारतीतीर्थमुनिप्रणीतायां वैयासिकन्याय-यमालायां तृतीयोध्यायः ॥ ३ ॥

---

**No. 194.** ग्रंथनाम, **वैयासिकन्यायमाला सटीका चतुर्थोध्यायः.** Name: Vaiyâsika-nyâya-mâlâ, with a Commentary, Chap. IV.

पत्राणि २०, folios 20; पंक्तयः ७, lines 7; अक्षराणि ५६, letters 56.

ग्रंथसंख्या, ४९०.

शकः १७४१. S'aka 1741.

सूत्रकारो, **व्यासः**; टीकाकारो, **भारतीतीर्थमुनिः.** Author, Vyâsa; Commentator, Bhâratî-tîrtha-muni.

आरंभः । आवृत्तिरसकृदुपदेशात् ॥ १ ॥
श्रवणाद्याः सकृत्कार्या आवृत्त्या वासकृद्यतः ॥ शास्त्रार्थस्तावता सिध्येत्प्रयाजादौ सकृत्कृतेः ॥ १ ॥ इत्यादिः ।

टीकारंभः । चतुर्थाध्याये प्रथमपादे प्रथमाधिकरणमारचयति ॥ सकृत्कृते कृतः शास्त्रार्थ इति न्यायेन श्रवणादीनां प्रयाजादिवत् सकृदेवानुष्ठानमित्यादिः ।

अंतः । जगद्व्यापारवर्ज्यं [जं] प्रकरणादसन्निहितत्वाच्च ॥ ७ ॥
सृष्टावप्रकृतत्वेन स्रष्टृता नास्ति योगिनां ॥ स्वाराज्यमीशो भोगाय ददौ मुक्तिं च विद्यया ॥ १४ ॥ इत्यंतः ।

टीकांतः । तस्माज्जगत्सृष्टौ स्वातंत्र्याभावेपि भोगमोक्षयोस्तेषां स्वातंत्र्यमस्तीत्यशेषं मंगलं ॥ १४ ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिप्रणीतायां वैयासिकन्यायमालायां चतुर्थाध्यायस्य चतुर्थः पादः ॥ समाप्तोयं ग्रंथः ॥

---

**No. 195.** ग्रंथनाम, **वैराग्यशतकं.** Name: Vairâgya-s'ataka.

पत्राणि ६, folios 6; पंक्तयः २२, lines 22; अक्षराणि २०, letters 20.

शकः १७६७. Śaka 1767.

कर्ता, **अप्पयदीक्षितः.** Author, Appayadîkshita.

आरंभः । आस्ते कश्चन भिक्षुः संगृह्णन्व्ययानि दश ॥ न ममेत्य [न्य] यमुगलं याचामस्तं किमस्त्यन्यत् ॥ १ ॥ धीसचिवं धैर्यबलं संकल्पविरोधि शांतिधनं ॥ विश्वत्रयविषयमिदं वैराग्यं नाम साम्राज्यं ॥ २ ॥

समाप्तिः । बद्धः कस्ते वक्ष्यति मुक्तो मुक्तिं विजानाति ॥ यास्यसि चेदविमुक्तं ज्ञास्यसि विश्वेश्वरस्य मुखात् ॥ १०० ॥ न गृहीतं श्रुतिहृदयं न च निगृहीतं परिप्लवं हृदयं ॥ इच्छामि च धाम परं गच्छामि तु विश्वनाथपुरं ॥ १ ॥ ॥ इति श्रीमदप्पय्यदीक्षितकृतं वैराग्यशतकं संपूर्णं ॥ ॥

---

**No. 196.** ग्रंथनाम, **शारीरकभाष्यप्रथमाध्यायस्य प्रथमः पादः, टीका रत्नप्रभा च.** Name: The First Pâda of the First Chapter of the Sârîraka-bhâshya, with a Commentary entitled the Ratnaprabhâ.

पत्राणि १०९, folios 109; पंक्तयः ९ वा १० वा ११ वा १२, lines 9, 10, 11, 12; अक्षराणि ६१ वा ५०, letters 61, 50.

कर्ता, **शंकराचार्यः**; टीकाकारो, **गोविंदानंदः**. Author, S'ankarâchârya; Commentator, Govindânanda.

आरंभः । युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायामित्यादिः ।

टीकारंभः । यमिह कारुणिकं शरणं गतोप्यरिसहोदर आप महत्पदं ॥ तमहमाशु हरिं परमाश्रये जनकजांकमनंतसुखाकृतिं ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ विस्तृतग्रंथवीक्षायामलसं यस्य मानसं ॥ व्याख्या तदर्थमारब्धा भाष्यरत्नप्रभाभिधा ॥ ६ ७ ॥ ८ ॥ इह खलु स्वाध्यायोध्येतव्य इति नित्याध्ययनविधिनाऽधीतसांगस्वाध्याये तद्विजिज्ञासस्व सोन्वेष्टव्य इत्यादिः ।

उपसंहारः । अन्यत्रापि मनोमयः प्राणशरीर इत्यादावुपाधिधर्मेण ब्रह्मण उपासनमाश्रितमिहापि युज्यते वाक्यस्योपक्रमसंहाराभ्यामेकार्थत्वावगमात्प्राणप्रज्ञाब्रह्मलिंगावगमाच्च ॥ तस्माद्ब्रह्मवाक्यमेतदिति सिद्धं ॥ ॥ इति श्रीमच्छारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ प्रथमाध्यायस्य प्रथमः पादः ॥

टीकांतः । अन्ये गुणविधय इति स्वीकृत्यैकवाक्यत्वं त्याज्यं तच्चायुक्तं ॥ उपक्रमादिनैकवाक्यतानिर्णयात् ॥ तस्माज्ज्ञेयं [प्रत्य] कुब्रह्मपरमिदं वाक्यमित्युपसंहरति ॥ तस्मादिति ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंदभगवत्पादकृतौ श्रीमच्छारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां प्रथमाध्यायस्य प्रथमः पादः ॥ ॥

---

**No. 197.** ग्रंथनाम, **शारीरकभाष्यस्य प्रथमाध्यायः.** Name: Chapter I of the S'ârîraka-bhâshya.

पत्राणि १६९, folios 165; पंक्तयः ८ वा ९, lines 8, 9; अक्षराणि ४०, letters 40.

कर्ता, **शंकराचार्यः**. Author, Sankarâchârya.

आरंभः । युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोरित्यादिः प्रथमपादस्य ॥

समाप्तिः । एतेन प्रधानकारणवादप्रतिषेधन्यायकलापेन सर्वे चाण्वादिकारणवादा अपि प्रतिषिद्धतया व्याख्याता वेदितव्यास्तेषामपि प्रधानवदशब्दत्वाच्छब्दविरोधित्वाच्चेति ॥ व्याख्याता इति पदाभ्यासोध्यायपरिसमाप्तिं द्योतयति ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरकृतौ शारीरकमीमांसाभाष्ये प्रथमाध्यायस्य चतुर्थश्चरणः ॥ समाप्तश्चायं प्रथमोध्यायः ॥

---

**No 198.** ग्रंथनाम, **शारीरकभाष्यद्वितीयाध्यायः**. Name: Chapter II of the Sârîraka-bhâshya.

पत्राणि १२१, folios 121; पंक्तयः ९, lines 9; अक्षराणि ४२, letters 42.

कर्ता, **शंकराचार्यः**. Author, Sankarâchârya.

आरंभः । स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् ॥ प्रथमेध्याये सर्वज्ञः सर्वेश्वरो जगत उत्पत्तिकारणं मृत्सुवर्णादय इव इत्यादिः ।

समाप्तिः । तस्मात्सत्यपि त्रिवृत्करणे वैशेष्यादेष तेजोबन्नविशेषवादो भूतभौतिकविषय उपपद्यते तद्वा[द]स्तद्वाद इति पदस्याभ्यासोऽध्यायपरिसमाप्तिं द्योतयति ॥ ॥ इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीशंकरभगवत्पादकृतौ द्वितीयाध्यायस्य चतुर्थः पादः ॥ ॐ तत्सत् ॥

---

**No. 199.** ग्रंथनाम, **शारीरकभाष्यतृतीयाध्यायः**. Name: Chapter III of the Sârîraka-bhâshya.

पत्राणि १३६, folios 136; पंक्तयः ९ वा १०, lines 9, 10; अक्षराणि ३८, letters 38.

कर्ता, **शंकराचार्यः**. Author, Sankarâchârya.

आरंभः । तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां ॥ द्वितीयेऽध्याये स्मृतिन्यायविरोधो वेदांतविहिते ब्रह्मदर्शने परिहृत इत्यादिः ।

समाप्तिः । न हि गतिरधिकास्ति कस्यचित्सति हि गुणे प्रवदंत्यतुल्यतामिति ॥ तदवस्थावधृतेस्तदवस्थावधृतेरिति पदाभ्यासोध्यायपरिसमाप्तिं द्योतयति ॥ १९३ ॥

॥ इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छंकरभगवत्कृतौ तृतीयाध्यायस्य चतुर्थः पादः ॥ ॥ समाप्तश्चायं तृतीयोऽध्यायः ॥ ३ ॥

---

**No. 200.** ग्रंथनाम, **शारीरकभाष्यचतुर्थाध्यायः**. Name: Chapter IV of the Sârîraka-bhâshya.

पत्राणि ३६, folios 36; पंक्तयः १०, lines 10; अक्षराणि ४६, letters 46.

शकः। शाकेंद्रस्मेषुभूमाने १५१६ कृष्णसूनुर्विनायकः ॥ श्रीशारीरकमीमांसाभाष्यपुस्तकमालिखत् ॥ १ ॥ Saka 1516.

कर्ता, **शंकराचार्यः**. Author, Śankarâchârya.

आरंभः। आवृत्तिरसकृदुपदेशात् ॥ तृतीयेऽध्याये सगुणनिर्गुणासु विद्यासु साधनाश्रयो विचारः प्रायेणात्यगात् ॥ अथेह चतुर्थे फलाश्रय आगमिष्यति ॥ प्रसंगागतं चान्यदपि च किंचित् चिंतयिष्यति इत्यादिः।

समाप्तिः। सम्यग्दर्शनविध्वस्ततमसां तु नित्यसिद्धनिर्वाणपरायणानां सिद्धैवानावृत्तिस्तदाश्रयणेनैव हि सगुणपरायणानामप्यनावृत्तिसिद्धिरिति अनावृत्तिः शब्दादनावृत्तिः शब्दादित्यभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ॥ ॥ इति श्रीशारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ॥ ॥

---

**No. 201.** ग्रंथनाम, **सनत्सुजातं भारतीयं सटीकं.** Name: The Sanatsujâta, a portion of the Mahâbhârata, with a Commentary.

पत्राणि ३५, folios 35; पंक्तयः ११, lines 11; अक्षराणि ५१, letters 51.

संख्या, १२६९.

टीकाकारः, **श्रीधरस्वामी.** Commentator, Śrîdharasvâmî.

टीकारंभः। वैशंपायनमुख्यानां व्याख्यासारसमुद्धृतेः ॥ सनत्सुजातवाक्यानां व्याख्येयं क्रियते मया ॥ १ ॥ तत्र तावत्प्रसंगार्थं पूर्ववृत्तमनूद्यते ॥ यदा संजयः समागत्य पांडवानां बलं च युद्धोद्यमं संक्षेपतो वर्णयित्वेत्यादिः।

टीकांतः। तं पितरं जनकं स्वकारणभूतं प्रन्हरे पुष्करे हृत्पुंडरीके निहितं स्थितं कवयो विदुः जानाति ॥ ॥ इति श्रीमहाभारते० सनत्सुजातीये आख्याने श्रीधरस्वामिविरचितायां टीकायां षष्ठोध्यायः ॥ सनत्सुजातवाक्यानां व्याख्येयं बालबोधिनी ॥ न्यूनाधिकविवेकेन सद्भिः शोध्या यथोचितं ॥ १ ॥ इत्यंतः।

---

**No. 202.** ग्रंथनाम, **सप्तशती शांतनवीटीकासहिता.** Name: The Sapta-śatí, with the Commentary of Śantanu.

पत्राणि १४२, folios 142; पंक्तयः १५ वा १३ वा ९ वा ८ वा १४, lines 15, 13, 9, 8, 14; अक्षराणि ४४ वा ४८, letters 44, 48.

टीकाकारः, **शन्तनुः.** Commentator, Śantanu.

आरंभः । सुप्रसिद्धत्वादुपेक्षितः ।

उपसंहारः । अयमपि तथा ।

टीकारंभः । ब्रह्मा यस्यै हरिर्यस्यै रुद्रो यस्यै व्यधान्नमः ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १ ॥ २ ॥ ३ ॥ मार्कंडेयपुराणोक्तं देवीमाहात्म्यमद्भुतं ॥ अल्पाक्षरमनल्पार्थमपपाठपराङ्मुखं ॥ ४ ॥ शुभंयुः शंतनुः शंयुः सत्कीर्तिस्तोमरान्वयः ॥ व्याकरोति पराकृत्य कुव्याख्यानपरंपरां ॥ ५ ॥ इत्यादिः ।

टीकांतः । मनुरित्ययं सप्तशतिकास्वरूपो महामालामंत्रः सर्वेषामधायतां (?) सर्वकामधुगिति सूचयितुमवसाने प्रायोजि भगवता श्रीमार्कंडेयेनेति सिद्धं ॥ १७ ॥ इति श्रीराजाधिराजतोमरान्वयश्रीमदुद्धरणात्मजशंतनुचक्रवर्तिविरचितायां देवीमाहात्म्यव्याख्यायां त्रयोदशोध्यायः ॥ १३ ॥ ॥ समाप्ता टीका ।

---

**No 203.** ग्रंथनाम, **सिद्धांततत्वं.** Name: Siddhânta-tatva.

पत्राणि ५४, folios 54; पंक्तयः ९, lines 9; अक्षराणि ३६, letters 36.

कर्ता, **अनंतदेवः.** Author, Anantadeva.

आरंभः । सर्ववेदांतसिद्धांतसंप्रदायानुसारतः ॥ नमस्कृत्य गुरून्वक्ष्ये प्राक्रियां तत्वसंश्रयां ॥ १ ॥ यच्छ्रीमद्रामतीर्थेभ्यः संप्रदायसमागतं ॥ श्रुतं सतर्कसचिवं विविच्य तदिहोच्यते ॥ २ ॥ अखंडमद्वितीयमानंदैकरसं स्वप्रकाशं चैतन्यमेव जगदित्यादिः ।

उपसंहारः । तस्माद्दृष्टिसृष्टिवादेपि नित्यनैमित्तिकाद्यनुष्ठानशुद्धांतःकरणस्य शमादिसंपन्नस्य गुरुमनुसृतस्य श्रावणादिपरिपाकसमुत्पन्नतत्वज्ञानस्य अज्ञानतत्कार्यबाधे सत्यज्ञानानंदाखंडाद्वितीयं वस्तुमात्रमवशिष्यते नान्यत् ॥ ॥ इत्थं परिव्राजकपूज्यपादश्रीरामतीर्थानुसृतिप्रसादात् ॥ सिद्धांततत्वं गतवाग्विवादमनंतदेवेन मुदा न्यरूपि ॥ १ ॥ इत्यंतः ।

---

**No. 204.** ग्रंथनाम, **सिद्धांतलेशः**. Name: Siddhânta-leśa.

पत्राणि ७४, folios 74; पंक्तयः १४, lines 14; अक्षराणि ४०, letters 40.

संवत् १६८९ उद्धवो वृषाब्दे च (?) भाद्रे मासि शुभे दिने ॥ बुधयुक्तचतुर्दश्यां यथाप्रत्यलिखत्स्वयं ॥ १ ॥ Saṁvat 1639.

कर्ता, **अप्पयदीक्षितः**. Author, Appayadîkshita.

आरंभः । अधिगतभिदा पूर्वाचार्यानुपेत्य सहस्रधा सरिदिव महीभेदात्संप्राप्य शौरिपदोद्गता ॥ जयति भगवत्पादश्रीमन्मुखांबु[ज]निर्गता जननहरिर्णी सूक्तिर्ब्रह्माद्वयैकपरायणा ॥ १ ॥ २ ॥ तेषूपपादनापेक्षान् पक्षान्प्रायो यथामति ॥ युक्त्योपपादयन्नेव लिखाम्यनतिविस्तरं ॥ ३ ॥ तत्र तावदात्मा वारे द्रष्टव्यः श्रोतव्य इत्यधीतसांगस्वाध्यायस्येत्यादिः ।

उपसंहारः । परमेश्वरभावापत्तिरादर्तव्येति सिद्धं ॥ इति शास्त्रसिद्धांतलेशसंग्रहे चतुर्थः परिच्छेदः ॥ ॥ विद्वद्गुरोर्विहितविश्वजिदध्वरस्य श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ॥ श्रीरंगराजमखिनः श्रितचंद्रमौलिरस्त्यप्पदीक्षित इति प्रथितस्तनूजः ॥ १ ॥ २ ॥ ३ ॥ अस्य पुस्तकांतिमपत्रस्य कीटादिच्छिद्रितस्यांत्यश्लोकद्वयं लिखितुं न शक्यत इत्युपेक्षितं ।

---

**No. 205.** ग्रंथनाम, **हरिमीडेस्तोत्रं** व्याख्या च **हरितत्त्वमुक्तावली**. Name: The Harimîḍe-stotra, with a Commentary entitled the Haritatva-muktâvalî.

पत्राणि ५८, folios 58; पंक्तयः ९वा १०वा ११; lines 9, 10, 11; अक्षराणि ४२, letters 42.

शकः १७४६ तारणनामसंवत्सरे श्रावणशुद्ध ९ भृगुवासरे. Śaka 1746.

कर्ता, **शंकराचार्यः**. Author, Śaṅkarâchârya; व्याख्याकारः, **स्वयंप्रकाशयतिः**. Commentator, Svayamprakâśa-yati.

आरंभः । स्तोष्ये भक्त्या विष्णुमनादिं जगदादिं यस्मिन्नेतत्संसृतिचक्रं भ्रमतीत्थं ॥ यस्मिन्दृष्टे नश्यति तत्संसृतिचक्रं तं संसारध्वांतविनाशं हरिमीडे ॥ १ ॥ इत्यादिः ।

टीकारंभः । नित्यं निजानंदसदद्वितीयं शुद्धं विभुं सत्यमतिस्वतंत्रं ॥ सूक्ष्मं निरस्ताखिलदृश्यमीशं प्रत्यञ्चमात्मानमहं भजामि ॥ १ ॥ २ ॥ सत्यज्ञानानंदात्मकमद्वितीयं ब्रह्मैव शुद्धसत्वप्रधानमायोपाधिकं सदित्यादिः ।

समाप्तिः । इत्थं स्तोत्रं भक्तजनेड्यं भवतीति ध्वांतार्कामं भगवत्पादीयमिदं यः ॥ विष्णोर्लोकं पठति शृणोति व्रजति ज्ञो ज्ञानं ज्ञेयं स्वात्मनि चाप्नोति मनुष्यः ॥ ४४ ॥ इत्यंतः ।

टीकांतः । स्वयमेव स्वप्रकाशपरिपूर्णपरमानंदब्रह्मात्मना अवतिष्ठत इत्यर्थः ॥ ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेरितिभावः ॥ ४४ ॥ ॥ वाचा यया श्रुतिवचांसि च भेदवादिकौलेयकैर्मलिनितानि च शोधितानि ॥ तस्यामशुद्धमहं वचनं मदीयं संमिश्रय शंकरगुरोर्विबुधाः क्षमंतां ॥ १ ॥ अग्रे मंगलानि ॥ ४ ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यकैवल्यानंदयोगींद्रपादकमलभृंगायमानस्वयंप्रकाशाख्ययतिविरचिता शंकरभगवत्पादकृतहरिस्तुतिव्याख्या हरितत्वमुक्तावली समाप्ता ॥ ॥

---

**No. 206.** ग्रंथनाम, **तत्वप्रकाशिकाविवरणं.** Name: Tatva-prakâśikâ-vivaraṇa.

पत्राणि १२५, folios, 125; पंक्तयः ९, lines 9; अक्षराणि ४८, letters 48.

**कर्त्ता, श्रीनिवासाचार्यः.** Author, S'rînivâsâchârya.

आरंभः । नरसिंहं संप्रणम्य मध्वादीन् सुगुरूनहं ॥ तत्वप्रकाशिकाव्याख्यां करिष्यामो (मि) यथामति ॥ १ ॥ भाष्यं व्याचिख्यासुः श्रीमज्जयतीर्थश्रीमच्चरणो भाष्याद्यपद्यस्थविशेषणार्थप्रपंचनपूर्वकं मंगलमाचरति ॥ शुद्धेत्यादिः ॥

समाप्तिः । अध्यायसमाप्तेरर्थभेदेन ज्ञातुमशक्यत्वेपि तदर्थं द्विरुक्तिश्चेदित्यर्थः ॥ अध्यायार्थमुपसंहरति ॥ अत इत्यादिना ॥ इति श्रीमत्तत्वप्रकाशिकाविवरणे श्रीमच्छ्रीनिवासाचार्यविरचिते प्रथमाध्यायस्य चतुर्थः पादः ॥

---

**No. 207.** ग्रंथनाम, **आख्यातशिरोमणिटीका रघुदेवी.** Name: A Commentary on the Ákhyâta-śiromaṇi by Raghudeva.

पत्राणि ३८, folios 38; पंक्तयः ११, lines 11; अक्षराणि ३६, letters 36:

ग्रंथसंख्या ९७९.

शकः १७२१ माघे दशम्यां. S'aka 1721.

**कर्त्ता, रघुदेवः.** Author, Raghudeva.

आरंभः । प्रणम्य नीरदश्याममुद्दामगुणमंदिरं ॥ आख्यातवादसद्व्याख्या रघुदेवेन तन्यते ॥ १ ॥ नैयायिकः परमतं निराकर्तुं प्रथमतः स्वमतं निरूपयति ॥ आख्यातस्येति ॥

समाप्तिः । लक्षणादिना तादृशानुभवोपपादने तु तादृशतर्कस्यैव शरणीकरणीयत्वादितिभावः ॥ ॥ इति श्रीमद्रघुदेवतर्कालंकारविरचिता आख्यातशिरोमणिटिप्पणी संपूर्णा ॥

---

**No 208.** ग्रंथनाम, **जागदेशी.** Name: Jâgadesî.

पत्राणि ७७, folios 77; पंक्तयः १४, lines 14; अक्षराणि ३८, letters 38.

कर्त्ता, **जगदीशः.** Author, Jagadîsa.

आरंभः । समारब्धेति ॥ समारब्धं यदनुमानप्रामाण्यपरीक्षणं तत्कारणीभूतं यद्व्याप्तिग्रहोपायप्रतिपादनं तन्निदानं व्याप्तिस्वरूपनिरूपणमित्यर्थः ॥ इत्यादिः ।

समाप्तिः । किं च व्यभिचाराधियोऽनावश्यानुमितिहेतुत्वे व्यभिचारव्याप्यानां व्यभिचारावच्छेदकानां चानंतध—अस्याग्रे ग्रंथो नास्तीति न लिखितः।

---

**No. 209.** ग्रंथनाम, **तत्वानंदतरंगिणी.** Name: Tatvânanda-taranginî.

पत्राणि ४८, folios 48; पंक्तयः ११, lines 11; अक्षराणि २२, letters 22.

आरंभः । दिक्कालादिविनिर्मुक्तं निर्मुक्तं यद्गुणैरपि ॥ आनंदघनसंदोहमात्मान समुपाश्रये ॥ १ २ ॥ ३ ॥ तंत्राणां संमतां वक्ष्ये तत्वानंदतरंगिणीं ॥ धर्मार्थकाममोक्षाणामाद्यां साधनपद्धतिं ॥ ४ ॥ घटद्रव्यस्य संस्कारः संस्कारः शुद्धिमीनयोः ॥ मुद्रा कुलामृतानां च प्रोच्यते कुलवर्त्मना ॥ ९ ॥ इत्यादिः ।

समाप्तिः । वंदे गुरुपदद्वंद्वमवाङ्मनसगोचरं ॥ शुक्लरक्तप्रभामिश्रमतर्क्यं त्रैपुरं महः ॥ १ ॥

---

**No. 210.** ग्रंथनाम, **तर्ककौमुदी.** name: Tarka-kaumudî.

पत्राणि ९८, folios 98; पंक्तयः ८, lines 8; अक्षराणि ३२, letters 32.

शकः १६११. Śaka 1611.

कर्त्ता, **दिनकरभट्टः** Author, Dinakarabhaṭṭa.

आरंभः । तोषितसुरवरनिकरं सुंदररूपं सुरासुरैर्नम्यं ॥ विघ्नध्वांतनिवारणकारणमीडे परं धाम ॥ १ ॥ प्रारिप्सितविघ्नविघातकत्वेन मंगलं सुप्रसिद्धमिति शिष्यशिक्षायै तन्निबंधोऽनतिप्रयोजक इत्यादिः ।

समाप्तिः । ननु निग्रहस्थानादीनां विशेषलक्षणान्यत्र न कृता [नि] किमित्याह ॥ इहेति ॥ बालव्युत्पत्तिमात्रप्रयोजकामिह निरूपितं विशेषतो ग्रंथांतरादवगंतव्या-

नीति भावः ॥ अतिबलदितिसुतदलनं शंकरवामांकसंस्थितं महितं ॥ भक्तानुग्रहकारणमोडेऽभीष्टं परं धाम ॥ १ ॥ ॥ इति श्रीपैंग्यान्वयसंभूतपद्माकरभट्टसुतादिनकरभट्टविरचिता तर्कभाषाभावार्थदीपिका तर्ककौमुदी समाप्ता ॥

---

**No. 211.** ग्रंथनाम, **तर्कदीपिका.** Name: Tarkadîpikâ.

पत्राणि १३, folios 13; पंक्तयः ७, lines 7; अक्षराणि २६, letters 26.

कर्ता, **अन्नंभट्टोपाध्यायः.** Author, Annambhaṭṭopâdhyâya.

आरंभः । वि[श्वे]श्वरं सांबमूर्तिं प्रणिपत्य गिरां गुरुं ॥ टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकां ॥ १ ॥ चिकीर्षितग्रंथस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकामिष्टदेवतानमस्कारलक्षणं मंगलं शिष्यशिक्षायै ग्रंथादौ निबध्नंश्चिकीर्षितं प्रतिजानीत इत्यादिः ।

समाप्तिः । ज्ञानद्वारैव कर्म मोक्षसाधनं ॥ न तु साक्षात् ॥ तस्मात्पदार्थज्ञानान्मोक्षः परमप्रयोजनमिति सर्वं रमणीयं ॥ ॥ इति श्रीमदन्नंभट्टोपाध्यायकृततर्कसंग्रहटीका दीपिका समाप्ता ॥

---

**No. 212.** ग्रंथनाम, **तर्कभाषा.** Name: Tarka-bhâshâ.

पत्राणि ५७, folios 57; पंक्तयः ९, lines 9; अक्षराणि २८, letters 28.

संवत १७०२ चैत्रशुक्लाष्टम्यां भौमे. Saṁvat 1702.

कर्ता, **केशवमिश्रः.** Author, Keśavamiśra.

आरंभः । बालोपि यो न्यायनये प्रवेशमल्पेन वांच्छत्यलसः श्रुतेन ॥ संक्षिप्तयुक्त्यन्वितर्कभाषा प्रकाश्यते तस्य कृते मयैषा ॥ १ ॥ प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतापवर्तकनिर्णयवादजल्पवितंडाहेत्वाभासच्छलजातिरित्यादिः ।

समाप्तिः । पराभिमतस्यार्थस्य स्वप्रातिकूलस्य स्वयमेवानुज्ञानं स्वकरो(?)मतानुक्त(ज्ञा) इष्टार्थस्य भंगो विरोध इहात्यंतानुपयुक्तानां स्वरूपभेदप्रतिपादकानामलक्षणं न दोषाय एतावतैव व्युत्पत्तिसिद्धेः ॥ इति श्रीगौतमप्रणीतन्यायसूत्रप्रवेशे तर्कभाषा समाप्ता ॥

---

**No. 213.** ग्रंथनाम, **न्यायसिद्धांतमंजरी.** Name: Nyâya-siddhânta-Mañjarî.

पत्राणि ३७, folios 37; पंक्तयः १०, lines 10; अक्षराणि ४६, letters 46.

शकः १६०० कालयुक्तसंवत्सरे माघशुद्ध ४. S'aka 1600.

कर्ता, **भट्टाचार्यः जानकीनाथशर्मा.** Author, Jânakînâtha Bhaṭṭâchârya.

आरंभः । प्रणम्य परमात्मानं जानकीनाथशर्मणा ॥ क्रियते युक्तिमुक्ताभिर्न्यायसिद्धांतमंजरी ॥ १ ॥ इह किल निखिललोकविमोक्षमुख्योपायं मननोपायमात्मनस्तत्वज्ञानमामनंति ॥ तच्च प्रमाणाधीनमिति प्रमाणं निरूप्यते ॥ तत्र प्रमायाः करणं प्रमाणमित्यादिः ॥ ॥

समाप्तिः । ज्ञानस्य सन्निकर्षत्वे किं मानमिति चेत् ॥ रजतत्वप्रकारकं प्रत्यक्षामित्यवेहि ॥ तत्रैव किं मानमिति चेत् ॥ तत्प्रकारिका प्रवृत्तिरिति संक्षेपः ॥ इति श्रीभट्टाचार्यचूडामणिविरचिता न्यायसिद्धांतमंजरी समाप्ता ॥ ॥

---

**No. 214.** ग्रंथनाम, **पंचलक्षणी भवानंदी.** Name: The Pañchalakshaṇî of Bhavânanda.

पत्राणि ४६, folios 46; पंक्तयः १०, lines 10; अक्षराणि ३८, letters 38.

कर्ता, **भवानंदः.** Author, Bhavânanda.

आरंभः । सर्वमिदमनुमानप्रामाण्यसाधनं ॥ समारब्धेति ॥ समारब्धा या अनुमानप्रामाण्यपरीक्षा तत्कारणीभूत मित्यादिः ।

समाप्तिः । तथा च संयोगी सत्वादित्यत्रापि नातिव्याप्तिः ॥ संयोगाभावस्य द्रव्यवृत्तितायां संयोगवत्ताग्रहाविरोधि—अस्याग्रे ग्रंथस्त्रुटितः ।

---

**No. 215.** ग्रंथनाम, **मुक्तावली.** Name: Muktâvalî.

पत्राणि ६४, folios 64; पंक्तयः १०, lines 10; अक्षराणि ३८, letters 38.

शकः १६०० कालयुक्तसंवत्सरे पौषवद्य २ गुरौ. S'aka 1600.

कर्ता, **पंचाननभट्टाचार्यः विश्वनाथः.** Author, Viśvanâtha Pañchânanabhaṭṭâchârya.

आरंभः । चूडामणीकृतविधुर्वलयीकृतवासुकिः ॥ भवो भवतु भव्याय लीलातांडवपंडितः ॥ १ ॥ उपक्रमश्लोकौ द्वौ ॥ २ ॥ ३ ॥ विघ्नविघाताय कृतं मंगलं शिष्याशिक्षायै निबध्नाति ॥ नूतनेत्यादिना ॥

समाप्तिः । ननु सजातीये सोयमिति प्रत्यभिज्ञा कुत्र दृष्टेत्यत आह ॥ तदेवमिति यदौषधमन्येन कृतं तदौषधं मयापि कृतमित्यादिदर्शनादिति भावः ॥ इति श्रीपंचाननभट्टाचार्यविरचिता भाषापरिच्छेदस्य टीका सिद्धांतमुक्तावली समाप्ता ॥ ॥

---

**No. 216.** ग्रंथनाम, **मुक्तावल्याष्टीका दिनकरी.** Name: Dinakarî, a Commentary on the Muktâvalî.

पत्राणि ४०, folios 40; पंक्तयः १२, lines 12; अक्षराणि ४२, letters 42.

कर्ता, **महादेवभट्टः.** Author, Mahâdevabhaṭṭa.

आरंभः । लक्ष्मीपादयुगं प्रणम्य पितरं श्रीबालकृष्णाभिधं भारद्वाजकुलांबुधौ विधुमित्र श्रीगौरवास्यांबुजात् ॥ ज्ञात्वाशेषमतं मितेन वचसा सिद्धांतमुक्तावलीगूढार्थांस्तनुते यथामति महादेवः परेषां कृते ॥ १ ॥ तत्र तावद्भाषापरिच्छेदव्याख्यानं चिकीर्षुरित्यादिः ।

समाप्तिः । पृथकत्वस्य च गुणत्वमेव निरस्तमिति ॥ यथा ईश्वरे सुखं तथाग्रे भविष्यति ॥ एवं च संख्या बुद्धिरिच्छाप्रयत्नसुखानीति पंचैवेश्वरस्य गुणा इत्याहुः ॥ ॥ इति श्रीभारद्वाजभट्टबालकृष्णात्मजमहादेवभट्टकृतौ मुक्तावलीप्रकाशे प्रथमः परिच्छेदः ॥ ॥

---

**No. 217.** ग्रंथनाम, **आसुरीकल्पः.** Name: Âsurî-kalpa.

पत्राणि २१, folios 21; पंक्तयः १२, lines 12; अक्षराणि ३०, letters 30.

आरंभः । अखंडमंडलाकारं व्याप्तं येन चराचरं ॥ तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ १ ॥ श्रीकार्तिकेय उवाच ॥ कैलासशिखरासीनं देवदेवं च शंकरं ॥ स्कंदः पप्रच्छ षट्कर्मरहस्यं वेदसंमतं ॥ २ ॥ वश्याकर्षणविद्वेषोच्चाटस्तंभनमारणं ॥ त्रैलोक्यांतर्गतारीणां निग्रहा ये सुरोचन ॥ ३ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा अंतरजातिजाः ॥ साध्यंते तेन मे ब्रूहि कृपया परया विभो ॥ ४ ॥ ईश्वर उवाच ॥ शृणु वत्स महातंत्रमासुरीविधिमुत्तमं ॥ अंगन्यासकरन्यासदेहन्याससमान्वितं ॥ ५ ॥ इत्यादिः ।

समाप्तिः । अथ मंत्रः ॥ द्यौः शांतिर्दिशः शांतिरवांतरदिशः शांतिरग्निः शांतिर्वायुः शांतिरादित्यः शांतिश्चंद्रमाः शांतिर्नक्षत्राणि शांतिरापः शांतिरोषधयः शांतिर्वनस्पतयः शांतिर्वनस्पतयः शांतिर्गौः शांतिरजा शांतिरश्वः शांतिः

पुरुषः शांतिर्ब्रह्म शांतिर्ब्राह्मणः शांतिरेव शांतिः शांतिर्मे अस्तु शांतिः ॥ १ ॥ अग्रे ग्रंथः खंडितः ।

---

**No. 218.** ग्रंथनाम, **उड्डीशतंत्रं.** Name: Uḍḍîs'a-tantra.

पत्राणि १२, folios 12; पंक्तयः १३, lines 13; अक्षराणि २६, letters 26.

आरंभः । अथातः संप्रवक्ष्यामि उड्डीशज्ञानमुत्तमं ॥ व्याधिदारिद्र्यहरणं जरामृत्युविनाशनं ॥ १ ॥ ईदृशं यो न जानाति उड्डीशं रुद्रभाषितं ॥ निग्रहानुगृहतिस्य काल्पः—परमेश्वरि ॥ २ ॥ न तेषां जायते सिद्धिर्गौरि क्षेत्रे गृहेपि वा ॥ उड्डीशं यो न जानाति स क्रुद्धः किं करिष्यति ॥ ३ ॥ न जीवंति वरारोहे संसारे दुःखसागरे । उड्डीशं यो न जानाति कुतः सौख्यं भवेत्ततः ॥ ४ ॥ इत्यादिः ।

समाप्तः । चंडजंघा मूलं पाषाणजानुनी ब्रह्मदंडी मूलं ॥ कृष्णोन्मत्तमूलं पंचांगं चतुर्दश्यां दिने—अग्रे ग्रंथः खंडितः ।

---

**No. 219.** ग्रंथनाम, **उड्डीशतंत्रं.** Name: Uḍḍîśa-tantra.

पत्राणि २१, folios 21; पंक्तयः ११, lines 11; अक्षराणि ४६, letters 46.

आरंभः । उड्डीशेन समाकीर्णे योगवृंदसमाकुले ॥ प्रणम्य शिरसा देवी गौरी पृच्छति शंकरं ॥ १ ॥ ईश्वर श्रोतुमिच्छामि लोकनाथ जगत्पते ॥ प्रसादं कुरु देवेश ब्रूहि धर्मार्थसाधनं ॥ २ ॥ वशीकरणमुच्चाटं मोहनं स्तंभनं तथा ॥ शांतिकं पौष्टिकं चार्थकारणं विविधानि च ॥ ३ ॥ चक्षुर्हानिर्मनोहानिः श्रुतिहानिस्तथैव च ॥ ज्ञानहानिः क्रियाहानिः कीलकं च तथा परं ॥ ४ ॥ कार्यस्तंभं सुरेशान सेर्षणं पूरणं तथा ॥ मंत्रध्यानं विशेषेण तत्सर्वं वद मे प्रभो ॥ ९ ॥ इत्यादिः ।

समाप्तिः । अनंतरं सिमुदुग्धकरतलमृदितं तालकेव जातः वैदग्ध्येन तेषां तलः ॥ इति श्रीमहातंत्रे शिवोक्ते शिवां प्रति उड्डीशतंत्रं संपूर्णं ॥ ॥

---

**No. 220.** ग्रंथनाम, **कामरत्नं.** Name: Kâma-ratna.

पत्राणि १५९, folios 159; पंक्तयः ९, lines 9; अक्षराणि २२, letters 22.

कर्ता, **नित्यनाथः.** Author, Nityanâtha.

शकः १७१२ साधारणवत्सरे फाल्गुनवद्य ९. Śaka 1712.

आरंभः । यस्येश्वरस्य विमलं चरणारविंदं संसेव्यते विबुधसिद्धमधुव्रतेन ॥ निर्वाणसूचकगुणाष्टमवेदपूर्णं तं शंकरं सकलदुःखहरं नमामि ॥ १ ॥ कामर-

त्नमिदं चित्रं नानाग्रंथार्णवान्मया ॥ वश्यादियक्षिणीमंत्रसाधनांतं समुद्धृतं ॥ २ ॥ वश्याकर्षणकर्माणि वसंते इत्यादिः ।

समाप्तिः । मासमेकं ततः पूजां कृत्वा रात्रौ पुनर्जपेत् ॥ अर्द्धरात्रे गते देवी समागत्य प्रयच्छति ॥ निधानं दिव्ययोगं च तस्मान्मंत्री सुखी भवेत् ॥ ॐह्रींपद्मिनीस्वाहा ॥ इति श्रीनित्यनाथविरचिते कामरत्ने यक्षिणीसाधनं नाम पंचदशोपदेशः ॥ ॥

---

**No. 221.** ग्रंथनाम, **अभिधानचूडामणिः राजनिघंटुरित्यपरं नाम.**
**Name:** Abhidhâna-chûḍâmaṇi *alias* Râja-nighaṇṭu.

पत्राणि १३३, folios 133; पंक्तयः ११, lines 11; अक्षराणि ४६, letters 46.

ग्रंथसंख्या ४२०७.

कर्ता, **नरसिंहपंडितः.** Author, Narasiṁhapaṇḍita.

आरंभः । श्रीकंठाचलमेखलापरिणमत्कुंभींद्रबुध्या रदप्रांतोत्तंभितसंभृताब्द-गलितैः शीतैः पयोबिंदुभिः ॥ निर्वाणे मदसंज्वरे प्रमुदितस्तेनातपत्रश्रियं बिभ्राणेन निरत्ययं दिशतु वः श्रीविघ्नराजो मुदं ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ग्रंथोपयोगश्लोकाः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ निघंटुना विना वैद्यो विद्वान्व्या-करणं विना ॥ आयुधेन विना योद्धा त्रयो हास्यस्य भाजनं ॥ १० ॥ अतः परं २४ पर्यंतं ग्रंथप्रस्तावना ॥ अथानूपादिवर्गः कथ्यते ॥ नानाक्षोणीजवीरुद्वनमृग-सहितं निर्झरव्रातशीतं शैलाकीर्णं कनीयः कुरसमुखखगालंकृतं ताम्रभूमिं ॥ बिभ्रद्व्रीह्यादिकं यत्स्थलमतिविपुलं नीरसं यत्त्वनुष्णं पित्तघ्नं श्लेष्मवातप्रदमुदररुजा-पायदं स्यादनूपं ॥ २५ ॥ ॥ इत्यादिः ।

समाप्तिः । अथैकादशार्थाः ॥ स्यादभ्रमांसी तुलसी हरिद्रा तालं तथा रोचन-हेममोचाः ॥ जनप्रिया योजनवल्लिका स्यात्सा मल्लिका चंद्रशशी च गौर्यः ॥ दूर्वा निशा ऋद्धिवचा प्रिया च सा माषपर्णी मिशिरोचना त्वथ ॥ त्रायंतिका जीवनिका महाबला मंगल्यकायामिति चंद्रभून्हया ॥ प्रियंगु छिन्ना त्रिवृता कणाव्हया वंदाकदूर्वा तुलसी च नीलिनी ॥ दुर्गाखगः कस्तुरि कृष्णसारिवा श्या[मा]महींद्रोः कथिता भिषग्वरैः ॥ इत्येकादशार्थाः ॥ ॥ इति श्रीकाश्मीर-मंडल० श्रीनरसिंहपंडितविरचिते निघंटुराजापरपर्यायाभिधानचूडामणिः संपूर्णः ॥ ॥

**No. 222.** ग्रंथनाम, **अष्टांगसंग्रहः वृद्धवाग्भटापरनामा सूत्रस्थानं.** Name: Ashṭâṅga-saṅgraha *alias* Vṛiddha-vâgbhaṭa, Sûtra-sthâna.

पत्राणि १४३, folios 143; पंक्तयः ११, lines 11; अक्षराणि ३८, letters 38.

ग्रंथसंख्या ३७३९.

शकः १७९४. Śaka 1794.

कर्ता, **वाग्भटः**. Author, Vâgbhaṭa.

आरंभः । तृष्णादीर्घमसद्विकल्पशिरसं प्रद्वेषचंचत्फणं कामक्रोधविषं वितर्कदशनं रागप्रचंडेक्षणं ॥ मोहास्यं स्वशरीरकोटरशयं चित्तोरगं दारुणं प्रज्ञामंत्रबलेन यः शमितवान् बुद्धाय तस्मै नमः ॥ १ ॥ रागादिरोगाः सहजाः समूला येनाशु सर्वे जगतोप्यपास्ताः ॥ तमेकवैद्यं शिरसा नमामि वैद्यागमज्ञांश्च पितामहादीन् ॥ २ ॥ अथात आयुष्कामीयमध्यायं व्याख्यास्यामः ॥ इति ह स्माहुरात्रेयादयो महर्षयः ॥ आयुष्कामयमानेन धर्मार्थसुखसाधनं ॥ आयुर्वेदोपदेशेषु विधेयः परमादरः ॥ इत्यादिः ।

समाप्तिः । शस्त्रक्षाराग्नयो यस्मान्मृत्योः परममायुधं ॥ अप्रमत्तो भिषक् तस्मात्तान् सम्यगवचारयेत् ॥ इति तंत्रस्य हृदयं सूत्रस्थानं समाप्यते ॥ अत्रार्थाः सूत्रिताः सर्वे प्रतन्यंते हि सर्वशः ॥ इत्यग्निकर्मविधिर्नाम चत्वारिंशोध्यायः ॥ ४० ॥ ॥ इति श्रीसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिते अष्टांगसंग्रहे सूत्रस्थानं संपूर्णं ॥ ॥

---

**No. 223.** ग्रंथनाम, **अष्टांगसंग्रहः वृद्धवाग्भटापरनामा शारीरस्थानं.** Name: Ashṭâṅga-saṅgraha *alias* Vṛiddha-vâgbhaṭa, Śârîrasthâna.

पत्राणि ४९, folios 45; पंक्तयः ११, lines 11; अक्षराणि ४०, letters 40.

ग्रंथसंख्या १२३७.

शकः १७९४. Śaka 1794.

कर्ता, **वाग्भटः**. Author, Vâgbhaṭa.

आरंभः । अथातः पुत्रकामीयं शारीरं व्याख्यास्यामः ॥ इति ह स्माहुरात्रेयादयो महर्षयः ॥ अथ खलु पुमानेकविंशतिवर्षः कन्यामतुल्यगोत्रामतुल्याभिजनामसंचारिरोगकुलप्रसूतां रूपशीललक्षणसंपन्नामनूनामानिंद्याविनष्टदंतौष्ठकर्णनखकेशस्तनीमित्यादिः ।

समाप्तिः । इत्यत्र जन्म मरणं यतः सम्यगुदाहृतं ॥ शरीरस्य ततः स्थानं शारीरमिदमुच्यते ॥ ॥ इति शारीरे दूतादिविज्ञानीयो नाम द्वादशोध्यायः ॥ ॥ समाप्तं शारीरस्थानं ॥ ॥

---

**No. 224.** **ग्रंथनाम, अष्टांगसंग्रहः वृद्धवाग्भटापरनामा निदानस्थानं.** Name: Ashṭâṅga-saṅgraha *alias* Vṛiddha-vâgbhaṭa, Nidânasthâna.

पत्राणि ३६, folios 36; पंक्तयः ११, line 11; अक्षराणि ४०, letters 40.

ग्रंथसंख्या ९९०.

शकः १७९४. Śaka 1794.

कर्ता, वाग्भटः. Author, Vâgbhṭa.

आरंभः । अथातः सर्वरोगनिदानं व्याख्यास्यामः ॥ इति ह स्माहुरात्रेयादयो महर्षयः ॥ पुरा कृतयुगे विगतरागद्वेषादिद्वंद्वा जितलोभक्रोधश्रमक्लमालस्यभया निष्परिग्रहाः पुरुषा बभूवुः ॥ इत्यादिः ।

समाप्तिः । आवृता वायवोज्ञाता ज्ञाता वा वत्सरं स्थिताः ॥ प्रयत्नेनापि दुःसाध्या भवेयुर्वानुपक्रमाः ॥ विद्रधिप्लीहहृद्रोगगुल्माग्निसदनादयः ॥ भवंत्युपद्रवास्तेषामावृतानामुपेक्षणात् ॥ ॥ इति वातशोणितनिदानं नाम षोडशोध्यायः ॥ ॥ समाप्तं निदानस्थानं ॥ ३ ॥

---

**No. 225.** **ग्रंथनाम, अष्टांगसंग्रहः वृद्धवाग्भटापरनामा चिकित्सास्थानं.** Name: Ashṭâṅga-saṅgraha *alias* Vṛiddha-vâgbhaṭa, Chikitsâsthâna.

पत्राणि १००, folios 100; पंक्तयः ११, lines 11; अक्षराणि ४०, letters 40.

ग्रंथसंख्या २७९०.

शकः १७९४. Śaka 1794.

कर्ता, वाग्भटः. Author, Vâgbhaṭa.

आरंभः । अथातो ज्वरचिकित्सितं व्याख्यास्यामः ॥ इति ह स्माहुरात्रेयादयो महर्षयः । आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् ॥ विदधाति ज्वरं दोषस्तस्मात्कुर्वीत लंघनं ॥ प्राग्रूपेषु ज्वरादौ वा बलं यत्नेन पालयन् ॥ इत्यादिः।

समाप्तिः । यथानिदानं निर्दिष्टमिति सम्यक् चिकित्सितं ॥ आयुर्वेदफलं स्थानमेतत्सद्योर्तिनाशनात् ॥ चिकित्सितं हितं पथ्यं प्रायश्चित्तं भिषग्जितं ॥

भेषजं शमन शस्तं पर्यायैः स्मृतमौषधं ॥ ॥ इति वातशोणितचिकित्सितं नाम चतुर्विंशोध्यायः ॥ समाप्तं चिकित्सास्थानं ॥ ४ ॥

---

**No. 226.** ग्रंथनाम, **अष्टांगसंग्रहः वृद्धवाग्भटापरनामा कल्पस्थानं.**
**Name:** Ashṭâṅga-saṅgraha *alias* Vṛiddha-vâgbhaṭa, Kalpa-sthâna.

पत्राणि २४, folios 24; पंक्तयः ११, lines 11; अक्षराणि ४०, letters 40.

ग्रंथसंख्या ६६०.

शकः १७९४. Śaka 1794.

कर्ता, **वाग्भटः**. Author, Vâgbhaṭa.

आरंभः। अथातो वमनकल्पं व्याख्यास्यामः ॥ इति ह स्माहुरात्रेयादयो महर्षयः ॥ वमनद्रव्याणां मदनजीमूतकेक्ष्वाकुद्धिकोशातकी कुटजफलानि च श्रेष्ठानि ॥ तेष्वपि मदनफलमित्यादिः।

समाप्तिः। हिमवद्विंध्यशैलाभ्यां प्रायो व्याप्ता वसुंधरा ॥ सौम्यं पथ्यं च तत्राद्यमाग्नेयं वैंध्यमौषधं ॥ ॥ इति भेषजकल्पो नामाष्टमोध्यायः ॥ ॥ समाप्तं कल्पस्थानं ॥

---

**No. 227.** ग्रंथनाम, **अष्टांगसंग्रहः वृद्धवाग्भटापरनामा उत्तरस्थानं.**
**Name:** Ashṭâṅga-saṅgraha *alias* Vṛiddha-vâgbhaṭa, Uttara-sthâna.

पत्राणि १८३, folios 183; पंक्तयः ११, lines 11; अक्षराणि ३८, letters 38.

ग्रंथसंख्या ४७८०.

शकः १७९४. Śaka 1794.

कर्ता, **वाग्भटः**. Author, Vâgbhaṭa.

आरंभः। अथातो बालोपचरणीयमध्यायं व्याख्यास्यामः ॥ इति ह स्माहुरात्रेयादयो महर्षयः ॥ अथ खलु जातमात्रमेव बालमुल्बात्सैंधवसर्पिषा विशोधयेत् ॥ ततोस्यातिप्रबलमोहज्वरपरीतसर्वगात्रस्येत्यादिः ॥

समाप्तिः। ऋषिप्रणीते प्रीतिश्चेन्मुक्त्वा चरकसुश्रुतौ ॥ भेडाद्याः किं न पठ्यंते तस्माद्ग्राह्यं सुभाषितं ॥ इति मुनिवचनानां जीवितोपाश्रयाणामभिलषितसमृद्धौ कल्पवृक्षोपमानां ॥ यदुदितमिह पुण्यं कुर्वतो मेनुवादं भवतु विगतरोगो निर्वृतस्तेन लोकः ॥ ॥ इत्युत्तरे पंचाशत्तमोध्यायः ॥ ॥ इति वैद्यपतिसिंहगुप्तसूनुवाग्भटकृताष्टांगसंग्रहसंहितायामुत्तरस्थाने षष्ठे वाजीकरणतंत्रमष्टममंगं समाप्तं ॥ ॥ समाप्तोयं ग्रंथः ॥

**No. 228.** ग्रंथनाम, **आयुर्वेदप्रकाशः.** Name: A'yurveda-Prakâśa.
पत्राणि ७४, folios 74; पंक्तयः ११, lines 11; अक्षराणि ४२, letters 42.
ग्रंथसंख्या २१३६.

कर्ता, **सौराष्ट्रदेशोद्भवः सारस्वतो माधवः.** Author, Sârasvata-Mâdhava, a native of Saurâshṭra-deśa.

आरंभः । अथ प्रकाशकासारविमर्शांबुजिनीमयं ॥ सच्चिदानंदविभवं शिवयोर्वपुराश्रये ॥ १ ॥ २ ॥ अधुना रसराजस्य संस्कारान् संप्रचक्ष्महे ॥ नानातंत्राणि संदृश्य भिषजां सिद्धिहेतवे ॥ ३ ॥ संस्काराः परतंत्रेषु ये गूढाः सिद्धसूचिताः ॥ तानेव प्रकटीकर्तुमुद्यमं किल कुर्महे ॥ ४ ॥ इत्यादिः ।

समाप्तिः । गुडगुग्गुलुगुंजाज्यक्षौद्राद्यैष्टंकणान्वितैः ॥ दुर्द्रवाखिललोहादेर्द्रावणोयं गणो मतः ॥ लेहवत्कृतबब्बूल-क्वाथो यः किट्टजं रजः ॥ चूर्णं गुडो मृत्तिकेति दुर्भेद्यः सलिलैर्गणः ॥ ॥ इति श्रीसौराष्ट्रदेशोद्भवसारस्वतकुलावतंसोपाध्यायमाधवविरचित आयुर्वेदप्रकाशः समाप्तः ॥ ॥

---

**No. 229.** ग्रंथनाम, **नाडीपरीक्षा.** Name: Nâḍî-parîkshâ.
पत्राणि ४, folios 4; पंक्तयः ११, lines 11; अक्षराणि ३६, letters 36.
कर्ता, **नंदी.** Author, Nandin.

आरंभः । सप्तशतानां मध्याच्चतुरधिकाविंशतिः स्फुटा काये ॥ एका परीक्षणीया दक्षिणकरचरणविन्यस्ता ॥ १ ॥ अस्य प्रकोष्ठबाह्यस्य मध्ये कापि समाश्रिता ॥ जीवनाडीति सा प्रोक्ता नंदिना तत्ववेदिना ॥ २ ॥ वातनाडी भवेद्ब्रह्मा पित्तनाडी च शंकरः ॥ श्लेष्मनाडी भवेद्विष्णुस्त्रिदेवा नाडिदेवताः ॥३॥ वाताधिके भवेन्नाडी प्रव्यक्ता तर्जनीतले ॥ पित्ते व्यक्ता मध्यमायां तृतीयांगुलिगा कफे ॥ ४ ॥ इत्यादिः ।

समाप्तिः । स्नायुर्नाडी नसा हिंस्रा धमनी धारणी धरा ॥ तंतुकी जीवनज्ञाना शिरा पर्यायवाचका : ॥ ७१ ॥ सफलं निष्फलं ब्रूते जीवितं मरणं तथा ॥ अतो नाडी तत्स्वरूपमुक्तमेतत्समासतः ॥ ७२ ॥ ॥ इति नाडीपरीक्षा संपूर्णा ॥

---

**No. 230.** ग्रंथनाम, **नाडीपरीक्षा**. Name: Nâḍî-parîkshâ.
पत्राणि ४, folios 4; पंक्तयः ११, lines 11; अक्षराणि ३८, letters 38.
कर्ता, **रावणः.** Author, Râvaṇa.

आरंभः । अगणितमहिमायै साधकानंददायै सकलविभवसिद्ध्यै दुर्गतिध्वांतहंत्र्यै ॥ अमृतजलधिजायै जातरूपात्ममूर्त्यै मधुरिपुवनितायै इंदिरायै नमोस्तु ॥

१ ॥ २ ॥ रुग्णस्य मुग्धस्य विमोहितस्य दीपः पदार्थानिव जीवनाडी ॥ प्रदर्शयेद्दोषनिजस्वरूपं व्यस्तं समस्तं युगलीकृतं च ॥ ३ ॥ इत्यादिः ।

समाप्तिः । शरीरं शीतलं नाडी नूनं चोष्णतरा भवेत् ॥ ज्वरमंतर्गतं तस्य जानीयाद्भिषगुत्तमः ॥ १ ॥ मृत्युमु (न्मु)खां धरां ज्ञात्वा न चिकित्सेद्भदातुरं ॥ रामनामौषधं तत्र कारयेत्पारलौकिकं ॥ १ ॥ ॥ इति नाडीपरीक्षा ॥ ॥

---

No. 231. ग्रंथनाम, **पथ्यापथ्यनिघंटुः**. Name : Pathyâpathya-nighaṇṭu.

पत्राणि ७, folios 7; पंक्तयः ११, lines 11; अक्षराणि ५०, letters 50. ग्रंथसंख्या २४०.

कर्ता, **त्रिमल्लः**. Author, Trimalla.

आरंभः । श्रीकंठं गिरिजागणेशसहितं नत्वा शरण्यं सतां नानाद्रव्यगुणागुणान् कथयतो ग्रंथान्विचार्यासकृत् ॥ पथ्यापथ्यविदे गुणागुणयुतं यद्वस्तु नोपाद्दिकं (?) तत्संक्षेपतया ब्रवीति हि शतश्लोक्या त्रिमल्लः कविः ॥ १ ॥

समाप्तिः । हिमाद्रेरुत्पन्ना समुपचितपंचाननरसा ददाना भक्तेभ्यः प्रतिदिवसमुच्चैरमलतां ॥ अदोषा सानंदा गदविरचितस्तोत्रनिवहा शिवा मे नैरुज्यं जनयतु सदानंदजननी ॥ १००१ ॥ ॥ इति त्रिमल्लविरचितः पथ्यापथ्यनिघंटुः समाप्तः ॥ ॥

---

No. 232. ग्रंथनाम, **पाकमार्तंडः**. Name: Pâka-mârtaṇḍa.

पत्राणि ७३, folios 73; पंक्तयः ११, lines 11; अक्षराणि ४०, letters 40. ग्रंथसंख्या २००७.

संवत् १९२४. Saṃvat 1924.

आरंभः । अथ पाकावलिं वक्ष्ये कटुतिक्तादिभेषजैः ॥ विचिकित्सावतां नृणां राजसानां हिताय वै ॥ १ ॥ चिकित्सायां द्वयं सारं पाकविद्या रसायनं ॥ पाकोवलेहभेदः स्यात्स मृदुः स घनः परः ॥ २ ॥ काष्ठौषध्यः पृथक् पेष्याः सुगंधादिपृथग्विधाः ॥ इत्यादिः

समाप्तिः । ऊरुग्रहं हनुस्तंभं नाशयेदपि योगतः ॥ ६ ॥ इत्येरंडपाकः ॥ अलिखत्पाकमार्तंडं भिषजां हितकाम्यया ॥ यस्यावलोकनात्प्रज्ञा वर्धतेऽल्पधियामपि ॥ १ ॥ ॥ इति श्रीपाकमार्तंडः समाप्तः ॥

**No. 233.** ग्रंथनाम, **मदनविनोदनामा निघंटुः मदनपाल इति प्रसिद्धः.** Name: Madanavinoda Nighaṇṭu *alias* Madanapâla

पत्राणि ५६, folios 56; पंक्तयः ११, lines 11; अक्षराणि ४८, letters 48.

ग्रंथसंख्या १८४८.

कर्ता, **मदनपालः.** Author, Madanapâla.

आरंभः । बीजं श्रुतीनां सुधनं मुनीनां जीवं जडानां महदादिकानां ॥ आग्नेयमस्त्रं भवपातकानां किंचिन्महः शामलमाश्रयामि ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ केचित्संति निघंटवोतिलघवः केचिन्महांतः परे केचिद्दुर्गमनामकाः कतिपये भावाः स्वभो (भा) [वो] च्छ्रिताः॥ तस्मान्नातिलघुर्न चातिविपुलः ख्यातादिनामा सतां प्रीत्यै द्रव्यगुणान्वितोयमधुना ग्रंथो मया बध्यते ॥ ५ ॥ सर्वं कायेन संसाध्यं तस्यायुः स्थितिकारणं ॥ आयुर्वेदोपदेशस्तु कस्य न स्यात्फलावहः ॥ ६ ॥ तत्रापि पूर्वं ज्ञातव्या द्रव्यनामगुणागुणा इत्यादिः ।

समाप्तिः । टीकान्वये महति भूमिभुजां विशुद्धे कच्छोति नाम नगरं जयति प्रसिद्धं ॥ यद्वेधसा विहितमादरतः स्वसृष्टेरुत्कृष्टतातिशयपुंजदिदृक्षयेव ॥ ९० ॥ तत्र श्रीरत्नपालः समजनि० ॥ ९१ ॥ तस्माद्भरतपालः तस्माच्च हरिश्चंद्रो जातः ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ अजनि सहजपालस्तस्य पूर्वस्तनूजः ० ॥९६॥ योगज्ञो मुखतिलक[:]कटारमल्लस्तेन श्रीमदननृपेण निर्मिते हि ॥ ग्रंथेस्मिन्मदनविनोदनाम्नि पूर्णो वर्गोयं गुणगणमित्रमिश्रकोयं ॥ ९७ ॥ ॥ इति श्रीमदनपालविरचिते मदनविनोदनाम्नि निघंटौ मिश्रवर्गस्त्रयोदशः पूर्णः ॥ ॥

---

**No. 234.** ग्रंथनाम, **रसपद्धतिः सटीका.** Name: Rasa-paddhati, with a Commentary.

पत्राणि ९६, folios 96; पंक्तयः ९, lines 9; अक्षराणि ४०, letters 40.

कर्ता, **बिंदुः.** टीकाकारः, **महादेवः.** Author, Bindu; Commentator, Mahâdeva.

आरंभः नत्वा निष्कपटं निरंजनधिया निर्विघ्नमीशप्रियामायुर्वेदविदां मुदे सुभिषजामेषा मया बिंदुना ॥ ग्रंथेभ्यः परिगृह्य सारमखिलं सूत्रैश्चिकित्सासखी वृक्षेभ्यः स्रगिव प्रसूननिचयैः संग्रथ्यते पद्धतिः ॥ १ ॥ सा देवी प्रथमा सुसंस्कृतरसैर्या निर्मिता सद्रसैश्चूर्णस्नेहकषायलेहरुचिता स्यान्मानवी मध्यमा ॥ शस्त्रच्छेदनलास्यलक्ष्मणकृताचाराधमा सासुरीत्यायुर्वेदरहस्यमेतदखिलं ... तिस्रश्चिकित्सा मताः ॥ २ ॥ इत्यादिः ।

टीकारंभः । मुरली नवरसखुरली यस्य च बंशस्वरत्रयी वंशः ॥ करणं कविताभरणं शरणं करवाणि तन्महस्तरुणं ॥ १ ॥ शिवां प्रणम्य मनसा शास्त्रासारं विभाव्य हि ॥ रसपद्धतिभां चक्रे महादेवो भिषग्वरः ॥ २ ॥ प्रत्यूहव्यूहव्यपोहहेतुस्वेष्टदेवताप्रणामपूर्वकं रसपद्धतिरूपं ग्रंथमित्यादिः ।

मूलसमाप्तिः । प्रत्येकं सुहिरण्यरौप्यरसकं द्विघ्नं फणींद्रायसं त्रिघ्नं दानवभानुताप्यगगनं मुक्ताफलं विद्रुमं ॥ वेदघ्नं हरजेंद्रग्लेच्छकुनटीतालं विमर्द्यांबुभिर्निर्गुंडीवरिवानरीरविशठीरंभाकुमारीवृषैः ॥ गोलं मृत्पटवेष्टितं सुलवणे यंत्रेष्टयामावार्धि पक्त्वा स्वांगसुशीतलं सुभिषजा पूर्वादितैर्भावयेत् ॥ हन्यादष्टविधं ज्वरं च विषमं षट् चातिसारांस्तथा पांडून् पंच च पंच च ग्रहणिका एकादशे यक्ष्माणि ॥ वल्लद्वंद्वमितः कणामधुयुतो देवप्रसूनार्द्रकद्रावैर्वा मृगदर्पकुंकुमयुतो लक्ष्मीविलासो रसः ॥ इति लक्ष्मीविलासो रसः ॥ ॥ इति श्रीमहादेवपंडितकृतटीकासहिता बिंदुविरचिता रसपद्धतिः संपूर्णा ॥ ॥

---

**No. 235.** ग्रंथनाम, **रसपारिजातः.** Name: Rasapârijâta.

पत्राणि २४, folios 24; पंक्तयः ९, lines 9; अक्षराणि ३२, letters 32.

ग्रंथसंख्या ४३२.

कर्ता, **लक्ष्मीधरसरस्वती.** Author, Lakshmîdharasarasvatî.

आरंभः । लक्ष्मीधरसरस्वत्याः पारं वेत्ति सरस्वती ॥ सरस्वत्याः परं पारं लक्ष्मीधरसरस्वती ॥ १ ॥ रसा द्विगुणगंधश्च चतुर्भागश्च टंकणः ॥ तथाष्टभागो जेपालत्र्यहं संमर्दयेद्दृढं ॥ २ ॥ वल्लो नवज्वरं हंति रसः सर्वेश्वराभिधः ॥ वल्लद्वयं हरीतक्या युक्तया वातज्वरं तथा ॥ ३ ॥ द्विवल्लः पर्णखंडेन पीतः क्षौद्रयुतः कफं ॥ गुंजा जीर्णज्वरं घोरमतिलंघितजं तथा ॥ ४ ॥ इत्यादिः ।

समाप्तिः । सप्तभागं प्रवालं तु रसतुल्यं च टंकणं ॥ सर्वमेकत्र संमर्द्य त्रिदिनं तुंगवारिणा ॥ ततो गोलकवत्कृत्वा शोषयित्वा खरातपे ॥ द्वारद्वंद्वेन लवणैः पंचभिः परिपूर्णकैः ॥ आढकैर्घटमापूर्य तन्मध्ये गोलकं क्षिपेत् ॥ तन्मुखं च मृदा रुध्द्वा वा पचेद्यामचतुष्टयं ॥ अग्रे ग्रंथः खंडितः ।

---

**No. 236.** ग्रंथनाम, **रसरत्नसमुच्चयः.** Name: Rasaratnasamuchchaya.

पत्राणि १५४, folios 154; पंक्तयः १३, lines 13; अक्षराणि ३४, letters 34.

ग्रंथसंख्या ४२९४.

कर्ता, सिंहगुप्तसूनुर्वाग्भटः. Author, Vâgbhaṭa, son of Siṃhagupta.

आरंभः । यस्यानंदभवेन मंगलकलासंभावितेन स्फुरद्धाम्ना सिद्धरसायितेन करुणावीक्षासुधासिंधुना ॥ भक्तानां प्रभवप्रसंङ्गतिजरारागादिरोगाः क्षणाच्छांतिं यांति जगत्प्रधानभिषजे तस्मै परस्मै नमः ॥ १ ॥ आगमश्चंद्रसेनश्च लंकेशश्च विशारदः ॥ कपाली मत्तमांडव्यो भास्करः शूरसेनकः ॥ २ ॥ रत्नकोशश्च शंभुश्च तथैको नरवाहनः ॥ इंद्रदो गोमुखश्चैव कंबलिर्व्यालिरेव च ॥ ३ ॥ नागार्जुनः सुरानंदो नागबोधिर्यशोधनः ॥ खंडः कापालिको ब्रह्मा गोविंदो लक्ष्मको हरिः ॥ ४ ॥ रसांकुशो भैरवश्च नंदी स्वच्छंदभैरवः ॥ मंथानभैरवश्चैव काकचंडीश्वरस्तथा ॥ ५ ॥ वासुदेव ऋषिशृंगक्रियातंत्रसमुच्चयी ॥ रसेंद्रतिलको योगी भालुकिर्मैथिलाह्वयः ॥ ६ ॥ महादेवो नरेंद्रश्च वासुदेवो हरीश्वरः ॥ सप्तविंशतिसंख्याका रससिद्धिप्रदायकाः ॥ ७ ॥ एतेषां क्रियतेन्येषां तंत्राण्यालोच्य संग्रहः ॥ रसानामामयघ्नानां चिकित्सार्थोपयोगिनां ॥ ८ ॥ सूनुना सिंहगुप्तस्य रसरत्नसमुच्चयः ॥ इत्यादिः ।

समाप्तिः । अजरैरमरैर्नित्यं सुखितैरेवमादृतैः ॥ व्याधिमृत्युजराग्रस्तैर्दुःखप्रायैः सुखार्थिभिः ॥ किं पुनर्भिषजो मर्त्यैः पूज्याः स्युर्नातिशक्तितः ॥ ॥ इति श्रीरसरत्नसमुच्चयेष्टाविंशोध्यायः ॥ ॥ रसरत्नसमुच्चयो मयेत्थं रचितः साधु नितांतमाद्रियंतां ॥ सुधियो यदि विद्यतेत्र दोषः क्वचिदर्हंति ममाप्यलं विसोढुं ॥ १ ॥ ॥

---

**No. 237.** ग्रंथनाम, **रसरत्नाकरे रसखंडं.** Name: Rasakhaṇḍa, a portion of the Rasaratnâkara.

पत्राणि ३२, folios 32; पंक्तयः ११, lines 11; अक्षराणि २८, letters 28.

शकः १६९८. S'aka 1698.

कर्ता, **नित्यनाथसिद्धः.** Author, Nityanâthasiddha.

आरंभः । स्वर्गापवर्गविस्तारौ सामराज्योदरे दरे ॥ भवरोगहरौ वंदे चंडिकाचंद्रशेखरौ ॥ १ ॥ रसोपरसलोहानां तैलमूलविषैः सह ॥ सुसाध्यं प्रत्ययोपेत कथ्यते रससाधनं ॥ २ ॥ वैद्यानां यशसेर्थाय व्याधितानां हिताय च ॥ वादिनां कौतुकार्थाय वृद्धानां देहसिद्धये ॥ ३ ॥ मंत्रिणां मंत्रसिद्ध्यर्थं विविधाश्चर्यकारकं ॥ पंचखंडमिदं शास्त्रं साधकानां हितं प्रियं ॥ ४ ॥ रसखंडे तु वैद्यानां व्याधितानां रसेंद्रके ॥ वादिनां वादखंडे च वृद्धानां च रसायने ॥ ५ ॥ मंत्रिणां मंत्रखंडे तु रससिद्धिः प्रजायते ॥ सुतरां नात्र संदेहस्तत्तत्खंडे विलो-

कयेत् ॥ ६ ॥ हतो हंति जरामृत्यू मूर्छितो व्याधिघातकः ॥ धत्ते च खे गतिं बद्धः कोन्यस्तस्मात्कृपाकरः ॥ ७ ॥ इत्यादिः ।

समाप्तिः । विषं पाठाश्वगंधा च वचा तालीसपत्रकं ॥ मरिचं पिप्पली निंबमज्जा मूत्रेण तुल्यकं ॥ ९१ ॥ वटिका पूर्ववत्कार्या जयंती योगवाहिका ॥ ९२ ॥ इति पार्वतीपुत्रनित्यनाथसिद्धविरचिते रसरत्नाकरे रसखंडे तैलपातनादिविषशोधनं नाम दशम उपदेशः ॥ ॥

---

**No. 238.** ग्रंथनाम, **रसरत्नाकरे वादखंडं**. Name: Vâdakhaṇḍa, a portion of the Rasa-ratnâkara.

पत्राणि १५९, folios 159; पंक्तयः ८, lines 8; अक्षराणि ३०, letters 30.

संवत् १८९६. Samvat 1896.

कर्ता, **नित्यनाथसिद्धः**. Author, Nityanâthasiddha.

आरंभः । सृष्टं येन विदा चिदात्मखमरुत्तेजोजलं भूगुणाः सत्संविच्छिवशक्तिभैरवकला श्रीकंठपंचाननः ॥ ईशो रुद्रमुरारिधातृविबुधाश्चंद्रार्कतारागणाः सोयं पातु चराचरं जगदिदं निर्नामनामाभिधः ॥ १ ॥ २ ॥ ३ ॥ शिवबीजं सूतराजः पारदश्च रसेंद्रकः ॥ एतानि रसनामानि तथान्यानि शिवे यथा ॥ ४ ॥ दत्ते शिवपदं सिद्धं साधकानां महोत्तमं ॥ शिवबीजं तथाख्यातं सर्वसिद्धिप्रदायकं ॥ ५ ॥ इत्यादिः ॥

समाप्तिः । सिद्धैर्महासुरवरै रससिद्धिकर्म बद्धं हठात्परमयोगबलेन तैश्च ॥ तस्माद्विशिष्टमनुजैः कृतमंत्रजापैः कार्यं कृते रसवरे रसबंधनं च ॥ ॥ इति श्रीपार्वतीपुत्रनित्यनाथसिद्धविरचिते रसरत्नाकरे वादखंडे विंशतितम उपदेशः ॥ ॥

---

**No. 239.** ग्रंथनाम, **रसरत्नाकरे सिद्धखंड**. Name: Siddhakhaṇḍa, a portion of the Rasa-rantnâkara.

पत्राणि ३६, folios 36; पंक्तयः ११, lines 11; अक्षराणि ४०, letters 40.

संवत् १७०७, Samvat 1707.

कर्ता, **नित्यनाथसिद्धः**. Author, Nityanâthasiddha.

आरंभः । स्वर्गापवर्गविस्तारी सामराज्योदरे दरे ॥ भवरोगहरौ वंदे चंडिकाचंद्रशेखरौ ॥ १ रसोपरसलोहानां तैलमूलविषैः सह ॥ सुसाध्यं प्रत्ययोपेतं

कथ्यते रससाधनं ॥ २ ॥ अग्रे कतिचन श्लोकाः पूर्वखंडोक्तत्वान्न लिखिताः ॥ ॥ अथ रसशोधनं ॥ कुमार्या च निशाचूर्णैर्दिनं सूतं विमर्दयेत् ॥ पातयेत्पातनायंत्रे सम्यक् शुद्धो भवेद्रसः ॥ ७ ॥ इत्यादिः ।

समाप्तिः । सिद्धै रसैः सकलरोगनिवारणार्थं प्रोक्तं समस्तमनुभूय हितं नराणां ॥ धान्वंतरैः सकलकीर्तिहरं निरीक्ष्य सारातिसाररससागरसिद्धखंडं ॥ ९८० ॥ ॥ इति श्रीपार्वतीपुत्रनित्यनाथसिद्धविरचिते रसरत्नाकरे सिद्धखंडे स्थावरविषादिशल्यनिवारणं नाम चतुर्दश उपदेशः ॥ १४ ॥

---

**No. 240.** ग्रंथनाम, **रससारः**. Name : Rasasâra.

पत्राणि ४४, folios 44 ; पंक्तयः ९, lines 9 ; अक्षराणि ४०, letters 40.

कर्ता, **गोविंदपूज्यपादाः**. Author, Govindapûjyapâda.

आरंभः । गणेशं प्रणिपत्यादौ शिवं च शिवया सह ॥ गुरुभैरवसिद्धेभ्यो योगिनीग्रहमंडलं ॥ १ ॥ प्रणम्य शिरसा नित्यं भक्त्या तत्पादपंकजं ॥ हरिं ध्यायेत्परं देवं रसेंद्रं शिवमव्ययं ॥ २ ॥ आलोक्य सर्वशास्त्राणि ह्यनुभूय यथास्थितं ॥ सारात्सारं समुद्धृत्य संक्षेपादर्थगौरवात् ॥ ३ ॥ रससारं प्रवक्ष्यामि नानासिद्धैश्च भाषितं ॥ साधकानां हितार्थाय लोकानामनुकंपया ॥ ४ ॥ मलहीनो यदा सूतः पितामहसमो भवेत् ॥ स बद्धो विष्णुराख्यातो रंजितः शिव उच्यते ॥ ५ ॥ सारितो मारितश्चैव स एव जगदीश्वरः ॥ इत्यादिः ।

समाप्तिः । यत्प्रसादान्मया पूर्वं रससारं कृतं शुभं ॥ एकधा दशधा चैव शतधा च सहस्रधा ॥ मत्प्रणीतप्रयोगेषु सिद्धिर्ज्ञेया विचक्षणैः ॥ यदस्ति सर्वशास्त्रेषु तदिहास्त्यखिलं स्फुटं ॥ यदि[चा]स्त्यन्यदन्यत्र नेहास्ति रसकर्मणि ॥ ॥ इति श्रीमद्गोविंदपूज्यपादविरचिते रससारे सर्वमहारससेवनाधिकारो नाम पंचविंशं पटलं॥२५॥

---

**No. 241.** ग्रंथनाम, **रसाध्यायः सटीकः**. Name: Rasâdhyâya, with a Commentary.

पत्राणि ३९, folios 39 ; पंक्तयः १३, lines 13; अक्षराणि ३६, letters 36.

संवत् १७९७. Saṁvat 1797.

कर्ता, **कंकालययोगी**; टीकाकारः, **पुरुषोत्तमपुरी**. Author, Kaṅkâlayayogî ; Commentator, Purushottamapurî.

आरंभः । तत्रादौ निर्विघ्नं प्रारब्धकार्यसिद्ध्यर्थमभीष्टदेवतानमस्कारमाह ॥ सूत्रं ॥ श्रीभैरवं प्रणम्यादौ सर्वज्ञं त्रिजगत्प्रभुं ॥ श्रीभारतीं च विघ्नेशं वंदे प्रत्यूहशांतये ॥ १ ॥ ब्रह्मचर्यं तपः कार्यं हविष्यान्नं च भोजनं ॥ क्रियाभ्रष्टे न सिध्यंति तपो नष्टं फलं न हि ॥ २ ॥ इह रसकर्माणि चतुरशीतिः गुटिकाभेदाश्चतुरशीतिरंजनानि चतुरशीतिः ॥ एवं द्वे शते द्विपंचाशदधिके तत एतेषां भेदानामित्यादिः।

समाप्तिः । ख्यातस्तथा यादववंशरत्नं भूजाल्देवाभिधराउलोभूत् ॥ तदात्मजन्मा महिपाभिधानस्तस्यांगजो भादिगनामधेयः ॥ २ ॥ तदात्मजश्चंपकनामधेयो रस[प्र]योगोज्ज्वलकांतकीर्तिः ॥ परोपकारैकरसः कलावान् मनागजाकौ किल तस्य बंधू ॥ ३ ॥ तथा च ॥ श्रीमानंचलगच्छनायकगुरुर्नाम्ना महेंद्रप्रभः सूरींद्रः क्षितिमंडले विजयते योगींद्रमुद्रावधिः ॥ तत्पादांबुजपर्युपास्तिचतुरश्रीमेरुतुंगाभिधः सूरिर्भूरिपरस्वपक्षसमयाभ्यासैककौतूहली ॥ ४ ॥ श्रीपत्तने तेन कृशानुवेदवेदेंदुवर्षे १४४३ स्वपरोपकृत्यै ॥ विज्ञाप्रणीराउलचंपकस्योपरोधतो वृत्तिरियं दि(वि)भे(ते) न(ने) ॥ ५ ॥ ग्रंथोयं न प्रदातव्यो दुर्विनीताय पापिने ॥ यो वै दास्यति तस्यास्तु गुरुहत्या पदे पदे ॥ ६ ॥ सूर्याचंद्रमसौ यावदुदयेते महीतले ॥ तावद्विदध्याद्ग्रंथोयमुपकारं महात्मनां ॥ ७ ॥ ॥ इति श्रीरसाध्यायः सटीकः समाप्तः ॥

---

**No. 242.** ग्रंथनाम, **रसार्णवः** Name : Rasârṇava.

पत्राणि ८७, folios 87 ; पंक्तयः ९, lines 9 ; अक्षराणि, ४०, letters 40.

ग्रंथसंख्या १८९७.

आरंभः । यस्मिन् सर्वं यतः सर्वं य[:] सर्वं सर्वतश्च यः ॥ यश्च सर्वमयो नित्यं तस्मै सर्वात्मने नमः ॥ १ ॥ कैलासशिखरे रम्ये नानारत्नविभूषिते ॥ नानाकल्पद्रुमाकीर्णे गुप्ते संबाधवर्जिते ॥ २ ॥ देवदेवं सुखासीनं नीलकंठं त्रिलोचनं ॥ प्रणम्य शिरसा देवी पार्वती पर्यपृच्छत ॥ ३ ॥ श्रीदेव्युवाच ॥ देवदेव महादेव काल कामांगदाहक ॥ कुलकौलं महाकौलं सिद्धिकौलादि शासनं ॥ ४ ॥ त्वत्प्रसादाच्छ्रुतं सर्वमशेषमवधारितं ॥ यदि तेहमनुग्राह्या यद्यहं तव वल्लभा ॥ ५ ॥ शुचिता सर्वतंत्रेषु या पुरा न प्रकाशिता ॥ जीवन्मुक्तिः कथं नाथ कीदृशी वक्तुमर्हसि ॥ ६ ॥ श्रीभैरव उवाच ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ रसश्च पवनश्चैव कर्मयोगो द्विधा मतः ॥ मूर्छितो हरते व्याधिं मृतो जीवयति स्वयं ॥ १९ ॥ बद्धः खेचरतां कुर्यादित्यादिः ।

समाप्तिः । यथा लोहे तथा देहे कर्तव्यः सूतकस्तदा ॥ समो न कुरुते देवि प्रयतो देहलोहयोः ॥ पूर्वं लोहं परीक्षेत ततो देहे प्रयोजयेत् ॥ तन्ममाचक्ष्व देवेशि किमन्यच्छ्रोतुमिच्छसि ॥ ॥ इति श्रीरसार्णवे रससंहितायां लोहवेधो नाम सप्तदशः पटलः ॥ १७ ॥ ॥ अग्रे ग्रंथः खंडितः ।

---

**No. 243.** ग्रंथनाम, **रसालंकारः**. Name: Rasâlankâra.

पत्राणि १८४, folios 184; पंक्तयः ७, lines 7; अक्षराणि २८, letters 28.

ग्रंथसंख्या २२९४.

कर्ता, **भट्टश्रीरामेश्वरः**. Author, Bhatta Śrîrâmeśvara.

आरंभः । आद्याश्चत्वारः श्लोका न संति ॥ भैरवं भैरवक्लेशतमोनिर्भेदभास्करं ॥ ब्रह्मेंद्रसुरजिन्मुख्यद्र --- भजाम्यहं ॥ ५ ॥ वंदे विनायकं भक्तविघ्नपाथोधिकुंभजं ॥ अभ[द्र]लोकसिध्योघवन्यदावानलं प्रभुं ॥ ६ ॥ दुष्कर्मतापनिर्नाशपीयूषायतदृष्टये ॥ मुरारये नमस्तस्मै सत्वैकारब्धमूर्तये ॥ ७ ॥ ८ ॥ ॥ ९ ॥ मूलकौलादिशास्त्राणि शिवप्रोक्तान्यनेकशः ॥ अनुभूय गुरोर्वक्त्राद् गोविंदाद्युदितानि च ॥ १० ॥ निष्कीलितक्रमेणैव रसशास्त्रमुदीरये ॥ संप्रदायक्रमायातं सम्यक् प्रकटितक्रियं ॥ ११ ॥ उद्घाटितमहायंत्रं प्रकटीकृतजारणं ॥ सम्यग्मुखीकृतरसं निर्मिताग्निस्थितिक्रमं ॥ १२ ॥ समुक्तमूलिकाभस्मबंधादिक्रमभासुरं ॥ रसं शोधनसंयुक्तं नानापातनसंयुतं ॥ १३ ॥ अभ्रादिशुद्धितत्सत्वपातभस्मद्रुतिक्रमं ॥ लोहमारणसंद्रावतच्छुद्धिक्रमसंयुतं ॥ १४ ॥ रसालंकारमत्यर्थं प्रकटार्थं सविस्तरं ॥ शिष्यप्रबोधनार्थाय न पूजाख्यातिहेतवे ॥ १५ ॥ अत्र ये ये रसाः प्रोक्ता अनुभूतिक्रमागताः ॥ उक्तरीत्या कृतास्ते स्युरमोघा रामबाणवत् ॥ १६ ॥ रागद्वेषौ विहायाहं प्राणैषं ग्रंथमुत्तमं ॥ एतत्पश्चाद्रसकृतः सिद्धिं यांति न संशयः ॥ १७॥ इत्यादिः ।

समाप्तिः । ये गुणा भस्मसूतेंद्रे ये गुणा रोगघातने ॥ इतरेषां रसेंद्राणां ते सर्वेऽत्र रसेश्वरे ॥ ५॥ इयानत्र विशेषोस्ति सद्यस्तापहरो रसः ॥ कर्पूरतिलकः सोयं निर्विशंकं प्रयोज्यतां ॥ ६ ॥ मिश्र—अस्याग्रे ग्रंथः खंडितः ।

---

**No. 244.** ग्रंथनाम, **रसेंद्रचिंतामणिः**. Name: Rasendra-Chintâmaṇi.

पत्राणि ८४, folios 84; पंक्तयः ९, lines 9; अक्षराणि ४०, letters 40.

ग्रंथसंख्या १८९०.

कर्ता, **गुहकुलसंभवो रामचंद्रः**. Author, Râmachandra of Guhakula.

आरंभः। इदानीं गुहकुलसंभवः श्रीरामचंद्राह्वयो रसेंद्रचिंतामणिग्रंथमारभमाणस्तन्मूलदेवते श्रीमदंबिकामहेश्वरौ सकलजगदुत्पत्तिस्थितिप्रलयानिदानं च सविशेषसिद्धांतगर्भ वाचा वरिवस्यति ॥ अथ प्रकाशकासारविमर्शांबुजिनीमयं ॥ सच्चिदानंदविभवं शिवयोर्वपुराश्रये ॥ १ ॥ लघीयःपरिमाणतया निखिलरसदायित्वाच्चिंतामणिरिव चिंतामणिरित्यादिः।

समाप्तिः। अदुःसाध्यैरेतैः स्फुटबहुफलैः कर्मभिरयं विभाति ग्रंथो नः प्रकटगुरुसंकेतसुभगः ॥ इदं किं वा ब्रूमः पतति नयनं चेदिह सतां तथा च व्याहर्ता निजगुणमहिम्नः स्वयमसौ ॥ १ ॥ अश्रांतोच्छ्रितसिद्धयोगविभवः कारुण्यपात्रं रसग्रंथं ग्रंथिलबुद्धयः प्रतिदिनं निंदंतु योगीश्वराः ॥ प्रेमाणं परिवर्धयंतु भिषजामुद्दामधामश्रियो राजानः करिदंतकुंतकुलिशक्रीडाविरुग्णद्रुमाः ॥ ॥ इति रसेंद्रचिंतामणौ नवमोध्यायः ॥ ९ ॥ समाप्तोयं ग्रंथः ॥

---

**No. 245.** ग्रंथनाम, **वाग्भटसूत्रस्थानटीका आयुर्वेदरसायनाख्या.**
Name: Âyurvedarasâyana, a commentary on the Sûtrasthâna of Vâgbhaṭa.

पत्राणि २०९, folios 209; पंक्तयः ११, lines 11; अक्षराणि ४६, letters 46.

ग्रंथसंख्या ६६१०.

कर्ता, **हेमाद्रिः**. Author, Hemâdri.

आरंभः। पृष्ठे कूर्मतया चतुर्भुजतया दोर्मंडले मंदरं रुध्द्वा क्षीरसमुद्रमौषधभृतं निर्मथ्य निष्पादितैः ॥ आनीतैरमृतैर्भिषक्तमतया योषित्तया पायितैर्देवानामजरामरत्वमकरोत्तस्मै नमो विष्णवे ॥ १ ॥ हेमाद्रिणा चतुर्वर्गचिंतामणिविधायिना॥ तदुक्तव्रतदानादिसिद्धयंगारोग्यसिद्धये ॥ २ ॥ क्रियतेष्टांगहृदयस्यायुर्वेदस्य सुग्रहा॥ टीका चरकहारीतसुश्रुतादिमतानुगा ॥ ३ ॥ इत्यादिः।

समाप्तिः। स्नेहेति ॥ भृशतरमत्यर्थं तुशब्दान्न केवलं भृशतररूक्षप्रलेपादि किंतु पूर्वोक्तमपि यथावस्थं योजयेत् ॥ सूत्रस्थानमुपसंहरति ॥ समाप्यत इति ॥ इति हेमाद्रिटीकायामायुर्वेदरसायने ॥ क्षाराग्निकर्मप्रकरणं सामस्त्येन निरूपितं ॥ ॥

---

**No. 246.** ग्रंथनाम, **वीरसिंहावलोकः.** Name: Vîrasiṁhâvaloka

पत्राणि १९४, folios 194; पंक्तय: १०, lines 10; अक्षराणि ३०, letters 30.

ग्रथसंख्या ३३८

शकः १७९३, संवत् १९२८. Śaka 1793, Saṁvat 1928.

कर्ता, वीरसिंहदेवः. Author, Vîrasiṁhadeva.

आरंभः । यच्चक्षुर्भुवनस्य दिव्यममलं वामं (धाम) श्रुतीनां परं यद्ब्रह्मैकनिकेतनं च पयसां बीजं यदेकं मतं ॥ सत्रेष्वग्निहुतस्य वेदविदितं स्थानं च यत्सर्वदा तद्वः पातु सनातनं महहतां (हरिमह)त(स्त)च(त्व)प्रबोधोदयं ॥ १ ॥ २ ॥ इह खलु पुरुषार्थचतुष्टयाय धीमतां प्रवृत्तिः ॥ तत्राद्यो धर्मः स च शरीरमंतरेण न संभवति ॥ तच्च रोगरहितं धर्मकर्मक्षमं भवति ॥ तत्स्वरूपनिरूपणाय तद्दोषप्रतीकाराय च रोगाः परिगण्यंत इत्यादिः ।

समाप्तिः । कलिंगादिमानाधिकारः ॥ समर्थितश्चायं ग्रंथः ॥ अब्दे नंदहुताशवारिधिनिशानाथांकसख्यान्विते १४३९ श्रीमद्विक्रमभूपतेश्च विभवे मासे नभस्ये सिते ॥ पक्षे विष्णुदिने गुरौ सहरिभे श्रीवीरसिंहो व्यधाद्ग्रंथं लोकहिताय पूर्वमुनिभिर्दृष्टं प्रयोगैः शुभैः ॥ १ ॥ २ ॥ न श्रेष्ठस्तरणिप्रभावजनितो वंशः समालक्ष्यते रामाद्याः पृथिवीश्वराः समभवन् यत्र प्रतापोन्नताः ॥ नो वा यत्र युधिष्ठिरप्रभृतयो भूपा बभूवुस्ततः सृष्टस्तोमरवंश एष विधिना सत्कर्मसंसेविना ॥ ४ ॥ यत्राभवत्कमलसिंह इति प्रसिद्धः सर्वागमाचरणसेवितदेवसिद्धः ॥ तस्माद्भूज्जगति भूपतिदेवशर्मा विद्याविनोदमतिरादृतपुण्यकर्मा ॥ ५ ॥ श्रीदेवशर्मात्मज एष धीरः स्वशस्त्रसंतापितशत्रुवीरः ॥ श्रीविरसिंहः क्षितिपालसिंहः शास्त्रत्रयाद्ग्रंथमिमं हि धत्ते ॥ ६ ॥ ॥ इति श्रीतोमरवंशावतंसरिपुभूतभैरवश्रीवीरसिंहदेवविरचिते श्रीवीरसिंहावलोके कर्मविपाकादिलेखनं समाप्तं ॥ ॥

---

**No. 247.** ग्रंथनाम, **वैद्यजीवनं सटीकं.** Name: Vaidya-Jîvana, with a Commentary.

पत्राणि ६१, folios 61; पंक्तयः ९, lines 9; अक्षराणि ३४, letters 34.

ग्रंथसंख्या ११६६.

कर्ता, **लोलिंबराज** ; टीकाकारो, **हरिनाथः.** Author, Lolimbarâja, Commentator, Harinâtha.

आरंभः । प्रसिद्धत्वान्मूलग्रंथारंभः समाप्तिरपि न लिख्यते ।

टीकारंभः । यस्यांघ्रिकंजमकरंदलिहोलयोमी व्यासादयो विविधवाङ्मयमाचिकीर्षुः ॥ भक्तार्तिदैन्यदलनाय कृतावतारो विघ्नं स नो नरहरिर्निखिलं निहन्यात् ॥ १ ॥ अग्रेपि मंगलस्ववर्णनश्लोकाः ॥ ८ ॥ लोलिंबराजः कविशिष्टाचारमंगीकृत्य प्रारब्धग्रंथस्य निर्विघ्नपरिसमाप्त्यर्थं श्रीकृष्णमर्थयन्नाशीर्वादादिकं मंगलमातनोति ॥ प्रकृतीत्यादिः ।

टीकासमाप्तिः । पुनः ॥ भूभृतां राज्ञां सभा भूषयति ॥ अनेन कवितावादिभिः शोभयतीत्येवंभूतः ॥ १२ ॥ ॥ इति श्रीमन्मिश्रमनोहरसूनुगोस्वामिना हरिनाथेन कृतायां वैद्यजीवनटीकायां पंचमो विलासः ॥ ॥

---

**No. 248.** ग्रंथनाम, **वैद्यरहस्यं.** Name: Vaidya-rahasya.

पत्राणि ९५, folios 95, पंक्तयः ९, lines 9 ; अक्षराणि ४६, letters 46.

ग्रंथसंख्या २४३०.

संवत् १९३०. Saṁvat 1930.

कर्ता, विद्यापतिः. Author, Vidyâpati.

आरंभः । यन्नामस्मरणं समस्तदुरितध्वंसावहं पुण्यदं भक्तानामभयंकरं सुखकरं सर्वार्थसिद्धिप्रदं ॥ तं नत्वार्जुनमीश्वरं गुरुकृपावाप्तैः सुसिद्धैर्वरैर्योगैर्वैद्यरहस्यमद्य तनुते विद्यापतिः कौतुकात् ॥ १ ॥ यतः समस्तरोगाणां ज्वरो राजेति विश्रुतः ॥ अतो ज्वराधिकारोत्र प्रथमं लिख्यते मया ॥ २ ॥ अंशांशं यत्र दोषाणां विवेक्तुं नैव शक्नुयात् ॥ साधारणीं क्रियां तत्र विदधीत चिकित्सकः ॥ ३ ॥ इत्यादिः ।

समाप्तिः । दीर्घदीर्घास्तु बहवो ग्रंथाः संति तथापि मे ॥ सांप्रदायिकयोगानां संग्रहार्थमयं श्रमः ॥ ॥ इति श्रीमदुपाध्यायवंशीधरात्मजमिश्रविद्यापतिनिर्मितो वैद्यरहस्याभिधो योगसमुच्चयः पूर्णः ॥ ॥

---

**No. 249.** ग्रंथनाम, **शतश्लोकी सटीका.** Name: Śata-ślokî, with a Commentary.

पत्राणि ५२, folios 52 ; पंक्तयः १०, lines 10 ; अक्षराणि ३२, letters 32.

शकः १४५७. Śaka 1457.

कर्ता, बोपदेवः ; टीकाकारः. स एव, Author, Bopadeva ; Commentator, the same.

आरंभः । आयुर्वेदविदां वेदमायुरारोग्यदं रविं ॥ नत्वा निजां शतश्लोकीं व्या-[ख्या] मि भिषजां मुदे ॥१॥ इति टीकारंभः । भैषज्यं द्विजतारकाधिपतिरप्येति क्षपेशः क्षयक्षीणांगः शरणं शरण्यगणनाग्रण्यं यमर्तिच्छिदे ॥ तं देवं तरणिं प्रणम्य सरुजां सौख्याय कुर्मः शतश्लोकीं षोडशकोक्तचूर्णगुटिकालेहाज्यतैलोदकैः ॥ १ ॥ मूलादिः ।

समाप्तिः । दोषं दूष्यानलबलवयःकालदेशानवस्थाः सत्वं सात्म्यं प्रकृतिमसकृद्यः परीक्ष्य प्रयुंक्ते ॥ रोगं योगं भिषगनलसस्तस्य सिध्यत्यभीष्टं तस्मादेताल्लि-

खितपठिताधीनधोभिर्न बोध्यं ॥ १ ॥ कैलासाचलमौलिमंडनमणेर्नृत्योत्सवे यद्यशो गायंति त्रिदशांगनाः कलरणद्भृंगीरनादस्वनैः ॥ चक्रे चंद्रकलां सुगोपितशतश्लोकीपदोला(ल्ला)सिनीं स त्रैलोक्यकवींद्रचक्रतिलकः श्रीबोपदेवः कविः ॥ २ ॥ ३ ॥ ॥ इति श्रीपंडितंबोपदेवविरचिता शतश्लोकी सटीका समाप्ता ॥ ॥

---

*Kâma-Sâstra.*

**No. 250.** ग्रंथनाम, **रतिरहस्यं योगाध्यायः.** Name: Yogâdhyâya, a portion of the Rati-rahasya.

पत्राणि ४२, folios 42; पंक्तयः ८, lines 8; अक्षराणि ४२, letters 42.

कर्ता, **कोक्कोकपंडितः.** Author, Kokkoka Paṇḍita.

आरंभः। येनाकारि प्रसभमचिरादर्धनारीश्वरत्वं दग्धेनापि त्रिपुरजयिनो ज्योतिषा चाक्षुषेण ॥ इंदोर्मित्रं जयति स मुदां धाम वामप्रचारो देवः श्रीमान् भवरसकलादैवतं चित्तजन्मा ॥ १ ॥ २ ॥ कोक्कोकनाम्ना कविना कृतोयं श्रीवैन्यदत्तस्य कुतूहलेन ॥ विलोक्यतां कामकलासु धीराः प्रदीपकल्पो वचसां निगुंफः ॥ ३ ॥ ४ ॥ असाध्यायाः सुसंसिद्धिः सिद्धायाश्चनुरंजनं ॥ रक्तायाश्च रतिः सम्यक् कामशास्त्रप्रयोजनं ॥ ५ ॥

समाप्तिः। मूषकमार्जारद्विजदिगंबराणां च नामभिर्धूपः ॥ क्रियते वेश्मनि यत्र तु तत्रत्यानां मिथो वैरं ॥ ३९ ॥ सुरतरुतगरागुरुगदमृगमदमलयगंधरसधूपः ॥ वेश्मनिहतां(त)त(स्त)था[च] परस्परप्रीतिमातनुते ॥ ४० ॥ ४१ ॥ इति श्रीनृसिंहपाटलीयपंडितकोक्कोककृतौ रतिरहस्ये योगाध्यायो नाम दशमः परिच्छेदः ॥ ॥

---

## CATALOGUE OF MSS. BELONGING TO EKANÂTHA ŚÂSTRÎ OF NÂŚIKA.

*Veda.*

**No. 251.** ग्रंथनाम, **तैत्तिरीयोपनिषद्-भाष्यं-वार्त्तिकं-वार्त्तिकटीका च** Name: Taittirîyopanishad, with Bhâshya, Vârttika, and a Commentary on the Vârttika.

पत्राणि ९७, folios 97; पंक्तयः १८, lines 18; अक्षराणि ५०, letters 50.

कर्ता, **भाष्यकृच्छंकराचार्यः–वार्त्तिककारः, सुरेश्वरः–टीकाकारः, आनंदज्ञानः.** Author of Bhâshya, Śaṅkarâchârya; of Vârttika, Sureśvara; Commentator, Ânandajñâna.

आरंभः । भाष्यादिः । संहितादिविषयाणि कर्मभिरविरुद्धान्युपासनान्युक्तानि ॥ अनंतरं चांतःसोपाधिकात्मदर्शनमुक्तं व्याहृतिद्वारेण स्वाराज्यफलं ॥ न चैतावताऽशेषतः संसारबीजस्योपमर्दनमस्तीत्यतोशेषोपद्रवबीजस्याज्ञानस्य निवृत्त्यर्थं विधूतसर्वोपाधिविशेषात्मदर्शनार्थमिदमारभ्यते ॥ ब्रह्मविदाप्नोति परं ॥

वार्त्तिकारंभः । नानागतमनैतिह्यं प्रत्यगेकमविक्रियं ॥ अनादेयमहेयं यन्नमस्तस्मै सदादृशे ॥ १ ॥

टीकारंभः । सगुणविद्यामुक्त्वा निर्गुणविद्यां वक्तुमारभमाणो नमस्कारव्याजेन वल्लीद्वयार्थं संक्षिप्य कथयति ॥ नानागतमिति ॥

समाप्तिः । ॥ य एवं वेद ॥ इत्युपनिषत् ॥ सह नाववतु० ॥

भाष्यसमाप्तिः । तामेतां यथोक्तामुपनिषदं शांतो दांत उपरतास्तितिक्षुः समाहितो भूत्वा भृगुवत्तपो महदास्थाय य एवं वेद तस्यैवं फलं यथोक्तमिति ॥ ॥ ॐ तत्सदिति श्रीमद्गोविंदभगवत्पूज्यपादशिष्य ० शंकरभगवत्कृतं तैत्तिरीयकोपनिषद्भाष्यं संपूर्णं ॥

वार्त्तिकसमाप्तिः । मुमुक्षुसार्थवाहस्य भवनामभृतो यतेः ॥ शिष्यश्चकार तद्भक्त्या सुरेशाख्यो महार्थवित् ॥ ९१ ॥ ॐतत्सदिति ० श्रीमत्सुरेश्वराचार्यविरचितं ० वार्त्तिकाभिधानं विवेचनं समाप्तं ॥

टीकासमाप्तिः । तथा च तेन प्रणीतमिदं वार्त्तिकामृतं वृद्धैः श्रद्धेयमेवेत्यर्थः ॥ ॥ ९१ ॥ परापरगुरून्नत्वा संप्रदायानुसारतः ॥ व्याकृतं संग्रहेणैव तैत्तिरीयकवार्त्तिकं ॥ १ ॥ सा चेयं व्याक्रिया प्रीतिं भगवत्येव कुर्वती ॥ चिराय वर्ततां कृष्णस्तृष्णां त्यक्त्वान्यग (गा) मिनीं ॥ २ ॥ ॥ इतिश्री ० शुद्धानंदशिष्येण भगवदानंदज्ञानेन कृता तैत्तिरीयकवार्त्तिकटीका समाप्ता ॥

---

**No 252.** ग्रंथनाम, **मांडूक्यभाष्यं.** Name: Mâṇḍûkya Bhâshya.
पत्राणि १११, folios 111; पंक्तयः १०, lines 10; अक्षराणि २४, letters 24.
शकः १७४७. Saka 1747.
कर्ता, **शंकराचार्यः.** Author, Śaṅkarâchârya.

आरंभः । प्रज्ञानांशुप्रतानैः स्थिरचरनिकरव्यापिभिर्व्याप्य लोकान्भुक्त्वा भोगान्स्थविष्ठान् पुनरपि धिषणोद्भासितान् कामजन्यान् ॥ पीत्वा सर्वान्विशेषान्स्वपिति मधुरभुग् मायया भोजयन्नो मायासंख्यातुरीयं परममृतमजं ब्रह्म यत्तन्नमामि ॥ १ ॥ २ ॥ ॐमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं वेदांतार्थसारसंग्रहभूतमिदं प्रकरणचतुष्टयमोमित्येतदक्षरमित्याद्यारभ्यते ।

समाप्तिः । तस्मै पदाय अन्यवहार्यमपि व्यवहारगोचरमापाद्य यथाबलं यथाशक्तीत्यर्थः ॥ ९७ ॥ अजमपि जनियोगं प्रापदैश्वर्ययोगादगति च गतिमत्तां प्रापदेकं ह्यनेकं ॥ विविधविषयधर्मग्राहि मुग्धेक्षणानां प्रणतभयविहंतृ ब्रह्म यत्तन्नतोऽस्मि ॥ ९८ ॥ ९९ ॥ १०० ॥ ॥ इति श्री० शंकरभगवत्पादकृतागमशास्त्रविवरणे अलातशाखाख्यं चतुर्थं प्रकरणं समाप्तं ॥

---

**No. 253.** ग्रंथनाम, **मांडूक्यभाष्यटीका आनंदगिरी.** Name: Ânandagiri, a Commentary on the Mâṇḍûkya Bhâshya.

पत्राणि २८०, folios 280 ; पंक्तयः ८, lines 8 ; अक्षराणि २६, letters 26.

शक : १७४१. Saka 1741.

कर्ता, **आनंदज्ञानः**. Author, Ânandajñâna.

आरंभः । परिपूर्णपरिज्ञानपरितृप्तिमते सते ॥ विष्णवे जिष्णवे तस्मै कृष्णनामवते नमः ॥ १ ॥ २ ॥ गौडपादीयभाष्यं हि प्रसन्नमिव लक्ष्यते ॥ तदर्थतोतिगंभीरं व्याकरिष्ये स्वशक्तितः ॥ ३ ॥ पूर्वे यद्यपि विद्वांसो व्याख्यानमिह चक्रिरे ॥ तथापि मंदबुद्धीनामुपकाराय यत्यते ॥ ४ ॥ श्रीगौडपादाचार्यस्य नारायणप्रसादतः प्रतिपन्नान्मांडूक्योपनिषदर्थाविष्करणपरानपि श्लोकानाचार्यप्रणीतान्व्याचिख्यासुरित्यादिः ।

समाप्तिः । तदेवमाचार्यप्रसादादात्मनोन्येषां च बहूनां पुरुषार्थपरिसमाप्तिसंभवादाचार्यपरिचरणं पुरुषार्थकामैराचरणीयमित्यर्थः ॥ १०० ॥ १ ॥ गौडपादीयभाष्यस्य व्याख्या व्याख्यातृसंमता ॥ संमिता निर्मिता सेयमर्पिता पुरुषोत्तमे ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानंदपूज्यपादशिष्यभगवदानंदज्ञानकृतायां गौडपादीयभाष्यटीकायां चतुर्थं प्रकरणं समाप्तं ॥ ॥

---

**No. 254.** ग्रंथनाम, **अन्यापदेशशतकं.** Name: Anyâpadeśaśataka.

पत्राणि ९, folios 9 ; पंक्तयः ११, lines 11 ; अक्षराणि ४४, letters 44.

शकः १७९४. Saka 1794.

कर्ता, **एकनाथः**. Author, Ekanâtha.

आरंभः । वाग्देवी वितनोतु सा मम शुभं कर्णप्रभूषामणिश्रेणीदाडिमबीजशंकितमतिं संयम्य केलीशुकं ॥ व्याख्यानाय च पुस्तकं गुणनिकासंख्याकृते मालिकां पद्मं शिक्षयितुं करेषु विदधत्यभ्यापयंतीव या ॥ १ ॥ २ ॥

अन्यापदेशशतकं प्रायस्तात्पर्यगर्भितं ॥ काश्यपेन मया नूत्नं रच्यते विदुषां मुदे ॥ ३ ॥

समाप्तिः । यत्त्वं ग्रीष्ममुखानृतूनभिलषन्नामोदमंतर्मनाः स्तावं स्तावमनुक्षणं परिचरस्यध्वन्य मन्येधुना ॥ यत्सौभाग्यविधायकः सुमनसामामोदभूर्माधवो यावन्नानुजिघृक्षतीह विफलस्तावद्भवत्युद्यमः ॥ १०७ ॥ ८ ॥ ९ ॥ १० ॥ इत्येकनाथाविरचितमन्यापदेशशतकं पूर्णं । ॥

---

**No. 255.** ग्रंथनाम, **भावविलासः.** Name: Bhâvavilâsa.

पत्राणि २२, folios 22; पंक्तयः ११, lines 11; अक्षराणि ३८, letters 38.

ग्रंथसंख्या ९७४.

संवत् १७९६. Samvat 1796.

**कर्ता, चंद्रचूडः.** Author, Chandrachûḍa.

आरंभः । अर्धांगे गिरिजांकयोर्गणपतिस्कंदौ हरिः पद्मभूर्देवो दक्षिणवामयोश्च विजयं गायंति दिव्यांगनाः ॥ श्रीशंभोस्त्रिपुरे जिते स्मितमुखी नीराजने प्रस्तुते संपूज्यालकमक्षतैः करतलं शीर्षेऽस्य विन्यस्यति ॥ १ ॥ श्लोकाः शतं यत्र भवंति मुक्ताश्छिद्रोज्झिता गाढमयप्रबंधाः ॥ तच्चंद्रचूडो जनरंजनार्थमन्योक्तिकंठाभरणं तनोति ॥ २ ॥

समाप्तिः । अन्यापदेशविनिवेशविदग्धबुद्धिश्रीभावसिंहनरसिंहनियोगयोगात् ॥ संपादितो विविधभावविकाशभाजां प्रीत्यै भृशं भवतु भावविलास एषः ॥ १३९ ॥ सद्गुणानां समुद्रेण रुद्रेण ग्रथिता गुणैः ॥ कंठस्था कंठमालेयं केषां न कुरुते श्रियं ॥ १३६ ॥ विद्यानिवासपुत्रस्य न्यायवाचस्पतेरियं ॥ काव्यालापविदग्धानां मोदं निर्मातु निर्मितिः ॥ १३६ ॥

---

**No. 256.** ग्रंथनाम, **अभिनवकादंबरी.** Name: Abhinava-kâdambarî.

पत्राणि ३९, folios 35; पंक्तयः ७, lines 7; अक्षराणि २४, letters 24.

ग्रंथसंख्या ३६७.

**कर्ता, पिंगलोपनामको धुंडिराजः.** Author, Dhuṇḍirâja Piṅgala.

आरंभः । नत्वा श्रीजगदंबां पिंगलकुलजोथ धुंडिराजाख्यः ॥ ऐच्छद्बाणकवेर्गामभिनवकादंबरीं दोग्धुं ॥ ॥

समाप्तिः । इत्थं त्वभिनवपूर्वा पिंगलकुलजेन धुंडिराजेन ॥ कादंबरी विरचिता विदुषां प्रीत्यै सदा भूयात् ॥ ७९ ॥

---

No. 257. ग्रंथनाम, अमरुशतकं सटीकं. Name: Amaruśataka, with a Commentary.

पत्राणि ५१, folios 51; पंक्तयः ११, lines 11; अक्षराणि ४५, letters 45.

ग्रंथसंख्या १५७७.

संवत् १७३१. Saṁvat 1731.

कर्त्ता, श्रीमच्छंकराचार्यः. Author, Śrîmat-Śaṅkarâchârya.

आद्यपत्रद्वयाभावः ।

समाप्तिः । कवेर्वाक्यं । सालक्तकेन नवपल्लवकोमलेन पादेन नूपुरवता मदलालसेन ॥ यस्ताड्यते दयितया प्रणयापराधात्सोंगीकृतो भगवता मकरध्वजेन ॥ १०० ॥

टीकासमाप्तिः । दयितया पादेन ताडितोपि भगवता मकरध्वजेनांगीकृत इत्यनेन नानाविधैरुपचारैरुपलालितः किमु नेत्यर्थः सूचितः । एतावता कामपुरुषार्थस्योपादेयत्वमुक्तं भवति ॥ ॥

---

No. 258. ग्रंथनाम, आनंदकंदचंपूः. Name: Ânandakanda-Champû.

पत्राणि २०, folios 20; पंक्तयः ९, lines 9; अक्षराणि ४४, letters 44.

ग्रंथसंख्या ४९९.

कर्ता, श्रीमन्मित्रमिश्रः. Author, Mitramiśra.

आरंभः । श्रीमद्रामपदाब्जं स्वस्तुत्याकर्णनेप्रतिमलज्जं ॥ निजशरणदानसज्जं वंदे यस्य सविधे धनुर्विसज्जं ॥ १ ॥

समाप्तिः । यद्वंध्यमुद्यमं विंध्यो विधायाज्ञां दधे गुरोः ॥ तदभूत्पार्वधाम—गुर्वधीना हि सिद्धयः ॥ इति श्रीमन्मित्रमिश्रकृते द्वितीय उल्लासः ॥ २ ॥

---

No. 259. ग्रंथनाम, आनंदसागरः. Name: Ânandasâgara.

पत्राणि १२, folios 12; पंक्तयः १९, lines 19; अक्षराणि २९, letters 29.

ग्रंथसंख्या २१७.

शकः १७४६. Saka 1746.

कर्ता, नीलकंठदीक्षितः. Author, Nîlakanthadîkshita.

आरंभः । विज्ञापनार्हविरलावसरानवाप्तया मंदोद्यमे मयि दवीयसि विश्वमातुः ॥ अव्याजभूतकरुणापवनापविद्धान्यंतः स्मराम्यहमपांगतरंगितानि ॥ १ ॥

समाप्तिः । कालानपास्य विषुवायनसंक्रमादीनस्तं गते हिमकरे च दिवाकरे च ॥ अंब स्मरेयमपि ते चरणारविंदमानंदलक्षणमपास्तसमस्तदोषं ॥ १०९ ॥ इति श्रीनीलकंठदीक्षितविरचित आनंदसागरस्तवः समाप्तः ॥

---

**No. 260.** ग्रंथनाम, **उत्तररामचरितनाटकस्य टीका.** Name: A Commentary on the Uttara-Râma-Charita.

पत्राणि १९, folios 19; पंक्तयः १०, lines 10; अक्षराणि ६४, letters 64.

कर्त्ता, भट्टनारायणः. Author, Bhatta Nârâyana.

आरंभः । अपारभवसागरोत्तरणसेतुभूतं सकृत्प्रलापविषयीकृतं जयति यस्य नामामृतं ॥ दशास्यकुलकाननज्वलनतीव्रदावानलः स कोपि रघुपालको मम भवत्वभीष्टप्रदः ॥ १ ॥ २ ॥ ३ ॥ उत्तरे रामचरिते भवभूतिमहाकवेः ॥ अप्रसिद्धं पदं यत्तद्यथामति विविच्यते ॥ ४ ॥ प्रारिप्सितस्य ग्रंथस्येत्यादिः ।

समाप्तिः । तेषां लक्ष्ये लक्षणयोजनान्यधीतनाट्यालंकारैः सुधीभिरनुसंधेयानीति विस्तरभयादनतिप्रयोजनत्वाच्च नोपवर्णितानीत्युपरम्यते इति शिवं ॥ यो मौनभट्टबुधबंधुरधीतविद्यः श्रीतानभट्टसुकृती कृतिकृष्णसूनुः ॥ श्रीरंगनाथतनयेन तदीयपौत्रनारायणेन सुधिया रचितेति टीका ॥ १ ॥ २ ॥ ऋतुगजरसचंद्रैर्विक्रमार्कस्य १६८६ शाके इत्यंतिमः श्लोकः ॥ इति रंगनाथदीक्षितसूनोर्भट्टनारायणस्य कृतावुत्तरचरितापेक्षितव्याख्याने सप्तमोंकः ॥

---

**No. 261.** ग्रंथनाम, **उदारराघवः.** Name: Udâra-Râghava.

पत्राणि ४३, folios 43; पंक्तयः १०, lines 10; अक्षराणि ५२, letters 52.

शकः १७८३. Saka 1783.

कर्ता, कविमल्लमल्लः. Author, Kavi-Malla-Malla.

आरंभः । अस्ति प्रशस्तः प्रकृतेः परस्तादाद्यः पुमान्केवलचित्स्वरूपः ॥ आनंदपूर्णः सदसत्प्रपंचबाह्यांतरव्याप्तबहुप्रकारः ॥ १ ॥ अनंतशक्तिं तमनंतकोटिब्रह्मांडभांडावृतरोमरंध्रं ॥ समाधियोगैरपरोक्षयंतो भजंति नित्यं हृदि नित्ययुक्ताः ॥ २ ॥ इत्यादिः ॥

समाप्तिः । नवशोणितनासिकंधयी सा विरटंती विपिनानि वेपयंती ॥ खरदूषण-योः पुरः पतित्वा निजवृत्तांतमजिह्मपन्निशाटी ॥ १०७ ॥ श्रुत्वा तत्परिभवमूलमुत्पाति-ष्णुर्वर्धिष्णुः समिति परान्निराकरिष्णुः ॥ रक्षोभिः सदसि खरः खरप्रलापः प्राज्वा-लीदनलः इवाज्यपूरसिक्तः ॥ १०८ ॥ इति श्रीमत्सुखस्वप्नाकलितरघुनाथदत्तवरप्र-सादसहजसारस्वतश्रीसाकल्यपदांकितमाधवसुधीतनयकविमल्लमल्लाचार्यविरचिते उ-दारराघवे महाकाव्ये नवमः सर्गः ॥ ९ ॥ ॥

इदं काव्यमतिसमीचीनमपि अस्मद्देश इत उत्तरं न मिलति अत आंग्लभूपति-भिर्बहुदेशदर्शिभिरन्वेषणीयं काव्यमिति प्रार्थये ॥ अस्याष्टादशसर्गाः संतीति किंव[दं]ती ॥

---

No 262. ग्रंथनाम, **कंसवधनाटकं.** Name: Kaṁsavadha-Nâṭaka.

पत्राणि ३६, folios 36; पंक्तयः १२, lines 12; अक्षराणि ४४, letters 44.
कर्ता, **कृष्णकविः.** Author, Krishṇakavi.

आरंभः । प्रारंभः शुभकर्मणस्त्रिभुवनक्लेशाभिचारागमः कांताकर्षणकर्मकार्मण-विधिः कामाद्वितीयश्रुतिः ॥ हुंकारो मदनस्य निर्वृतिवधूमंजीरसिंजाध्वनिः श्रेयःसं-पदमातनोतु भवतः कंसारिवंशीरवः ॥ १ ॥ इत्यादिः ॥

समाप्तिः । उत्पत्तिप्रभृतिक्रमेण दितिजाः सर्वेपि निःशेषिताः स्ववंद्यः पितरौ वयं च निगडे बद्धाश्चिरान्मोचिताः ॥ त्रातं गोकुलमिंद्रतः प्रकुपितादुद्धृत्य गोवर्धनं प्राज्यं राज्यमकंटकं भुजबलेनावर्ज्य मय्यर्पितं ॥ २९ ॥ तथापीदमस्तु ॥ भूपालाः ० ॥ २६ ॥ अपि च ॥ साहित्यामृतसिंधुसांद्रलहरीनिर्व्याजमज्जन्मनोम-ज्जानः: परिशीलितामलकलामोदेन मेदस्विनः ॥ उद्यत्काव्यकथाप्रबंधमधुरद्राक्षा-सदक्षाक्षराः स्वैरं कंसवधं बुधाश्चिरतरं गायंतु कृष्णानुगाः ॥ २७ ॥ कृष्णः ॥ एवमस्त्विति निष्क्रांताः सर्वे ॥ ॥ इति कंसवधनाटके सप्तमोंकः ॥

---

No. 263. ग्रंथनाम, **कृष्णलीलानाटिका.** Name: Krishṇalîlâ Nâṭikâ.

पत्राणि ४४, folios 44; पंक्तयः ११, lines 11; अक्षराणि २८, letters 28.

ग्रंथसंख्या ८४७.

कर्ता, **वैद्यनाथः.** Author, Vaidyanâtha.

आरंभः । विविधभूमिकया विबुधोत्सवं समतनोद्य इहाद्भुतलीलया ॥ कलि-तपतिपटः कुतुकीनटः स सुखमातनुतां भवतां हरिः ॥ १ ॥ २ ॥ ३ ॥

समाप्तिः। तथापीदमस्तु भरतवाक्यं ॥ यावद्गौरी गिरीशे विकसति कमला केशवोरस्थलेपि ब्राह्मी ब्रह्मास्यकंजेष्वपि निगममयी यावदास्ते स्फुरंती ॥ तावद्गीर्वाणवाणी कविवरवदने भंगिभेदैरनंतैरातन्वाना प्रमोदं सहृदयहृदये सा समुल्लासमेतु ॥ इति निष्क्रांताः सर्वे ॥ चतुर्थोंकः ॥ इति वैद्यनाथकृतश्रीकृष्णलीला नाम नाटिका समाप्ता ॥

---

No. 264. ग्रंथनाम, **गंगाविलासचंपूः.** Name: Gangâvilâsa-champû.

पत्राणि ३९, folios 39; पंक्तयः ८, lines 8; अक्षराणि २६, letters 26.
कर्त्ता, **गोपालपंडितः.** Author, Gopâlapaṅḍita.

आरंभः। श्रीश्रीवल्लभयोर्जयंति नतयः सप्रेमलज्जास्मितोदंचच्चंचललोचनांचलमिलत्संवीक्षणोल्लासिताः ॥ वैवाह्योत्तमकर्मसंपरिचयप्रौढांगनानां गणैराशीर्भिः परिवर्द्धिता वरवधूसद्भावभाजोर्मिथः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ अग्रे खलादिवर्णनश्लोकाः ॥ १४ ॥ आसीद्राजाधिराजः क्षितितलविलसत्सद्गुणानां निधानं सद्धर्माणां निदानं हरिपदपरधी रूपसिंहाभिधानः ॥ विद्वद्स्तोमानः किल विमलमतिस्त्यक्तमिथ्याभिमानः क्ष्मेशश्चंचत्प्रतापज्वलनविदलितारातिपातंगवर्गः ॥ १५ ॥ तत्पुत्रः केशवाह्वः समदरिपुजनोद्दाममातंगसिंह इत्यादिः ॥

समाप्तिः। रिंगद्गांगतरंगभंगिमधुरस्वाव्यातिभव्याक्षरे चंपूजातिरसप्रपंचचतुरे गंगाविलासाभिधे ॥ गोपालाभिधपंडितेन रचिते काव्ये नियोगादगाच्छ्रीमत्केशवभूभुजो गुणनिधेः षष्ठस्तरंगो महान् ॥ ३२ ॥ ॥ इति श्रीसकलभूपालमंडलमंडनश्रीमहाराजाधिराजश्रीकेशवराजोद्योजितश्रीमन्महादेवपंडितात्मजगोपालपंडिताविरचिते गंगाविलासचंपूकाव्ये षष्ठस्तरंगः ॥ ॥

---

No. 265. ग्रंथनाम, **गीतगोविंदः** सटीकः. Name: Gîtagovinda, with a Commentary.

पत्राणि ६६, folios 66; पंक्तयः १५, lines 15; अक्षराणि ४०, letters 40.

संवत् १८१२. Saṁvat 1812.

कर्त्ता, **जयदेवः**; टीकाकारः, **शंकरमिश्रः.** Author, Jayadeva; Commentator, Śaṅkaramiśra.

आरंभः। मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ॥ इत्थं नंदनिदेशतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुनाकूले रहःकेलयः ॥ १ ॥ इति मूलादिः ॥

टीकारंभः । इह खलु निर्विघ्नपारिप्सितसमाप्त्यर्थमेतत्काव्यप्रतिपाद्यराधामाधव-केलिस्मरणरूपमंगलमादावाचरति ॥ मेघैरिति ॥

समाप्तिः । यद्गांधर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं यच्छृंगारविवेकतत्वर-चनाकाव्येषु लीलायितं ॥ तत्सर्वं जयदेवपंडितकवेः कृष्णैकतानात्मनः स्वच्छंदं परिशोधयंतु सुधियः श्रीगीतगोविंदतः ॥ १ ॥ इति श्रीगीतगोविंदे द्वादशः सर्गः ॥ ॥

टीकासमाप्तिः । एतत्काव्यविवेचनप्रणयिनां यत्संशयोन्मूलनात्पुण्यं यच्च हरिस्मृतेः प्रतिपदव्याख्यासु मे संचितं ॥ तेन प्रीतमनास्तनोतु सततं श्रेयो मम श्रीपतिः शश्वद्विद्वदशोष्यत (ता) प्रतिभुवः श्रीशालिनाथस्य च ॥ १ ॥ इति श्रीमहामहो-पाध्यायदिनेश्वरमिश्रात्मजमहामहोपाध्यायश्रीशंकरमिश्रविरचितायां श्रीशालिनाथ-कारितायां गीतगोविंदटीकायां रसमंजरीनामधेयायां द्वादशः सर्गः ॥ ॥

---

**No. 266.** ग्रंथनाम, **गोवर्द्धनसप्तशती** सटीका. Name: Govardhanasaptaśatî, with a Commentary.

पत्राणि २०९, folios 209; पंक्तयः १३, lines 13; अक्षराणि ४०, letters 40.

कर्ता, **आचार्यगोवर्द्धनः**; टीकाकारः, **अनंतपंडितः**. Author, Âchârya Govardhana; Commentator, Ananta-paṇḍita.

आरंभः । पाणिग्रहे पुलकितं वपुरैशं भूतिभूषितं जयति ॥ अंकुरित इव मनो-भूर्यस्मिन् भस्मावशेषोपि ॥ १ ॥

टीकारंभः । सर्वे साधुजनाः सदा यतश्चदा सत्संप्रदायादलं यज्ज्ञानाय कणा-दगौतममतान्यालोच्य तत्वार्थदान् ॥ वेदांतान् परिशीलयंति रहसि स्वानंदकं-दाकारं वंदे तं जगदीश्वरं दयितया सानंदमालिंगितं ॥ १ ॥ २ ॥ ३ ॥ गोवर्द्धनो-क्तिसुखदाननिदानमेतद्व्यंग्यार्थदीपनमनल्पचमत्कृतीनां ॥ भूयादनंतविबुधेन वि-धीयमानं प्रीत्यै सदा सकलपंडितमंडलीनां ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ विशिष्टक-र्तृशिष्टेष्टकर्तव्यतापरिप्राप्तं मंगलमनुषंगतो व्याख्यातृश्रोतृमंगलायोपनिबध्नाति ॥ पाणिग्रह इति ॥

समाप्तिः । कविसमरसिंहनादः स्वरानुवादः सुधैकसंवादः ॥ विद्वद्विनोदकंदः संदर्भोयं मया सृष्टः ॥ ६६० ॥ उदयनबलभद्राभ्यां सप्तशती शिष्यसोदराभ्यां मे ॥ द्यौरिव रविचंद्राभ्यां प्रकाशिता निर्मलीकृत्य ॥ ६६१ ॥

टीकासमाप्तिः । अंजलिः पुष्पांजलिः ॥ तात्पर्यान्यथानुपपत्या लक्षणेति वा ॥ तद्ग्राहकं चामलपदं ॥ ६६१ ॥ अग्रे समाप्तिश्लोकाः ॥ १ ॥ २ ॥ अब्दे लोचन-

बिंदुसप्तशशभृत्प्रस्तारसंलक्षिते० ॥ ३ ॥ ४ ॥ ॥ इति श्रीमद्गोदावरी०अनंतपंडितविरचितं सप्तशतीव्यंग्यार्थदीपनं समाप्तं ॥

---

**No. 267.** ग्रंथनाम, **चंद्रविलासनाटकं.** Name: Chandravilâsa-nâṭaka.

पत्राणि १५, folios 15; पंक्तयः ८, lines 8; अक्षराणि ३२, letters 32.

ग्रंथसंख्या २४०.

कर्ता, **गंगाधरः.** Author, Gangâdhara.

आरंभः । श्रीमान्संततसांबशंकरशिरःश्लाघ्यैकलीलांचितः सीतालक्ष्मणसंवृतिः प्रतिदिनं योगींद्रनेत्रोत्सवः ॥ दृप्यद्रावणघोरदर्पतिमिरव्रातच्छ-भेदकः कल्याणिसदा तनोतु भगवाञ्श्रीरामचंद्रो मम ॥ १ ॥

अंत्यपत्राभावः ।

---

**No. 268.** ग्रंथनाम, **दमयंतीचंप्वाष्टीका दुर्गपदबोधिनी.** Name: A Commentary on the Damayantî-Champû, explaining the difficult portions.

पत्राणि ८५, folios 85; पंक्तयः ८, lines 8; अक्षराणि ५०, letters 50.

संवत् १४२५. Samvat 1425.

कर्ता, **चंडपालः.** Author, Chaṇḍapâla.

आरंभः । स्वस्ति प्रबंधे चतुराननस्य भावानशेषान्विलसद्विशेषान् ॥ विवृण्वती स्वेन वचश्चयेन स्याद्भारती बोधविवृद्धये वः ॥ १ ॥ शक्तिस्त्रिविक्रमस्येव जीयाल्लोकातिलंघिनी ॥ दमयंतीप्रबंधेन सदा बलिमनोहिता ॥ ३ ॥ त्रैविक्रमाणि विषमाणि पदानि यानि तेषां प्रकाशमभिनंदति चंडपालः ॥ संस्थाविभावघटनात्पटुदृष्टिभावः संप्राप्य विश्रतितरां रसनिर्भरत्वं ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ सकलमंगलकारणं दुरितनिवारणमित्यादिः ॥

समाप्तिः । दमयंती प्रतिपादितवती न नामेति वितर्कं ॥ किं दूरीकृताहमिति वितर्कः ॥ इति विषमपदप्रकाशमेतं दमयंत्यां तनुते स्म चंडपालः ॥ शिशुमातिलतिकाविकासचैत्रं चतुरमिति स्फुटभित्तिचारुचित्रं ॥ १ ॥ २ ॥ इति श्रीचंडपालविरचिते दमयंतीविवरणे सप्तम उच्छ्वासः ॥ ॥

**No. 269.** ग्रंथनाम, **दशकुमारचरितं.** Name: **Daśakumâra-charita.**

पत्राणि ६६, folios 66; पंक्तयः ९, lines 9; अक्षराणि ५४, letters 54.

संवत् १८४५. Samvat 1845.

कर्ता, **दंडी.** Author, **Dandin.**

आरंभः। श्रुत्वा तु भुवनवृत्तांतमुत्तमांगना विस्मयविकसिताक्षी सस्मितमिदमभाषतेत्यादिः॥

समाप्तिः। अर्थमूला हिं विशिष्टकर्मारंभाः॥ न चान्यदस्ति पापिष्ठं तत्र दौर्बल्यादित्याकलय्य योगानन्वतिष्ठं॥

---

**No. 270.** ग्रंथनाम, **द्वादशाक्षरमालिका.** Name: **Dvádaśâkshara-mâlikâ.**

पत्राणि ३, folios 3; पंक्तयः ८, lines 8; अक्षराणि ३६, letters 36.

शकः १७९४. Śaka 1794.

कर्ता, **एकनाथः.** Author, **Ekanâtha.**

आरंभः। श्रीश त्वया करुणयार्पितया धिया त्वां स्तौमि प्रभो जडमतिः किमिहास्ति चित्रं॥ एतादृशाय विषयार्पितचेतसे मे यत्त्वं मतिं वितरासि स्तवनेऽद्भुतं तत्॥१॥ कल्याणं लब्धुकामः कियदवधि हरे द्वारि संकीर्तयंस्त्वां तिष्ठेयं क्लिष्टदेहः कुरु सदयमनो मत्प्रसादानुकूलं॥ वा नेति ब्रूहि केषांचिदपि गृहमियामर्थिनां कैव लज्जा कोशेनाढ्यो दयावानतिथिजनभृतौ कौतुकं नाश्नुते कः॥१॥

समाप्तिः। हरे मोहाधीनः श्रुतिविहितहीनो मुहुरितो बहूक्तया किं यन्मे तदखिलविदस्तेस्ति विदितं॥ वहे स्नेहैरंतस्तव पदमिहोदप्रकरुणामहौदार्यं हंत प्रथयति भवत्कीर्तिपटहः॥२८॥ अग्रे प्रार्थनादिश्लोकाः॥२९॥३०॥॥३१॥ सुवर्णगुणसंयुक्तां ग्रथितां हरिसूनुना॥ कंठे कुर्वंतु कवयो द्वादशाक्षरमालिकां॥३२॥ ॥ इति हरिसूनुना एकनाथेन रचिता द्वादशाक्षरमालिका पूर्णा॥ ॥

---

**No. 271.** ग्रंथनाम, **नीलकंठविजयचंपूः.** Name: **Nilakantha-vijayachampû.**

पत्राणि ४९, folios 49 ; पंक्तयः ११, lines 11 ; अक्षराणि ५०, letters 50.

कर्ता, **नीलकंठदीक्षितः**. Author, Nîlakanṭhadîkshita.

आरंभः । वदे वांछितलाभाय कर्म किं तन्न कथ्यते ॥ किं दंपतिमिति ब्रूयामुताहो दंपती इति ॥ १ ॥ दृष्ट्वा कौस्तुभमप्सरोगणमपि प्रक्रांतवादा मिथो गीर्वाणाः कति वा न संति भुवने भारा दिवः केवलं ॥ निष्क्रांते गरले द्रुते सुरगणे निश्चेष्टिते विष्टपे मा भैष्टेति गिराविरास धुरि यो देवस्तमेव स्तुमः ॥ २ ॥ अग्रे ग्रंथप्रस्तावनादिश्लोकाः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ अष्टत्रिंशदुपस्कृत-सप्तशताधिकचतुःसहस्रेषु ४७३८ ॥ कलिवर्षेषु गतेषु प्रथितः किल नीलकंठवि-जयोयं ॥ १० ॥ अस्ति किल समस्तसुरस्तोमवंदितचरणारविंदस्य भगवतो महेंद्रस्य स्थानमित्यादिः ॥

समाप्तिः । अर्चंतस्तरुणेंदुचूडमसकृत्संकीर्तयंतो हरिं ध्यायंतस्त्रिजगद्विमोह-जननीं शक्तिं परां शांभवीं ॥ आज्ञां मूर्धनि बिभ्रतः सुरगुरोरानंदयंतो मुनीन् स्वच्छंदं त्रिदिवौकसो बुभुजिरे स्वाराज्यमव्याहतं ॥ ६२ ॥ वाचं व्याकुरुते चिरं-तनगिरं मीमांसते चोभयीं पांथः काव्यपथेषु पादकमले सक्तः पुरारेरिति ॥ मामेतत्कथयिष्यतीति चरितं काव्यं मया तत्पुनस्तद्रक्ष्यन्निव वा न वा तदुपरि न्यस्तः समस्तो भरः ॥ ६३ ॥ ॥ इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्री-मदप्पयदीक्षितसोदर्याच्यादीक्षितपौत्रेण नारायणदीक्षितात्मजेन भूमिदेवीगर्भसंभवेन श्रीमन्नीलकंठदीक्षितेन विरचिते नीलकंठविजये पंचम आश्वासः ॥ ॥

---

No. 272. ग्रंथनाम, **नृसिंहचंपूः**. Name: Nṛisiṁha Champû.

पत्राणि १५, folios 15 ; पंक्तयः ९, lines 9 ; अक्षराणि ४८, letters 48.

शकः १७३९. Śaka 1739.

कर्ता, **केशवपंडितः**. Author, Keśavapanḍita.

आरंभः । कनकरुचिदुकूलः कुंडलोद्भासिगल्लः शमितभुवनभारः कोपि लीला-वतारः ॥ त्रिभुवनसहकारी शेषधारी मुकुंदः परिकलितरमांगो मंगलं वस्त-नोतु ॥ १ ॥ श्रीलौगाक्षिकुलारविंदतरणिर्माध्यंदिनाम्नायविन्मीमांसाबुगतर्कतंत्र-चतुरः साहित्यरत्नाकरः ॥ काव्यं श्रीनृहरेः करोति सुकृती गोदातटप्रोल्लसत्पुण्य-स्तंभनिवासिकेशवसुतानंतात्मजः केशवः ॥ २ ॥

समाप्तिः । काव्यं कर्तुमजानतापि रुचिरा चंपूरियं गुंफिता श्रीलक्ष्मीनृहरिप्रताप-महिमा सोयं समुज्जृंभते ॥ यत्सूते सलिलं नितांतविमलं चंद्रोपलः शीतलं सोयं सांद्रसुधामयस्य महिमा शीतद्युतेः केवलं ॥ १ ॥ इति श्रीभट्टकेशवपंडिताविरचिते नृसिंहचंपूकाव्ये षष्ठः स्तबकः ॥ ॥

**No. 273.** ग्रंथनाम, **नृसिंहचंपूः.** Name: Nṛisiṁha-Champû.

पत्राणि ८, folios 8; पंक्तयः १०, lines 10; अक्षराणि ६०, letters 60.

कर्ता, **श्रीज्ञानराजतनयः सूर्यः.** Author, Sûrya, son of Śrî-jñânarâja.

आरंभः। आनंदं विदधातु धातुरपि यो धाता यदंघ्रिस्रवद्दिव्यांभः सुरधुर्य धूर्जटिजटाजूटावतंसायते॥ भूयो दानवभारभंगुरधरोद्धारैकधीरः स्वयं लीलावैभवनिर्मितस्य जगतो वैकुंठकंठीरवः॥ १ ॥ २ ॥ ३ ॥ विष्णोश्चिरं चरणपंकजचंचरीकः श्रीज्ञानराजतनुजो दनुजांतकस्य ॥ सूर्यः करोति गुणगौरवकीर्तनेन स्वीयां सुधारसवता रसनां सनाथां॥ ४ ॥ इत्यादिः॥

समाप्तिः। प्रह्लादश्च प्रेमातिशयेन निजाशये शय इव तमानंदनिधिमच्युतं निदधे ॥ ११ ॥ १२ ॥ यद्ग्रंथान् समधीत्य शिष्यनिवहोप्याचार्यचर्यामगात्तत्सूनुर्गणिताप्रवीणतरणेः सत्कर्णधारः सुधीः ॥ संगीतागमकाव्यनाटकपटुः सूर्याभिधानः कविश्चंपूकाव्यमिदं चकार चतुरं लक्ष्मीपतिप्रीतये ॥ १३ ॥ ॥ इति श्रीनृसिंहचंपूकाव्ये पंचम उच्छ्वासः॥ ॥

---

**No. 274.** ग्रंथनाम, **पुरुषोत्तमचंपूः.** Name: Purushottama-Champû.

पत्राणि १२३, folios 123; पंक्तयः ८, lines 8; अक्षराणि ३२, letters 32.

कर्ता, **नरसिंहः.** Author, Narasiṁha.

आरंभः। अस्य ग्रंथस्यारंभपत्राणि चत्वारि खंडितानि ॥—कमलोल्लासकारणं॥ विश्वरूपं गुरुं वंदे दिवाकरमिवापरं॥ १२ ॥ आस्ते समस्तजनमानसराजहंसः श्रीनागनाथ इति विश्रुतनामधेयः॥ तस्यात्मजः सरसवाङ्नरसिंहनामा काव्यप्रबंधकरणोद्यतधीर्बभूव ॥ १३ ॥ तस्मिंस्तत्समये सुनिश्चलमतिर्भूतेशवंशोद्भवः पुण्याचारपरायणो नरहरेः सूनुः सदाधारकः॥ आपाजीति धरातले ध्वनितसन्नामांकुशक्ष्मापतेर्मैत्री किंचिदुवाच तन्नवरसारंभे वचः सुंदरं॥ १४ ॥ भो नागेशसुत प्रगल्भसुमते प्रौढे सतां संगमे नव्यां नातिपरां न वा लघुतरां नैव श्रुतां कर्हिचित् ॥ प्रोद्यत्कीर्तिनिधेः कथां नवरसैर्जुष्टामथ क्ष्मापतेश्चित्रार्थां कथय प्रमोदजलधेर्वीचीसमां कस्यचित् ॥ १५ ॥ तस्यातिप्रथितप्रगल्भचरितस्यादेशतः सत्कथां संभाव्य प्रचुरां सुधारससमस्वादैकधाराधरां॥ भूजानेः पुरुषोत्तमस्य गुणिनामाद्यस्य पुण्याकृतेर्निर्मातुं सुमतिं तनोति नृहरिः सद्गद्यपद्यैः शुभैः॥ १६ ॥ इत्यादिः॥

समाप्तिः । चंडतरद्युतिरोचितविश्वः प्रबलतमःपरिपंथिसदश्वः ॥ वारिजशोकविदारणबंधुः पातु चिरं मम दीधितिसिंधुः ॥ ११ ॥ शास्त्रकाव्यकलापंअग्रे ग्रंथः खंडितः ॥

---

**No. 275.** ग्रंथनाम, **प्रचंडगरुडव्यायोगः.** Name: Prachaṇḍa-garuḍavyâyoga.

पत्राणि १६, folios 16; पंक्तयः १७, lines 17; अक्षराणि ४८, letters 48.

ग्रंथसंख्या ८१६.

आद्यपत्रद्वयाभावः ।

समाप्तिः । कश्यपकद्रूविनताः प्रियं प्रियमिति परस्परमालोक्य हर्षोत्कर्षमभिनयंति ॥ शे० ॥ ( सस्नेहं पाणितलेन गरुडमामृश्य ) महात्मन्पत्ररथेंद्र किं ते भूयः प्रियमुपकरोमि ॥ ग० ॥ ( सविनयं ) भगवन्नितः परमपि प्रियमस्ति । दास्यं कौस्तुभलक्ष्मणः सुरपतेः सख्यं तव छात्रतां मात्रो बं (बं)धुजनस्य निस्तुषतया प्रीतिं परां चेतसः ॥ ऐश्वर्यं पतगव्रजस्य जगति स्फीतं यशश्चात्ययं पीयूषेण विना जरामरणयोः प्राप्याथ किं वार्थये ॥ ३६ ॥ तथापीदमस्तु भरतवाक्यं ॥ दितिजनिषु सकुत्साः पद्मयोनौ सलज्जाः सुरपरिषदि मूकाश्चंद्रमौलौ विलक्षाः ॥ परिचित इव तारामैत्रकेणेव शौरेर्मुखशशिनि समुत्काः पांतु वः श्रीदृगंताः ॥ ३७ ॥ एतन्नैगमिकं पवित्रमृषिभिर्जुष्टं समस्तै[रि]दं नीतं श्रव्यधुरां सुपर्णचरितं पाराशराद्यैर्भुवि ॥ भूयस्तद्भरतप्रणीतविधिना दृश्याभिनेयार्थतां यत्नादानयतः कवेः श्रमममी जानंतु सामाजिकाः ॥ ३८ ॥ इति निष्क्रांताः सर्वे ॥ विनतानंदो नामांकः ॥

---

**No. 276.** ग्रंथनाम, **प्रबोधचंद्रिका.** Name: Prabodha-Chandrikâ.

पत्राणि १०, folios 10; पंक्तयः १४, lines 14; अक्षराणि ५५, letters 55.

ग्रंथसंख्या ४८१.

आरंभः । हरिहरगुरुभक्तिः सर्वलोकानुरक्तस्त्रिभुवनगतकीर्तिः कांतिकंदर्पमूर्तिः ॥ रणरिपुगणकालो वैजलक्षोणिपालो जगति जयति दाता सर्वकर्मावदाता ॥ १ ॥ २ । ३ । श्रीमद्वैजलदेवेन रामभक्तिरतात्मना ॥ इति चिंतितमेकांते कदाचित्तिष्ठता सता ॥ ४ ॥ अस्थि वज्रमयं यस्य यस्य चर्म च वर्मवत् ॥ स दधीचिः स कर्णो वा नातिष्ठत्सुचिरं भुवि ॥ ५ ॥ न संप्राति शरीराणि न राज्यानि धनानि

वा ॥ तेषां स्वर्गगतानां वै कीर्तिर्जागर्ति भूतले ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० - चिंतयान्निति निर्यातः क्रीडंतं श्रीहिराधरं ॥ श्रीमान्वैजलभूपालो विलोक्येत्यब्रवीत्सुतं ॥ विद्यया द्योतते राज्यं विद्यया जीयते रिपुः ॥ विद्यया ज्ञायते कृत्यं विद्यया लभते यशः ॥ ११ ॥ १२ ॥ १३ ॥ २९ ॥ तस्माद्व्याकरणं पूर्वं पठ त्वं बुद्धिहेतवे ॥ पश्चान्नीतिं पठित्वा त्वं राज्यं भज यथासुखं ॥

समाप्तिः । ग्रंथस्य गौरवभिया मया नोक्तं सविस्तरं ॥ ७० ॥

---

**No. 277.** ग्रंथनाम, **भट्टिकाव्यं.** Name : Bhaṭṭi-Kâvya.

पत्राणि ५१, folios 51 ; पंक्तयः १५, lines 15 ; अक्षराणि ४३, letters 43.

ग्रंथसंख्या २०५६.

आरंभः । अभून्नृपो विबुधसखः परंतपः श्रुतान्वितो दशरथ इत्युदारधीः ॥ गुणैर्वरं भवनहितच्छलेन यं सनातनः पितरमुपागमत्स्वयं ॥ १ ॥ सोध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनताप्सींत्सममंस्त बंधून् । व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च ॥ २ ॥

समाप्तिः । दीपतुल्यः प्रबोधोयं शब्दलक्षणचक्षुषां ॥ हस्तादर्श इवांधानां भवेद्व्याकरणं विना ॥ २ ॥ व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामतः ॥ हता दुर्मेध[स]श्चास्मिन्विद्वत्प्रियतया मया ॥ ३ ॥ काव्यमिदं विहितं मया वलभ्यां श्रीधरसेननरेंद्रपालितायां ॥ कीर्तिरतो भवतान्नृपस्य तस्य क्षेमकरः क्षितिपो यतः प्रजानां ॥ ४ ॥

---

**No. 278.** ग्रंथनाम, **माधवचंपूः.** Name : Mâdhava-Champû.

पत्राणि २३, folios 23 ; पंक्तयः १०, lines 10 ; अक्षराणि ४२, letters 42.

ग्रंथसंख्या ६०३.

कर्ता, **चिरंजीवभट्टाचार्यः.** Author, Chirañjîvabhaṭṭâchârya.

आरंभः । तमोगणविनाशिनी सकलकालमुद्योतिनी धरातलविहारिणी जडसमाजविद्वेषिणी ॥ कलानिधिसहायिनी लसदलोलसौदामिनी मदंतरविलंबिनी भवतु कापि कादंबिनी ॥ १ ॥

समाप्तिः । द्वैताद्वैतमतादिनिर्णयविधिप्रोद्बुद्धबुद्धिः श्रुतो भट्टाचार्यशताव्धान इति यो गौडोद्भवः सत्कविः ॥ आबाल्यं विदुषा तदात्मजचिरंजीवेन या निर्मिता चंपूर्माधववर्णिका ऽ[त्र] समभूदुच्छ्वासकः पंचमः ॥

**No. 279.** ग्रंथनाम, **मिथ्याज्ञानखंडननाटकं.** Name: Mithyâjñâna-Khaṇḍana Nâṭaka.

पत्राणि ८, folios 8 ; पंक्तयः ११, lines 11 ; अक्षराणि ३६, letters 36.

कर्ता, **रविदासः.** Author, Ravidâsa.

आरंभः । श्रीदेवी वः सुखायाखिलजनजननी पावनी पार्वती स्याद्वाग्देवी वाक्प्रदास्तु द्युमणिरपि परां सिद्धिमृद्धिं ददातु ॥ रामः कामं प्रकामं वितरतु सततं धामधामादिदेवश्चंद्रार्धे ...... ह्यभयवरकरः कीर्तिकामप्रदोस्तु ॥ १ ॥ सतां सन्निहितो नित्यं पाषंडिपथदूरगः ॥ स श्रीपतिः परामृद्धिं सर्वसिद्धिं प्रयच्छतु ॥ २ ॥

समाप्तिः । वेदाः कुर्वंतु कल्याणं श्रीरस्तु सदने हिता ॥ सारदा संपदां नः स्या......तु तरंगिणी ॥ ४९ ॥ ॥ इति श्रीकविरविदासविरचितं मिथ्याज्ञानखंडनं नाम नाटकं संपूर्णं ॥ ॥

---

**No. 280.** ग्रंथनाम, **मुरारिविजयं नाटकं.** Name: Murârivijaya Nâṭaka.

पत्राणि ७८, folios 78 पंक्तयः ७, lines 7; अक्षराणि ५८, letters 58.

ग्रंथसंख्या १९६९.

कर्ता, **विश्वरूपकृष्णभट्टः.** Author, Viśvarûpa Kṛishṇabhaṭṭa.

आरंभः । मुरारिविजये स्वस्य कृतौ प्राकृतसंस्कृतं ॥ क्रियते विश्वरूपेण कृष्णभट्टेन धीमता ॥ १ ॥ नेपथ्ये ॥ परित्यक्तसर्वकार्यं विषण्णवदनं सबाष्पनयनं च ॥ अस्माकं पुरं जातं प्रभौ कुत्रापि प्रोषिते ॥ २ ॥

समाप्तिः । राजा । वत्स श्रुतं भवता तावत्सर्वथाद्य कृतकृत्योस्मि ॥ कृष्णः ॥ किं ते भूयः प्रियमुपकरोमि ॥ राजा ॥ वत्स अतः परमपि प्रियमस्ति ॥ यत्खलु ॥ भूर्निःशेषितदानवा विरचिता कारागृहान्मोचिता गीर्वाणाः पितरो वयं च सकलं राज्यं च मय्यर्पितं ॥ धर्मः शर्मकरः पुरेव परितः प्रावर्ति पृथ्वीतले किं तद्यन्न कृतं त्वया मम हितं यन्मां पुनः पृच्छसि ॥ तथापीदमस्तु ॥ श्रुतिर्देवी यावन्निजनिखिलभावोदयवती त्रिलोकीनिर्मातुर्युवतिरिव कंठं कलयति ॥ मधु क्षीरं द्राक्षामपि विजयमाना विदधतां सतां मोदं तावन्मधुरिमधुरीणाः कविगिरः ॥ किं च ॥ समस्तैः सिद्धांतैर्महितमहिमांशस्य कमलाविलासानां हेतोः विबुधमुकुटालंकृतिमणेः ॥ गुणालंकाराढ्या सरसपदयुक्ता मधुभिदः कृतिः कृष्णस्येयं लुठतु वनमाले व पदयोः ॥ इति निष्क्रांताः सर्वे ॥ कंसहिंसनं नाम पंचमोंकः ॥

**No. 281.** ग्रंथनाम, **रतिमन्मथनाटकं.** Name: Rati-Manmatha Nâṭaka.

पत्राणि ३७, folios 37; पंक्तयः १२, lines 12; अक्षराणि ४०, letters 40.

कर्ता, **जगन्नाथः.** Author, Jagannâtha.

आरंभः ॥ साकूताः शशिशेखरे सुरसरित्याविष्कृतानादराः स्मेरा भृंगिरिटावनन्यशरणे दीने दयामेदुराः ॥ वात्सल्यप्रचुराः प्रसूनविशिखे रत्यां प्रसादोत्तराः कल्याणानि तरंगयंतु जगतां मातुः कटाक्षांकुराः ॥ १ ॥

समाप्तिः । मोदंतां हतशात्रवाश्चिरतरं धात्रीश्वरा धार्मिकाः स्वैरोन्मीलितसस्यजातसुभगं वर्षंतु वर्षांबुदाः ॥ धीरोदारसुधीगृहेषु विहृतिं बध्नातु पद्मालया चातुर्वर्ण्यमपि स्वधर्मनिरतं नित्योत्सवैरेधतां ॥ २९ ॥ इति निष्क्रांताः सर्वे ॥ ॥ पचमोंकः ॥ ॥

---

**No. 282.** ग्रंथनाम, **राक्षसकाव्यं टीकासमेतं.** Name: Râkshasa-Kâvya, with a Commentary.

पत्राणि ९, folios 9; पंक्तयः ९, lines 9; अक्षराणि ४०, letters 40.

ग्रंथसंख्या १०१.

संवत् १८५६. Saṁvat 1856.

कर्ता, **कालिदासः.** Author, Kâlidâsa.

आरंभः । कश्चिद्वनं बहुवनं विचरन्वनस्थो वश्यां वनात्मवदनां वनितां वनार्द्रां॥ तर्वर्यरिप्रदमुदीक्ष्य समुत्थितं खे नागामिमां मदकलः सकलं बभाषे ॥ ९ ॥

समाप्तिः । एतावदुत्तमवचः सुमनाः स उक्त्वा रंत्वा दिनं सह तया प्रियया ह्यदीनः ॥ युक्तं चतुर्भिरथ(न) डु द्विरदीनवद्भिरारुह्य यानमथ संप्रययौ स्वगेहं ॥ २० ॥

---

**No. 283.** ग्रंथनाम, **रामावयवमंजरी.** Name: Râmâvayava-Mañjarî.

पत्राणि २३, folios 23; पंक्तयः ९, lines 9; अक्षराणि २१, letters 21.

ग्रंथसंख्या २७१.

शकः १७३१. Śaka 1731.

कर्ता, **रामकृष्णः कादंबोपाह्वयः.** Author, Râmakṛishṇa Kâdamba.

आरंभः । नारायणाख्यपितरं विद्योद्बोधकमहं सदा नौमि ॥ अखिलध्वांतध्वंसैकदीक्षितश्रीधुंडिराजगुरुवर्यं ॥ १ ॥ २ ॥ ३ ॥

समाप्तिः। रामकृष्णेन गोविंदवैद्यस्यैषा सुमंजरी ॥ दत्ता मोदाय भवतु वाल्मीकिद्रुमसंगता ॥

---

No. 284. ग्रंथनाम, ललितास्तवरत्नं. Name: Lalitâstava-ratna.

पत्राणि ५, folios 5; पंक्तयः १५, lines 15; अक्षराणि ६८, letters 68.

कर्ता, दुर्वासाः. Author, Durvâsas.

आरंभः। वंदे गजेंद्रवदनं वामांकारूढवल्लभाश्लिष्टं ॥ कुंकुमपरागशोणं कुवलयिनीजारकोरकापीडं ॥ १ ॥ स जयति सुवर्णशैलः सकलजगच्चक्रसंघटितमूर्तिः ॥ कांचननिकुंजवाटीकंदलदमरीप्रपंचसंगीतः ॥ २ ॥ हरिहयनैर्ऋतमारुतहरितामंतेष्ववस्थितं तस्य ॥ विनुमः सानुत्रितयं विधिहरिगौरीशविष्टपाधारं ॥ ३ ॥ इत्यादिः।

समाप्तिः। मधुरस्मितां मदारुणनयनां मातंगकुंभवक्षोजां ॥ चंद्रावतंसिनीं त्वां सविधे पश्यंति सुकृतिनः केचित् ॥ २११ ॥ ललितायाः स्तवरत्नं ललितपदाभिः प्रणीतमार्याभिः ॥ प्रतिदिनमवनौ पठतां पलानि वक्तुं प्रगल्भते सैव ॥ २१२ ॥ ॥ इति दुर्वाससा विरचितं ललितास्तवरत्नं संपूर्णं ॥ ॥

---

No. 285. ग्रंथनाम, विदग्धमुखमंडनं सटीकं. Name: Vidagdhamukhamaṇḍana, with a Commentary.

पत्राणि ७३, folios 73; पंक्तयः ९, lines 9; अक्षराणि ३६, letters 36.

कर्ता, धर्मदासः. Author, Dharmadâsa.

आरंभः। सिद्धौषधानि भवदुःखमहागदानां पुण्यात्मनां परमकर्णरसायनानि ॥ प्रक्षालनैकसलिलानि मनोमलानां शौद्धोदनेः प्रवचनानि चिरं जयंति ॥ १ ॥

टीकारंभः। शौद्धोदनेः बौद्धस्य प्रवचनानि चिरं जयंति सर्वोत्कर्षेण वर्तंते ॥

समाप्तिः। पूर्णचंद्रमुखी रम्या कामिनी निर्मलांबरा ॥ करोति कस्य न स्वांतमेकांते मदनोत्तरं ॥ ७३ ॥ इति च्युतदत्ताक्षरजातिः ॥ ॥ इति श्रीविदग्धमुखमंडने धर्मदासकृते चतुर्थः परिच्छेदः ॥ ॥

टीकासमाप्तिः। अत्र कस्थाने यकारदानं ॥ ७३ ॥ इति दत्ताक्षरं ॥

**No. 286.** ग्रंथनाम, **विद्धशालभंजिका नाटिका.** Name: Viddha-Śâlabhañjikâ Nâṭikâ.

पत्राणि १६, folios 16; पंक्तयः १४, lines 14; अक्षराणि ५७, letters 57. ग्रंथसंख्या ७९८.

शकः १७४५. Śaka 1745.

कर्ता, **राजशेखरः.** Author, Râjaśekhara.

आरंभः । कुलगुरुरबलानां केलिदीक्षाप्रदाने परमसुहृदनंगो रोहिणीवल्लभस्य ॥ अपि कुसुमपृषत्कैर्देवदेवस्य जेता जयति सुरतलीलानाटिकासूत्रधारः ॥ १ ॥

समाप्तिः । तथापीदमस्तु ॥ वामांगं पृथुलस्तनस्तबकितं यावद्भवानीपतेर्लक्ष्मीकंठहठग्रहव्यसनिता यावच्च दोष्णां हरेः ॥ यावच्च प्रतिमाप्रसारणविधौ व्यग्रौ करौ ब्रह्मणः स्थेयासुः श्रुतिशुक्तिलेह्यमधुरास्तावत्सतां सूक्तयः ॥ १ ॥ इति निष्क्रांताः सर्वे ॥ चतुर्थोंकः ॥ ४ ॥

---

**No. 287.** ग्रंथनाम, **विश्वगुणादर्शस्य टीका.** Name: A commentary on the Viśvaguṇâdarśa.

पत्राणि १३३, folios 133; पंक्तयः ७, lines 7; अक्षराणि ५४, letters 54.

आरंभः । अथ खलु वेंकटाध्वरी नाम कविः विश्वगुणादर्शं नाम काव्यं चिकीर्षुरादौ प्रबंधमुखलक्षणामाशिषं चिकीर्षितस्य ग्रंथस्य प्रत्यूहप्रशमनाय प्रस्तौति ॥ श्रीराजीवेति ॥ श्रीयुक्तस्य राजीवाक्षस्य विष्णोरित्यादिः ।

समाप्तिः । देशिकानां उपदेष्टॄणां वचः उक्तविधं जयतु । सुप्रसन्नं निगमवर्त्म वैदिकमार्गो जयतु । अंजनाद्रौ नीलाचले मुरारिः श्रीनिवासो जयतु सर्वोत्कर्षेण वर्ततां ॥ ९२ ॥ ॥ इति श्रीमत्कौशिककुलपयःपारावारविरचिता विश्वगुणादर्शटीका समाप्ता ॥

---

**No. 288.** ग्रंथनाम, **श्रीदामचरितं नाटकं.** Name: Śrî-Dâma-charita-Nâṭaka.

पत्राणि ५४, folios 54; पंक्तयः ८, lines 8; अक्षराणि ३८, letters 38. ग्रंथसंख्या १०२६.

संवत् १७३१. Saṁvat 1731.

कर्ता, **सामराजदीक्षितः.** Author, Sâmarâjadîkshita.

आरंभः । जलधरसदृशे मुकुंदवक्षस्यचिरस्चि[प्राति]भां समुद्वहंत्याः ॥ त्वदि कमलभुवः श्रियं वितन्वन् गरुडमणेर्हरतामशर्म कृष्णः ॥ १ ॥

समाप्तिः । इति दीक्षितनरहरिसूरिसूनुदीक्षितसामराजकृतं श्रीदामचरितं नाटकं समाप्तं ॥ अचलाग्निऋषींदुमिते १७३७ वर्षे स्कंदे च बाहुलस्य सिते ॥ श्रीसामराजकविना रचितं श्रीदामचरितमिदं ॥ १ ॥

---

**No. 289.** ग्रंथनाम, **श्रीनिवासकाव्यं.** Name: Srînivâsa-Kâvya.

पत्राणि ४४, folios 44; पंक्तयः ९, lines 9; अक्षराणि ४४, letters 44.
ग्रंथसंख्या ७९२.
कर्ता, **त्र्यंबकः.** Author Tryambaka.

आरंभः । श्रीवेंकटेशांघ्रिसरोजयुग्मं लक्ष्मीधराभ्यां परिसेव्यमानं ॥ ब्रह्मादिभिर्ध्यातमभीष्टसिध्यै स्वाभीष्टसिध्यर्थमहं नमामि ॥ १ ॥ प्राचीनानि बहूनि संति विबुधां काव्यानि नव्यान्यपि प्रासालंकृतिबंधबंधुरधियां सच्छास्त्रबोधश्रियां ॥ कुर्वेऽथापि यथामति क्षितिभतो नाथस्य काव्यं नवं दृष्ट्वा किं न पतंति पन्नगरिपोर्वेगश्रियोन्ये खगाः ॥२ ॥

समाप्तिः । भारद्वाजमुनिप्रसिद्धतरसद्गोत्रे पवित्रोभवद्विद्वच्छ्रीधरनंदनो द्विजवरः श्रीपद्मनाभाभिधः ॥ तत्पुत्रेण त्रियंबकेन रचिते श्रीवेंकटेशाभिधे काव्येसौ दशमः समाप्तिमगमत्सर्गोतिमश्चोत्तमः ॥ १० ॥

---

No. 290. ग्रंथनाम, **श्रीभागवतचंपूः.** Name: Srî-Bhâgavata-Champû.

पत्राणि ५५, folios 55; पंक्तयः ११, lines 11; अक्षराणि ५७, letters 57.
ग्रंथसंख्या २१५५.
कर्ता, **अभिनवकालिदासः.** Author, Abhinavakâlidâsa.

आरंभः । श्रीगणेशाय नमः ॥ कल्याणं नः प्रभूतं कलयतु ललितालापशैलेशबालालीलाजालानुकूला शिशिरकरकलाभानुमालाजटाला ॥ एषा शेषाहिभूषापरिकलितसुधापूरधारानुकारा भद्रा मुद्रा विनिद्रा पुरहरणविधौ कापि कारुण्यपूरा ॥ १ ॥

समाप्तिः । यस्मिञ्शंकरभूरिसौरभझरीजृंभत्कटाक्षच्छटापाताः कल्पलतावितानसुमनोगुंफप्रियंभावुकाः ॥ तस्यासौ नवकालिदासविदुषः षष्ठोपि काव्यामृते चंपूनामनि धीमतां कृतसमुल्लासो विलासोगमत् ॥ १२४ ॥ इति श्रीअभिनवकालिदासविरचिते षष्ठः स्तबकः समाप्तिमगमत् ॥

**No 291.** ग्रंथनाम, **संकल्पसूर्योदयनाटकं.** Name: Saṅkalpa-Sûryodaya-Nâṭaka.

पत्राणि ५८, folios 58; पंक्तयः १४, lines 14; अक्षराणि ५३, letters 53.

ग्रंथसंख्या २६८९.

कर्ता, **वेंकटनाथः.** Author, Veṅkaṭanâtha.

आरंभः यद्भक्तिप्रचयात्मके दिनमुखे दृष्टिक्षमः क्षेत्रिणः क्षिप्रं संसृतिशर्वरीं क्षिपाति यत्संकल्पसूर्योदयः ॥ तत्वैरस्त्रविभूषणैरधिगतः स्वाधीननित्योन्नतिः श्रीमानस्तु स मे समस्तविपदुत्ताराय नारायणः ॥ १ ॥ अपि च ॥ लक्ष्ये यत्र श्रुतिमितगुणाकृष्टिलब्धावधानैः प्रत्यग्बाणः प्रणवधनुषा सत्ववद्भिः प्रयुक्तः ॥ मध्येवक्षः स्फुरति महसा पत्रलः कौस्तुभात्मा पद्माकांतः स भवतु दयादुग्ध-सिंधुः श्रियै वः ॥ २ ॥ नांद्यंते सूत्रधारः ॥

समाप्तिः। किं ते भूयः प्रियमुपहरामि ॥ राजा ॥ भगवति महाभावे ॥ किं तत्प्रियं परमितः प्रतिपादनीयं पद्मासहायपदपद्मजुषा भवत्या ॥ पश्यामि यत्पुरुषमेव-मपास्तदोषं राका शशांकमिव राहुमुखाद्विमुक्तं ॥ ५९ ॥ अपि च ॥ अपुनरुदयो मायामोहस्थलीमधिशायितः स्फुरति मधुभिद्भव्या भक्तिर्भवत्यनुपप्लवा ॥ सरणिम-पुनःप्रत्यावृत्तिं त्यजत्यनघः पुमान् किमिह बहुभिः क्रीडत्यग्रे समीहितमद्य नः ॥ ६० ॥ किमिह भवत्याः सकाशादन्यदहमाशासे ॥ तथापीदमस्तु भरतवाक्यं। अंगीकुर्वंत्वकलुषधियो नित्यमध्यात्मविद्यामाद्यो धर्मः स्पृशतु वसुधामाशिषः पारवर्ती ॥ देवः श्रीमान् निरवधिदयासिंधुरस्मिन्निबंधे श्रोता वक्ता वचनविषयः प्रीयतां वासुदेवः ॥ ६१ ॥ इति निष्क्रांताः सर्वे इति दशमोंकः ॥

---

**No. 292.** ग्रंथनाम, **संकल्पसूर्योदयनाटकस्य टीका.** Name: A commentary on the Saṅkalpa-Sûryodaya-Nâṭaka.

पत्राणि २३३, folios 233; पंक्तयः १०, lines 10; अक्षराणि २८, letters 28.

कर्ता, **अहोबलः.** Author, Ahobala.

आरंभः। श्रीशं श्रियं वेंकटदेशिकेंद्रं परांकुशार्यं यमिनं प्रणम्य ॥ अहो-बलोयं विवृणोति विद्वान् संकल्पसूर्योदयमात्रिवर्गः ॥ १ ॥ इह खलु भगवान् कवितार्किककंठीरवः श्रीमद्वेंकटनाथो वेदांताचार्यः श्रीमच्छारीरकभाष्यस्याति-गहनगंभीरतया— ।

समाप्तिः। अस्मत्प्रयुक्तप्रतिष्ठां आवाभ्यां प्रयुक्ता प्रतिष्ठा यस्यास्तां तथोक्तां कि-मिति ॥ परित्यागं दिनैः अत एव परित्यागेन दिनैः विज्ञानैः किं किं प्रयोजनं

ज्ञानदर्शनप्राप्त्यादिषु अकिंचित्करत्वादिति भावः ॥ ॥ इति संकल्पसूर्योदयविवरणे दशमोंकः ॥ ॥

---

**No. 293.** ग्रंथनाम, **सुभद्राहरणं श्रीगदितं.** Name: Subhadrâharaṇa-Śrîgadita.

पत्राणि **१६**, folios 16; **पंक्तयः ८**, lines 8; **अक्षराणि ३२**, letters 32.

ग्रंथसंख्या २९६.

शकः १७५१. Śaka 1751.

कर्ता, **माधवभट्टः.** Author, Mâdhavabhaṭṭa.

आरंभः । श्रीगणेशाय नमः ॥ शृंगारं हैमवत्या प्रथयति धनुषा वीरमास्येन हास्यं बीभत्सं स्रक्कपालैर्भयमहिपतिना भूविजृंभेण रौद्रं ॥ कारुण्यं दक्षपत्न्याद्भुतमरुणविधूषर्बुधैर्योक्षिभाग्भिः शांतश्चित्तेन भूयात्स नवरसमयः शंकरः शर्मणे वः ॥ १ ॥ नांद्यंते सूत्रधारः ॥

समाप्तिः । पातिव्रत्यपराः स्त्रियः प्रसुवतां पुत्रान्प्रकृष्टायुषः स्यादुर्वी सकलोर्वरा नरपतिर्भूयात्परं नीतिमान् ॥ लोकः पापपराङ्मुखोऽस्तु सुजनाः संतु प्रसन्नाशया भूयासुर्विदिशो दिशश्च सततं मांगल्यमालोज्ज्वलाः ॥ ४ ॥ सर्वे एवमस्त्विति निष्क्रांताः ॥ सुभद्राहरणे प्रथमोंकः ॥ इति श्रीमन्मंडलेश्वरभट्टात्मजमाधवभट्टविरचितं सुभद्राहरणं नाम श्रीगदितं समाप्तं ॥

---

**No. 294.** ग्रंथनाम, **धातुपाठः कविकल्पद्रुमनाम्ना प्रसिद्धः.** Name: Dhâtupâṭha called Kavi-Kalpadruma.

पत्राणि १६, folios 16; पंक्तयः ११, lines 11; अक्षराणि ३५, letters 35.

ग्रंथसंख्या ३८९.

कर्ता, **श्रीपंडितबोपदेवः.** Author, Śrî Paṇḍita Bopadeva.

आरंभः । शब्दाकरकरग्राममर्थमंडलमंडलं ॥ ज्ञानात्मानमनाद्यंतमादिस्थं तमुपास्महे ॥ १ ॥ इंद्रश्चंद्रः काशिकृत्स्नापिशली शाकटायनः ॥ पाणिन्यमरजैनेंद्रा जयंत्यष्टादिशाब्दिकाः ॥ २ ॥ ३ ॥ ४ ॥

समाप्तिः । विद्वद्धनेशशिष्येण भिषक्केशवसूनुना ॥ तेन(ने) वेदपध(द)स्थेन बोपदेवद्विजेन यः ॥ ६८ ॥ श्रीपंडितबोपदेवविरचितः कविकल्पद्रुमो धातुपाठः समाप्तः ॥

**No. 295.** ग्रंथनाम, **भूषणसारः**. Name: Bhûshaṇa-sâra.

पत्राणि ४७, folios 47; पंक्तयः ११, lines 11; अक्षराणि ४८, letters 48.

कर्ता, **कौंडभट्टः**. Author, Kauṇḍabhaṭṭa.

आरंभः । श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणं ॥ स्फोटरूपं यतः सर्वं जगदेतद्विवर्तते ॥ १ ॥ २ ॥ पाणिन्यादिमुनीन्प्रणम्य पितरं रंगोजिभट्टाभिधं द्वैतध्वांतनिवारणादिफालिका—वाग्देवतां ॥ ढुंढिं गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान् सिद्धांतानुपपत्तिभिः प्रकटये तेषां वचो दूषये ॥ ३ ॥ प्रारिप्सितप्रतिबंधकोपशमाय कृतं श्रीफणिपतिस्मरणरूपं मंगलं ॥

समाप्तिः । तमेव भांतमनुभाति सर्वमिदं विभातीति श्रुतिसिद्धं स्वपरप्रकाशत्वं सूचयन् स्फुटत्यर्थोस्मादिति स्फोट इति यौगिकस्फोटशब्दाभिधेयत्वं सूचयति ॥ निर्विघ्नप्रचयायांते मंगलं स्तुतिनतिरूपमाह पूर्णात्मनेत्यादिना ॥ ७१ ॥ अशेषफलदातारमपि सर्वेश्वरं गुरुं ॥ श्रीमद्भूषणसारेण भूषये शेषभूषणं ॥ १ ॥ इति श्रीमत्पद०रंगोजीभट्टात्मजकौंडभट्टकृते भूषणसारे स्फोटपदः समाप्तः ॥

---

**No. 296.** ग्रंथनाम, **अलंकारकौस्तुभः**. Name: Alaṅkâra-Kaustubha.

पत्राणि २४९, folios 249; पंक्तय ९: lines 9; अक्षराणि ३६, letters 36.

शकः १७४२, सवंत् १८७७. Śaka 1742, Saṁvat 1877.

कर्ता, **विश्वेश्वरपंडितः**. Author, Viśveśvarapaṇḍita.

आरंभः । दत्तस्तन्यरसं कराग्रिमभुवा वक्त्रांतरेष्वादरादोर्विक्षेपनिषिद्धकुंभविचरन्मत्तद्विरेफोत्करं ॥ अंबाया धयतोः पयोधरयुगं तिर्यङ्मिथः पश्यतोर्बाल्यस्नेहविजृंभितं विजयते द्वैमातुरस्कंदयोः ॥ १ ॥ २ ॥ धियां वैधेयानां भवति विषयोसावविषयो बुधानां स्वाधानं न च कुतुकमेतादृशकृतेः ॥ तथापीदं पारिप्लवयति मनो मे सुमहतां निबंधानामेकीभवितुमभिसंधाननिवहः ॥ ३ ॥ अथ तेषामुद्देशः ॥ उपमानन्वय उक्तः स्यादि[ति] सप्त श्लोकाः ॥ ७ ॥ ॥ तत्र प्रथमं यत्किंचित्काव्यबंधेषु सादृश्येनोपमीयते ॥ उपमा नाम सा ज्ञेया गुणाकृतिसमाश्रयेति भरतः ॥ तत्प्रकृतिभूतत्वेन सर्वालंकारेष्वभ्यर्हितत्वादुपमा निरूप्यत इति तल्लक्षणमाह ॥ तत्रैकवाक्यवाच्यं सादृश्यं भिन्नयोरुपमा ॥

समाप्तिः । अत्र भगवदालोकनेन भगवत्याः सर्वमंगलाया विभ्रमति निर्वेदोत्कंठानां शबलत्वं कविनिष्ठगौरीविषयकभावांगमिति सर्वं शिवं ॥ अन्यैरुदीरितामि-

त्येकः श्लोकः ॥ १ ॥ विश्वेश्वरेण मनना-चलेन साहित्यसिंधुतः कृष्टः ॥ पुरुषोत्तमत्दृदयगतः स्फुरत्वलंकारकौस्तुभः सुचिरं ॥ २ ॥ ३ ॥ ॥ इति श्रीविश्वेश्वरपंडितविरचितोलंकारकौस्तुभः संपूर्णः ॥ ॥

---

**No. 297.** ग्रंथनाम, **काव्यालंकारसूत्राणि सवृत्तीनि.** Name: Kâvyâlankâra-Sûtras, with Vṛitti.

पत्राणि, ५०, folios 50; पंक्तयः ७, lines 7; अक्षराणि ४८, letters 48.

ग्रंथसंख्या १०५०.

संवत् १८००. Samvat 1800.

कर्ता, **वामनाचार्यः.** Author, Vâmanâchârya.

आरंभः । प्रणम्य परमं ज्योतिर्वामिनेन कविप्रिया ॥ काव्यालंकारसूत्राणां स्वर्थो वृत्तिर्विधीयते ॥ १ ॥ काव्यं ग्राह्यमलंकारात् ॥ सूत्रं ॥ ॥ वृत्तिः ॥ काव्यं ग्राह्यमुपादेयं भवत्यलंकारात् ॥ काव्यशब्दोयं गुणालंकारसंस्कृतयोः शब्दार्थयोर्वर्तते ॥

समाप्तिः । सदसंतो मया शब्दा विविच्याल्पेन दर्शिताः ॥ अनयैव दिशा कार्यं शेषाणामप्यवेक्षणं ॥ इति श्रीवामनाचार्यकृतौ काव्यालंकारसूत्रवृत्तौ पंचमाधिकरणे द्वितीयोऽध्यायः ॥

---

**No. 298.** ग्रंथनाम, **कुवलयानंदकारिकादीपिका.** Name: Kuvalayânanda-Kârikâ-Dîpikâ.

पत्राणि ६२, folios 62; पंक्तयः १०, lines 10; अक्षराणि ४१, letters 41.

ग्रंथसंख्या १५८८.

कर्ता, **आशाधरः.** Author, Âśâdhara.

आरंभः । शिवयोस्तनयं नत्वा गुरुं च धरणीधरं ॥ कुर्वे कुवलयानंदकारिकादीपिकां मुदे ॥ १ ॥ २ ॥ अथ तत्रभवानप्पयदीक्षितनामा कविः सत्दृदयत्दृदयानंदार्थमलंकाराणां लक्ष्यलक्षणोपेताः कारिकाः कृत्वा तद्व्याख्यानरूपं कुवलयानंदाख्यं ग्रंथं कृतवान् ॥ कारिकाश्च तत उद्धृत्य क्रमेण लिखितवान् ॥

समाप्तिः । एषां दोषागतार्थत्वादर्थदोषतया पुनः ॥ नोक्ताः कुवलयानंदे शब्दानां चाप्यलंक्रियाः ॥ २०२ ॥ मूलं ॥ दीपिकायास्तु ॥ आशाधरकवेर्वाचं

वाचोयुक्तिविशारदाः ॥ अनुगृह्णंतु बालस्य काकली कस्य नोदने ॥ इति आशाधररचितकारिकादीपिका समाप्ता ॥

---

**No. 299.** ग्रंथनाम, **छंदोमंजरी.** Name: Chhandomañjarî.

पत्राणि २३, folios 23; पंक्तयः ११, lines 11; अक्षराणि २८, letters 28.

ग्रंथसंख्या ४९६.

कर्ता, **गंगादासः.** Author, Gaṅgâdâsa.

आरंभः । देवं प्रणम्य गोपालं वैद्यगोपालदासजः ॥ संतोषातनयश्छंदो गंगादासस्तनोत्यदः ॥ १ ॥ संति यद्यपि भूयांसश्छंदोग्रंथा मनीषिणां ॥ तथापि सारमाकृष्य बालकार्थे ममोद्यमः ॥ २ ॥

---

**No. 300.** ग्रंथनाम, **दशरूपकं.** Name: Daśa-rûpaka.

पत्राणिं ९६, folios 96; पंक्तयः ११, lines 11; अक्षराणि ३६, letters 36.

कर्ता, **धनंजयः.** Author, Dhanañjaya.

आरंभः । सदाचारं प्रमाणयद्भिरविघ्नेन प्रकरणसमाप्त्यर्थं इष्टसिध्यै प्रकृताभिमतयोः स्वदेवतयोर्नमस्कारः क्रियते श्लोकद्वयेन ॥ नमस्तस्मै गणेशाय यत्कंठः पुष्करायते ॥ मंदाभोगघनध्वानो नीलकंठस्य तांडवे ॥ १ ॥ दशरूपानुकारेण यस्य माद्यंति भावुकाः ॥ नमः सर्वविदे तस्मै विष्णवे भरताय च ॥ २ ॥

समाप्तिः । विष्णोः सुतेनापि धनंजयेन विद्वन्मनोरागनिबंधहेतुः ॥ आविष्कृतं मुंजमहीशगोष्ठीवैदग्ध्यभाजा दशरूपमेतत् ॥ २६१ ॥ ॥ इति विष्णुसूनोर्धनिकस्य दशरूपालोके रसविभागो नाम चतुर्थः प्रकाशः ॥

---

**No. 301.** ग्रंथनाम, **प्रस्तारचिंतामणिटीकासमेतः.** Name: Prastâra Chintâmaṇi, with a Commentary.

पत्राणि ९४, folios 94; पंक्तयः ८, lines 8; अक्षराणि ३०, letters 30.

ग्रंथसंख्या १४१०.

शकः १७९०. Śaka 1750.

कर्ता, **चिंतामणिः.** Author, Chintâmaṇi.

आरंभः । सकलविमलचंचच्चंचरीकांबुजानि स्वकरनिकरहारैर्द्योतयन्प्रातरुद्यन् ॥ रमणरमणरामारामरामानुरागप्रकरसुखकरोर्को मंगलं नस्तनोतु ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ छंदःशास्त्रविदां कुतूहलमिदं श्रीपिंगलाद्यैर्बुधैर्मात्रावृत्तसुवर्णवृत्तकरणे दक्षैः कृतं यद्यपि ॥ कुर्वेहं तु तथापि पंडितमुदे यद्भास्करे धिःकृतध्वांते भाति न भाति किं द्युतिकरो दीपो गृहाभ्यंतरे ॥ ५ ॥

समाप्तिः । प्रस्तारविस्तारविचित्रचित्रं प्रस्तारचिंतामणिनामधेयं ॥ दैवज्ञगोविंदतनूद्भवोयं चिंतामणिग्रंथममुं व्यधत्त ॥ २८ ॥

टीकारंभः । दंताग्रेणापि शैलप्रचयनिखनने यः पटुः शैशवेपि स्फूर्जद्विद्याप्रवाहं करटयुगसरद्दाननीरच्छलेन ॥ धत्ते मत्तेभराजाननमिह कलये केवलं विघ्नपूरच्छेत्तारं कार्यसिध्यै प्रतिदिवसमहं सेवितं तं महद्भिः ॥

टीकांतः । इदं सदुक्तं यदि वासदुक्तं मात्सर्यमुत्सार्य विचार्यमार्यैः ॥ गृह्णाति दोषं पिशुनः सदुक्तौ रक्तं जलौकेव पयोधरेपि ॥ इति श्रीमद्गोविंदज्योतिर्वित्तनुजचिंतामणिज्योतिर्विद्विरचिते प्रस्तारचिंतामणिभाष्ये खंडप्रस्ताराख्यस्तृतीयः परिच्छेदः ॥

---

**No. 302.** ग्रंथनाम, **रसरत्नहारः**. Name; Rasa-ratna-hâra.

पत्राणि ४, folios 4; पंक्तयः ११, lines 11; अक्षराणि ४१, letters 41.
ग्रंथसंख्या ११२.
कर्ता, **त्रिपाठीशिवरामः**. Author, Tripâṭhî Sivarâma.

आरंभः । निरीक्ष्य विष्णोश्चरणारविंदनखेषु लक्ष्मीः प्रतिबिंबमस्मात् ॥ दशावतारादपि मन्यमान्या(ना)स्वाधिक्यमास्ताद्विदुषां सुखाय ॥ १ ॥ उद्ग्रथ्यते सर्वविचक्षणानां प्रीत्यै मयायं रसरत्नहारः ॥ गुणैरुपेतोखिललब्धवर्णकंठस्थितः स्याद्विदितो दिगंते ॥ २ ॥ स्यात्स्थायिभावोऽत्र रसो विभावैस्तथानुभावैर्व्यभिचारिभिश्च ॥ आरोप्यमाणः क्रमशः प्रकर्षं यथोचितैः सात्विकसंयतैश्च ॥ ३ ॥

समाप्तिः । जगति यद्यपि संति परःशता गुरुतमा रचना बुधबुद्धये ॥ ननु तथापि मया न वृथा कृता गुरुतमा रचनाऽबुधबुद्धये ॥ १०१ ॥ गुरुपादांबुजद्वंद्वप्रसादावाप्तसन्मतिः ॥ त्रिपाठी शिवरामाख्यो हारं पूरितवानमुं ॥ १०२ ॥ ॥ ॥ इति त्रिपाठीशिवरामकृतो रसरत्नहारः समाप्तः ॥ ॥

---

**No. 303.** ग्रंथनाम, **वृत्तरत्नाकरः सटीकः**. Name: Vṛitta-ratnâkara, with a Commentary.

पत्राणि ७०, folios 70; पंक्तयः १०, lines 10; अक्षराणि ४०, letters 40.

टीकाकारः, भट्टनारायणः. Commentator, Bhatta-Nârâyana.

मूलं । प्रसिद्धत्वात्पूर्वलिखितत्वादुपेक्षितं ॥

टीकारंभः । नत्वा गणेशं वाग्देवीं पिंगलं मातरं गुरुं ॥ अन्यानपि च भाष्यादिकर्तृंश्छंदोविशारदान् ॥ १ ॥ श्रीभट्टरामेश्वरसूरिसूनुर्नारायणः स्वामनुरुध्य बुद्धिं ॥ संक्षेपवृत्त्या विवृतिं सुवृत्तरत्नाकरे व्यक्ततया तनोति ॥ २ ॥ विशिष्टाशिष्टाचारमूलभूतं स्वस्ति न इंद्रो वृद्धश्रवा इत्यादि वैदिकलिंगमिति टीकादिः ॥

टीकासमाप्तिः । आदावंते लिखेदेकं मध्यकोष्ठं च पूरयेत् ॥ लेख्यकोष्ठोपरि प्राप्तैरग्रिमांकेन संयुतैरिति ॥ अत्रोद्धारप्रकारोयं मेरोः ॥ अस्याग्रे ग्रंथः किंचित्खंडितः ॥

---

**No. 304.** ग्रंथनाम, **वृत्तरत्नाकरस्य टीका वृत्तपुष्पप्रकाशनाख्या.** Name: Vritta-pushpa-prakâsana, a Commentary on the Vritta-Ratnâkara.

पत्राणि ३०, folios 30; पंक्तयः १३, lines 13; अक्षराणि २५, letters 25.

कर्ता, **चिंतामणिः.** Author, Chintâmani.

आरंभः । नत्वा तां शारदां नित्यं सर्वविद्याब्धिपारदां ॥ वंदारुवृंदवंद्यांघ्रिं कवित्कीर्तिविशारदां ॥ १ ॥ २ ॥ ३ ॥ द्विजराजः स्वधीज्योत्स्नायोगादुद्घाट्य तानिमान् ॥ बुधचिंतामणिश्चक्रे वृत्तपुष्पप्रकाशनं ॥ ४ ॥ चिकीर्षितग्रंथनिर्विघ्नपरिसमाप्तिकामनया कृतं नमस्काररूपं मंगलमादौ निबध्नाति ॥

समाप्तिः । अर्धयोगश्चेति पाठे वृत्ते वर्णे वा मूर्धनि योंकः स तत्तद्वृत्तभेदानामंधं बोधयतीत्यर्थः ॥ ॥ इति श्रीविद्यानिधिचिंतामणिपंडितविरचितायां वृत्तरत्नाकरटीकायां वृत्तपुष्पप्रकाशनाख्यायां षष्ठोध्यायः ॥ ॥

---

**No. 305.** ग्रंथनाम, **वृत्तसिद्धांतमंजरी.** Name: Vritta-Siddhânta-mañjarî.

पत्राणि ८, folios 8; पंक्तयः ९, lines 9; अक्षराणि २८, letters 28.

कर्ता, **रघुनाथपंडितः.** Author, Raghunâtha Pandita.

आरंभः । प्रणम्य शंकरं देवं विदुषां कौतुकाय च ॥ रच्यते रघुनाथेन वृत्तसि-द्धांतमंजरी ॥ १ ॥ गुरुतां याति भजसा लघुतां यरतास्तथा ॥ आदौ मध्ये च चरमे नमौ च लघु गौरवं ॥ २ ॥

समाप्तिः । ग्रहेंदुरसचंद्रे च १६१९ शके संवत्सरे शुभे ॥ वृषे विरचिता सेयं वृत्तसिद्धांतमंजरी ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ॥ इति श्रीकृष्णपंडितसुतश्रीमद्धिंकंभट्टसूरिसूनुश्रीमद्रघुनाथपंडितविरचिता वृत्तसिद्धांत-मंजरी संपूर्णा ॥ ॥

---

**No. 306.** ग्रंथनाम, **श्रुतबोधटीका.** Name: a Commentary on the Śrutabodha.

पत्राणि १८, folios 18; पंक्तयः ११, lines 11; अक्षराणि ४०, letters 40.

शकः १७१२. Śaka 1712.

कर्ता, **ताराचंद्रः.** Author, Târâchandra.

आरंभः । यत्स्तुत्यैव समस्तदुःखशमनं संपद्यते देहिनां यत्पादाब्जरजोजुषो न पुनरावृत्तिं लभंते जनाः॥यत्कीर्तिर्विमलीकरोति विमला गंगेव लोकत्रयं तंत्रीव-ल्लभमंबुजाक्षमनघं वंदेनवद्यं गुरुं ॥ १ ॥ ताराचंद्राभिधेनेयं बालव्युत्पत्तिहेतवे ॥ क्रियते श्रुतबोधस्य टीका बालविवेकिनी ॥ २ ॥

समाप्तिः । इयं स्रग्धरासंज्ञका प्रसिद्धा जातिर्निगदिता कथितेत्यर्थः ॥ अस्या वृत्तं यथा ॥ देवक्यां यस्य भक्तिस्त्रिभुवनविदिता रुक्मिणी धर्मपत्नी पुत्राः प्रद्यु-म्नमुख्याः सुरवरजयिनो वाहनं पक्षिराजः॥वृंदारण्ये विहारो व्रजपुरवनितावल्ल-भा राधिकाद्याश्चक्रं विद्यातमस्त्रं स जयति जगतां स्वस्तये नंदसूनुः ॥ ३९॥ इति कान्यकुब्जालंकारताराचंद्रकृतिः श्रुतबोधटीका बालविवेकिनी समाप्ता ॥

---

**No. 307.** ग्रंथनाम, **साहित्यकौतूहलं सटीकं.** Name: Sâhitya-kautûhala, with a Commentary.

पत्राणि ९८, folios 98; पंक्तयः १२, lines 12; अक्षराणि ३२, letters 32.

शकः १५९७. Śaka 1597.

कर्ता, **यशस्विकविः.** Author, Yaśasvi-kavi.

आरंभः । यच्छुद्धं विमलं वदंति विबुधाः कृष्णं तथा निर्गुणं यन्मूलं जगताम-मूलमिति यत्सच्चिन्मयं व्यापकं ॥ यद्वाचां मनसोप्यगोचरमधिश्रयाम्याश्रयं सर्वदा

कस्मैचिन्महसे नमोस्तु तमस स्तोमायविच्छित्तये ॥ १ ॥ ये साहित्यकला-कलापकुशला ये चित्रचित्रीकृतस्वांता ये च विमत्सराः परगुणास्वादेषु बद्ध-स्पृहाः ॥ तेषां साधुमुदेऽधरीकृतसुधां साहित्यकौतूहलव्याख्यां व्यातनुते सदु-ज्ज्वलपदां धीमान् यशस्वी कविः ॥ २ ॥

समाप्तिः । भारद्वाजकुलालवालजनितो गोपालकल्पद्रुमः काशीसल्लतिकावृतो-र्थीहितकृत्सत्कीर्तिपुण्योस्ति यः ॥तत्पुत्रेण यशस्विनेति रचिते साहित्यकौतूहले पू-र्णोयं रुचिरः कलावति परिच्छेदो द्वितीयोभवत् ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ॥ ७ ॥ ८ ॥ व्याख्यानेषु वयःश्रुतप्रविलसत्प्रज्ञारसात्यद्भुतस्फूर्जद्वाग्विभवो निरं-तररतो गोपालपादानतौ ॥ चक्रे धीमदमंदसंमदकरं साहित्यकौतूहलं सव्याख्यं रुचिरं प्रबंधमिमकं श्रीमान् यशस्वी कविः ॥ ९ ॥ ॥ इति श्रीमत्पदवाक्य-प्रमाणपारावारपारीणधुरीणस्य यशस्विकवेः कृतौ साहित्यकौतूहलव्याख्यायां सदुज्ज्वलपदायां द्वितीयः परिच्छेदः ॥ ॥

---

**No. 308.** ग्रंथनाम, **साहित्यदीपिका भास्करमिश्रीति ख्याता.** Name: Sâhitya-Dîpikâ *alias* Bhâskara-mis'rî.

पत्राणि ३७, folios 37; पंक्तयः १५, lines 15; अक्षराणि ५०, letters 50.

कर्ता, **भास्करमिश्रः.** Author, Bhâskaramiśra.

आरंभः । स्तनंधयसुधाधामधाम्ने—इति मंगलश्लोकः ॥ १ ॥ अग्रे उपक्रम-श्लोकाः ॥ ३ ॥ साहित्यदीपिका नाम टीका भास्करसूरिणा ॥ मधूव (द्ध) हानां का-व्यानां तेजनीयं विरच्यते ॥ ५ ॥ इह तावदादिमेन श्लोकेन नमस्कारस्य वा प्रेक्षावत्प्रवृत्तेरंगभूतस्य प्रयोजनस्य वा काव्यलक्षणस्य वा प्रतिपादनं युज्यते ॥

समाप्तिः । तेषु तेषु ग्रंथेषु विकीर्णानां प्रमेयाणामेकत्र संकलनमेव ग्रंथस्य प्र-योजनमिति तात्पर्यार्थः ॥ ॥ इति श्रीभास्करमिश्रविरचितायां काव्यप्रका-शटीकायां दशम उल्लासः ॥ ॥

---

**No. 309.** ग्रंथनाम, **पूर्वमीमांसार्थसंग्रहः.** Name: Pûrvamîmâṅsârtha-Saṅgraha.

पत्राणि २३, folios 23; पंक्तयः १०, lines 10; अक्षराणि ३०, letters 30.

ग्रंथसंख्या ४३१.

कर्ता, लौगाक्षिभास्करः. Author, Laugâkshi-Bhâskara.

आरंभः । वासुदेवं रमाकांतं नत्वा लौगाक्षिभास्करः ॥ कुरुते जैमिनिनये प्रवेशायार्थसंग्रहं ॥ १ ॥ अथ परमकारुणिको भगवाञ्जैमिनिर्धर्मविवेकाय द्वादशलक्षणीं प्रणिनाय । तत्रादौ धर्मजिज्ञासां सूत्रयामास । अथातो धर्मजिज्ञासा । अत्राथशब्दो वेदाध्ययनानंतर्यवचनः ॥

समाप्तिः । एवं च यजेत स्वर्गकाम इत्यादि निखिलवेदस्य साक्षात्परंपरया वा यागादिधर्मप्रतिपादकत्वं सिद्धं ॥ सोयं धर्मो यदुद्दिश्य विहितस्तदुद्देशेन क्रियमाणस्तद्धेतुः । ईश्वरार्पणबुध्या क्रियमाणस्तु निःश्रेयसहेतुः । न च तदर्पणबुद्ध्यानुष्ठाने प्रमाणाभावः ॥ यत्करोषीति भगवद्गीतास्मृतेरेव प्रमाणत्वात् ॥ स्मृतिचरणे तत्प्रामाण्यस्य श्रुतिमूलकत्वेन व्यवस्थापनादिति शिवं ॥ बालानां सुखबोधाय भास्करेण सुमेधसा ॥ रचितोयं समासेन जैमिनीयार्थसंग्रहः ॥

---

**No. 310.** ग्रंथनाम, भाट्टभाषाप्रकाशः. Name : Bhâṭṭa-Bhâshâ-Prakâśa.

पत्राणि २४, folios 24; पंक्तयः १६, lines 16; अक्षराणि ४८, letters 48.

ग्रंथसंख्या ११३.

कर्ता, नारायणतीर्थनामा. Author, Nârâyaṇa-Tîrtha.

आरंभः । प्रणम्य धर्ममीशानं मीमांसां प्रविविक्षतां ॥ बालानामुपकाराय भाट्टभाषा प्रकाश्यते ॥ १ ॥ धर्मे प्रमाणान्यथ कर्मभेदः शेषप्रयुक्तिक्रमकर्तृभेदाः ॥ द्वेधातिदेशस्तमनूहबाधौ तंत्रप्रसंगाविति लक्षणार्थाः ॥ २ ॥ धर्मस्वरूपमुक्तं । फलवोऽपि च यत्कर्म नानर्थेनानुबध्यते ॥ केवलं प्रीतिहेतुत्वात्तद्धर्म इति कथ्यत इति ॥ श्येनादिव्यावृत्त्यर्थं फलत इति ॥ तस्य हि न धर्मत्वं ।

समाप्तिः । एकार्थास्तु विकल्पेरन्यथा व्रीहियवादयः । नानाध्यायोस्ति मंत्राणां कर्मार्थं च तु कर्मसु ॥ मंत्राणां कारणत्वेन तदंते कर्मणः क्रिया ॥ ब्राह्मणानामार्त्विज्यमिति कल्पकारवचनात् । क्षत्रियो याजको यस्य विशेषत इति रामायणे निंदाश्रवणात् । चतुर्थी करणमंत्रेषु ब्राह्मणानामिदं हविरिति मंत्रलिंगवचनाच्च ब्राह्मणानामेवार्त्विज्यं । भगवच्छिवरामतीर्थशिष्यो मुनिनारायणतीर्थनामधेयः ॥ व्यतनोदधिकाशि भाट्टभाषाग्रथनं भाट्टनयप्रवेशहेतोः ॥ १ ॥

---

**No. 311.** ग्रंथनाम, तत्वबोधः. Name: Tattvabodha.

पत्राणि ११, folios 11; पंक्तयः ७, lines 7; अक्षराणि १८, letters 18.

कर्ता, शंकराचार्यः. Author, S'aṅkarâchârya.

आरंभः। वासुदेवेंद्रयोगींद्रं नत्वा ज्ञानप्रदं गुरुं ॥ मुमुक्षूणां हितार्थाय तत्वबोधो विधीयते ॥ १ ॥ साधनचतुष्टयसंपन्नाधिकारिणां मोक्षसाधनभूतं तत्वविवेकप्रकारं वक्ष्यामः ॥

समाप्तिः। तनुं त्यजतु वा काश्यां श्वपचस्य गृहेथवा ॥ ज्ञानसंप्राप्तिसमये मुक्तोसौ विगताशयः ॥ १ ॥ इति श्री० शंकराचार्यविरचितस्तत्वबोधः समाप्तः ॥ ॥

---

**No. 312.** ग्रंथनाम, **भगवन्नामकौमुदी.** Name: Bhagavannâma-Kaumudî.

पत्राणि ७८, folios 78; पंक्तयः ९, lines 9; अक्षराणि २४, letters 24.

कर्ता, लक्ष्मीधरः. Author, Lakshmîdhara.

आरंभः। अंहः संहरदखिलं सकृदुदयादेव सकललोकस्य ॥ तरणिरिव तिमिरजालं जयति जगन्मंगलं हरेर्नाम ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ चेतश्चकोरसंतोषपीयूषांबुधिवृद्धये ॥ इयं विस्तार्यते श्रीमद्भगवन्नामकौमुदी ॥ ७ ॥ अत्र श्रीभगवन्नाममाहात्म्यप्रतिपादकानि पुराणवचनान्याहृत्य विचार्यंते। किमेतान्यविवक्षितस्वार्थानि उत स्वार्थपराणीति। यद्यपि स्वार्थपराणि तद्यपि किं साक्षात्पापक्षयहेतोः कस्यचिदंगभावेन भगवन्नामकीर्तनं पापक्षयहेतुः ॥

समाप्तिः। न च दर्शपौर्णमासज्योतिष्टोमादिसाध्यस्वर्गव्यक्तिभेदवदेकस्य पापस्य विनाशव्यक्तिभेदोस्ति ॥ ब्रह्मघ्नो द्वादशाब्दानि व्रतं चरेत् ॥ ब्रह्मघ्नो हरिं कीर्त—अग्रे ग्रंथः खंडितः ॥

---

**No. 313.** ग्रंथनाम, **वेदस्तुतिव्याख्याया उपरि व्याख्या.** Name: A Commentary on the Vedastuti-Vyâkhyâ.

पत्राणि २१, folios 21; पंक्तयः १५, lines 15; अक्षराणि ५०, letters 50.

कर्ता, काशीनाथः. Author, Kâśînâtha.

आरंभः। श्रीपांडुरंगमानम्य पितरौ च गुरून् बुधान् ॥ श्रीश्रीधरीयटीकाया व्याख्यां कुर्वे श्रुतिस्तुतेः ॥ १ ॥ गुणालंबेति ॥ गुणानामालंब आश्रयणं यस्यां सा निर्गुणमवधिः पर्यवसानबोध्यं यत्र यथा स्यात्तथा या वेदकर्तृका स्तुतिः ॥

समाप्तिः । लक्षणया च तत्वमसीति ॥ लक्षणयेति निषेधमुखेष्वापि द्रष्टव्यं ॥ एतद्बुद्धींद्रियेति श्लोके उपपादितमित्यलं ॥ ॥ अंतर्यामी सर्वविद्दीननाथः श्रीमत्स्वामी विठ्ठलो देवदेवः ॥ तेनैवाहं प्रेरितस्तत्र तत्र तं तं भावं व्यक्तमाकर्षमित्थं ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ इति श्रीमदनंतोपाध्यायसूरिसूनुकाशीनाथविरचितश्रीधरीयवेदस्तुतिव्याख्याटीका समाप्ता ॥

---

**No. 314.** ग्रंथनाम, **वेदांताधिकरणमाला सटीका, प्रथमाध्यायः.** Name: Vedântâdhikaraṇamâlâ, with a Commentary, Chapter I.

पत्राणि ३७, folios 37; पंक्तयः १३, lines 13; अक्षराणि ३५, letters 35.

ग्रंथसंख्या १०९२.

शकः १७४६. Śaka 1746.

कर्ता, श्रीभारतीतीर्थः. Author, Śrî-Bhâratîtîrtha.

आरंभः । प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणं ॥ वैयासकी न्यायमाला श्लोकैः संगृह्यते स्फुटं ॥१॥ एको विषयसंदेहपूर्वपक्षावभासकः ॥ श्लोको परस्तु सिद्धांतवादिसंगतयः स्फुटाः ॥२॥

समाप्तिः । अण्वादेरपि हेतुत्वं श्रुतं ब्रह्मण एव वा ॥ वटधानादिदृष्टांतादण्वादेरपि तच्छ्रुतेः ॥१५॥ शून्याण्वादिष्वेकबुद्ध्या सर्वबुद्धिर्न युज्यते ॥ स्युर्ब्रह्मण्यपि धानाद्यास्ततो ब्रह्मैव कारणं ॥१६॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिप्रणीतायां वेदांताधिकरणमालायां प्रथमोऽध्यायः ॥ १ ॥

टीकारंभः । वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ॥ यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥१॥

टीकासमाप्तिः । पूर्वाधिकरणे मृत्तिकादिदृष्टांतात्प्रकृतिर्ब्रह्मेत्युक्तं ॥ इहापि प्रधाननिराकरणेन सर्वेपि वादा व्याख्याता निराकृताः । व्याख्याता इति पदाभ्यासोध्यायसमाप्तिं द्योतयति ॥ इति श्रीमद्गु[रु]तत्पादपूज्यदिगंबरसूनुशिवदीक्षितविरचितायां अधिकरणमालार्थप्रकाशिकायां प्रथमोध्यायः ॥ १ ॥

---

**No. 315.** ग्रंथनाम, **शारीरकभाष्यस्य टीका न्यायनिर्णयः आनंदगिरीति प्रसिद्धः, प्रथमाध्यायः.** Name: Nyâyanirṇaya, or Ânandagirâ, a Commentary on the Śârîraka-Bhâshya, Chapter I.

पत्राणि २६७, folios 267; पंक्तयः १०, lines 10; अक्षराणि ४०, letters 40.

संवत् १७६८. Saṁvat 1768.

कर्ता, आनंदज्ञानः. Author, Ânandajñâna.

आरंभः। अध्यस्तांध्यमपूर्वमर्थधिषणैर्ग्राह्यं पुमर्थास्पदं लक्ष्यं लक्षणभेदतः श्रुतिगतं निर्धूतसाध्यार्थकं॥ आम्नायांतविभातविश्वविभवं सर्वाविरुद्धं परं सत्यज्ञानमनर्थसार्थविधुरं ब्रह्म प्रपद्ये सदा ॥१॥२॥३॥४॥५॥६॥७॥८॥ श्रद्धाभक्ती पुरोधाय विधायागमभावनां॥ श्रीमच्छारीरके भाष्ये करिष्ये न्यायनिर्णयं ॥९॥ नित्याध्ययनविध्युपादापितवेदांतवचोभिरापाततः प्रतिपन्नं शास्त्रारंभौपयिकं॥

समाप्तिः। वाक्यानि ब्रह्मपराणीति ब्रह्मणि कारणे सिद्धः समन्वयो वेदांतानामित्यर्थः॥ पुनरुक्तेस्तात्पर्यमाह॥ व्याख्याता इति॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानंदपूज्यपादशिष्यभगवदानंदज्ञानकृते शारीरकभाष्यन्यायनिर्णये प्रथमोध्यायः॥ ॥

---

**No. 316.** ग्रंथनाम, शारीरकभाष्यस्य टीका न्यायनिर्णयः, आनंदगिरीति प्रसिद्धः, द्वितीयाध्यायः. Name: Nyâyanirṇaya, or Ânandagirâ, a Commentary on the Sârîraka Bhâshya, Chapter II.

पत्राणि १९०, folios 190; पंक्तयः १०, lines 10; अक्षराणि ४४, letters 44.

कर्ता, आनंदज्ञानः. Author, Ânandajñâna.

आरंभः। अतिदेशाधिकरणे प्रधानवदशब्दत्वं परमाण्वादीनामपीत्युक्तं संप्रति प्रधानस्य वैदिकशब्दवत्त्वाभावेपि स्मृतिरूपशब्दवत्त्वमाशंक्य परिहरति स्मृतीति॥

समाप्तिः। केवलभूत[त]न्मात्राणामिंद्रियागोचरत्वात्तदर्थं तदुक्तिरित्यर्थः॥ उक्तमनूद्यावशिष्टं भागं व्याचष्टे॥ तस्मादिति॥ विरोधसमाधिमुपसंहरन् पादाभ्यासतात्पर्यमाह॥ तद्वादिति॥ ॥ इति श्री० भगवदानंदज्ञानकृते शारीरकभाष्यनिर्णये द्वितीयोध्यायः॥ ॥

---

**No. 317.** ग्रंथनाम, शारीरकभाष्यस्य टीका न्यायनिर्णयः, आनंदगिरीति प्रसिद्धः, तृतीयाध्यायः. Name: Nyâyanirṇaya, or Ânandagirâ, a Commentary on the Sârîraka-Bhâshya, Chapter III.

पत्राणि १७७, folios 177; पंक्तयः १०, lines 10; अक्षराणि ४४, letters 44.

कर्ता, आनंदज्ञानः. Author, Ânandajñâna.

आरंभ: । जीवोपकरणभूतभौतिकजन्मादिनिरूपणानंतरं तदुपहितजीवस्य संसारप्रकारं निरूपयितुं देहांतरारंभे भूतसूक्ष्मपरिष्वक्तस्यैव गमनमिति तावदाह॥

समाप्तिः । तदेवं मुक्तेर्निरतिशयत्वान्न कर्मसाध्यतेति युक्तं पुरुषार्थाधिकरणमिति भावः ॥ इति श्री० भगवदानंदज्ञानकृते शारीरकभाष्यन्यायनिर्णये तृतीयोध्यायः ॥ ॥

---

**No. 318.** ग्रंथनाम, **शारीरकभाष्यस्य टीका न्यायनिर्णयः आनंदगिरीति प्रसिद्धः**, चतुर्थाध्यायः. Name: Nyâyanirṇaya, or Ânandagirâ, a Commentary on the Śârîraka-Bhâshya, Chapter IV.

पत्राणि ५५, folios 55; पंक्तयः १०, lines 10; अक्षराणि ४४, letters 44.

कर्ता, **आनन्दज्ञानः**. Author, Ânandajñâna.

आरंभः । पूर्वाध्यायांतिमाधिकरणे मोक्षे प्रतिनियमाभावो दर्शितः । संप्रति मोक्षौपयिकविद्यासाधनेषु श्रवणादिष्वावृत्यानुष्ठानप्रतिनियमं दर्शयत्यावृत्तिः ॥

समाप्तिः । प्रकृते सूत्रस्यैवाभ्यासाच्चतुर्लक्षणस्य वेदांतमीमांसाशास्त्रस्य समन्वयाविरोधसमानफलानां साकल्येनोक्तत्वाद्व्याख्यान [व] शेषात् परिसमापनमुचितमिति भावः ॥ १ ॥ संत्येव बहुलानीह व्याख्यानानि महाधियां ॥ व्याख्या तथापि सौख्येन व्याख्यानाय मया कृता ॥ २ ॥ ॥ इति श्री० भगवदानंदज्ञानकृते श्रीमच्छारीरकभाष्यन्यायनिर्णये चतुर्थोध्यायः ॥

---

**No. 319.** ग्रंथनाम, **सिद्धांतलेशसंग्रहः**. Name: Siddhântaleśa-saṅgraha.

पत्राणि ७३, folios 73; पंक्तयः ९, lines 9; अक्षराणि ३७, letters 37.

ग्रंथसंख्या १११९.

शकः १७३३. Śaka 1733.

कर्ता, **अप्पदीक्षितः**. Author, Appa-Dîkshita.

आरंभः । अधिगतभिदा पूर्वाचार्यानुपेत्य सहस्रधा सरिदिव महीभेदान्संप्राप्य शौरिपदोद्गता ॥ जयति भगवत्पादश्रीमन्मुखांबुजनिर्गता जननहरणी सूक्तिर्ब्रह्माद्वयैकपरायणा ॥ १ ॥ प्राचीनैर्व्यवहारसिद्धविषयेष्वात्मैक्यसिद्धौ परं संनह्यद्भिरनादरात्सरणयो नानाविधा दर्शिताः ॥ तन्मूलानिह संग्रहेण कतिचित्सिद्धांतभेदान् धियः शुद्ध्यै संकलयामि तातचरणव्याख्यावचःख्यापितान् ॥ २ ॥

---

समाप्तिः । विद्वद्गुरोर्विहितविश्वजिदध्वरस्य श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ॥ श्रीरंगराजमखिनः श्रितचंद्रमौलिरप्पय्यदीक्षित इति प्रथितस्तनूजः ॥ १ ॥ तंत्राण्यधीत्य सकलानि सदावदातव्याख्यानकौशलकलाविशदीकृतानि ॥ आस्थाय मूलमनुरुध्य च संप्रदायं सिद्धांतभेदलवसंग्रहमित्यकार्षीत् ॥ २ ॥ इति शास्त्रसिद्धांतलेशसंग्रहे चतुर्थः परिच्छेदः ॥

---

**No. 320.** ग्रंथनाम, **वादावली.** Name: **Vâdâvalî.**

पत्राणि ३०, folios 30; पंक्तयः ९, lines 9; अक्षराणि ३६, letters 36.

कर्ता, जयतीर्थः. Author, Jayatîrtha.

आरंभः । नमोगणितकल्याणगुणपूर्णाय विष्णवे ॥ सत्याशेषजगज्जन्मपूर्वकर्त्रे मुरद्विषे ॥ १ ॥ ननु कथं सत्यता जगतोंगीकाराधिकारिणी । विमतं मिथ्या दृश्यत्वाज्जडत्वात्परिच्छिन्नत्वाच्छुक्तिरजतवदित्याद्यनुमानविरोधात् ॥

समाप्तिः । विमतानि कलत्राणि देवदत्तस्यैव भोगायतनानि कलत्रत्वात्संप्रतिपन्नकलत्रवदित्याभासमानयोगक्षेमतयोपहास्यं ॥ जयतीर्थमुनींद्रेण मुग्धबोधाय निर्मितं ॥ वाङ्मुखावाङ्मुखं भूयात्प्रीतये हरिमध्वयोः ॥ १ ॥ ॥ इति श्रीमज्जयतीर्थपूज्यचरणविरचिता वादावली संपूर्णा ॥

---

**No. 321.** ग्रंथनाम, **वायुस्तुतिः सटीका.** Name: **Vâyustuti, with a Commentary.**

पत्राणि ३१, folios 31; पंक्तयः ९, lines 9; अक्षराणि ५५, letters 55. ग्रंथसंख्या ९६९.

कर्ता, शेषपंडितः. Author, Seshapandita.

टीकारंभः । लक्ष्मीनारायणं देवं व्यासमध्वजयादिकान् ॥ गुरून्मूलादिपरमान् वंदे विद्यागुरूंश्च मे ॥ १ ॥ छलारिनरसिंहार्यशिष्यः शेषाभिधो बुधः ॥ नरसिंहनखस्तोत्रपंचिकां कुरुतेंजसा ॥ २ ॥ अत्र किल कथयंति । कदाचित्त्रिविक्रमपंडिताचार्यः श्रीमध्वाचार्यैः सह बदरिकाश्रमं प्रति जगाम । तत्र देवालयकपाटं पिधाय नरनारायणं श्रीमध्वाचार्ये पूजयति सति इदानीं किं कुर्वंति श्रीमध्वाचार्या इति जिज्ञासया कपाटविवरेण निरीक्षमाणो जांबवाञ्श्रीकृष्णरूपे रामाकारमिव श्रीमध्वरूपे हनुमदाकारं दृष्ट्वा तदा तेषां वायुत्वं निश्चित्य मूलरूपस्य वायोस्तदवताराणां स्तुतिं चकार । एतन्मूलं तु प्रसिद्धत्वान्न लिखितं ॥ चरमपत्रं नास्ति ॥

---

**No. 322.** ग्रंथनाम, **अंगत्वनिरुक्तिः**. Name: Aṅgatvanirukti.

पत्राणि १६, folios 16; पंक्तयः १०, lines 10; अक्षराणि ३२, letters 32.

ग्रंथसंख्या ३२०.

कर्ता, **मुरारिः**. Author, Murâri.

आरंभः। प्रणम्य तुलजां स्वीयकुलजाद्यधिदेवतां ॥ मुरारिः कुरुतेंगत्वानिरुक्तिं सूत्रसंमतां ॥ १ ॥ तत्रांगत्वं तावन्न जातिः ॥ तत्साधकाभावात् । क्रियात्वादिजात्या सांकर्यप्रसंगाच्च ॥

समाप्तिः। तादात्म्यसंसर्गावच्छिन्नप्रतियोगिताकत्वरूपभेदत्वनिवेशेन गुरुत्वात् । कर्तृत्वाद्यन्यतमत्वघटकभेदप्रातियोगित्वमादायातिव्याप्त्यापत्तेश्चेति संक्षेपः। मुरारिनिर्मितिर्न्यायमीमांसावासितात्मनां ॥ तोषाय विदुषामेषा कंठभूषा प्रकल्पतां ॥ १ ॥ इति मुरारिकृतांगत्वनिरुक्तिः समाप्ता ॥

---

**No. 323.** ग्रंथनाम, **अनुमानदीधितिः**. Name: Anumâna-Dîdhiti.

पत्राणि २२०, folios 220; पंक्तयः ७, lines 7; अक्षराणि ३६, letters 36.

कर्ता, **तार्किकशिरोमणिः रघुनाथः**. Author, Târkikaśiromaṇi Raghunâtha.

आरंभः। ॐनमः सर्वभूतानि विष्टभ्य परितिष्ठते ॥ अखंडानंदबोधाय पूर्णाय परमात्मने ॥ १ ॥ अध्ययनभावनाभ्यां सारं निर्णीय निखिलतंत्राणां ॥ दीधितिमधिचिंतामणि तनुते तार्किकशिरोमणिः श्रीमान् ॥ २ ॥ परजुष्टनयान्विवर्तमाना मननास्वाद्यरसा विशुद्धबोधैः ॥ रघुनाथकवेरपेतदोषा कृतिरेषा विदुषां तनोतु मोदं ॥ ३ ॥ न्यायमधीते सर्वस्तनुते कुतुकान्निबंधमप्यत्र ॥ अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः ॥४॥ मान्यान्प्रणम्य विहितांजलिरेष भूयो भूयो विधाय विनयं विनिवेदयामि ॥ दूष्यं वचो मम परं निपुणं विभाव्य भावावबोधविहितो न दुनोति दोषः ॥ ५ ॥ पूर्वापरग्रंथैकवाक्यताप्रतिपत्तये— ॥

समाप्तिः। शरीराजन्यस्य न कर्तृकत्वरूपसाध्यव्याप्यशरीराजन्यत्वस्य हेतोरव्यापकतया साध्याव्यापकत्वं विशेष्यमजन्यत्वं नोपाधिरित्यर्थः ॥ इति महामहोपाध्यायश्रीभट्टाचार्यशिरोमणिनिर्मितानुमानदीधितिः पूर्णा ॥

---

**No. 324.** ग्रंथनाम, **किरणावलिः**. Name: Kiraṇâvali.

पत्राणि १००, folios 100; पंक्तयः ६, lines 6; अक्षराणि ४८, letters 48.

ग्रंथसंख्या १८००.

संवत् १७०९. Saṁvat 1709.

कर्ता, उदयनाचार्यः. Author, Udayanâchârya.

आद्यपत्राभावः। नास्त्यन्तः।

---

No. 325. ग्रंथनाम, तर्कप्रकाशः, प्रत्यक्षखंडं. Name: Tarkaprakâśa, Pratyaksha-Khaṇḍa.

पत्राणि ३८, folios 38; पंक्तयः १०, lines 10; अक्षराणि ४६, letters 46.

शकः १७३७. Śaka 1737.

कर्ता, श्रीकंठः. Author, Śrîkaṇṭha.

आरंभः। संध्यायाः प्रणतिक्षणे गिरिजया सेर्ष्यं समालोकिते रोषं मानिनि मा कृथास्त्वदपरा नान्यास्ति वंद्या मम॥ किंतु त्वामहमानमामि मनसि ध्यात्वा तवैवाकृतीरित्थं हर्षितशैलराजतनयादृष्टः शिवः पातु वः॥ १॥ सिद्धांतगूढत्वैर्मे कृभावना परिशीलिता॥ श्रीकंठनिर्मिता सेयं कृतिरातनुतां मुदं॥ २॥ सत्येकस्मिन्बाधके साधकसहस्रस्याप्यकिंचित्करत्वेन प्रतिबंधकाभावस्यावश्यापेक्षिततया प्रकृतग्रंथसमाप्तिप्रतिबंधकदुरितरूपविघ्नविघाताय कृतं भगवन्नत्यात्मकं मंगलं शिष्यशिक्षार्थमादौ निबध्नाति॥

समाप्तिः। संयोगत्वद्रव्यजन्यत्वव्याप्यत्वेन नित्यत्वसंयोगस्वीकारे तादृशनियमभंगप्रसंगादिति भावः। ननु तादृशनियमे मानाभाव इत्यत आह अप्रयोजकं चेतीत्यपरे। नानातर्कविचारणैकमतिना यत्किंचिदुक्तं मया तद्दृष्ट्वा तु इदा विभाव्य सुधियः सारार्थसंग्राहकाः॥ इत्येतद्यदि धारयेदपि जनः संजायतेसौ चिराद्वादींद्रः परवाचि दूषणशताधानैकदक्षः कृती॥ १॥ इतिश्री० दीक्षितश्रीकंठशर्मविरचितायां न्यायसिद्धांतमंजरीदीपिकायां प्रत्यक्षखंडं समाप्तं॥ ॥

---

No. 326. ग्रंथनाम, तर्कप्रकाशः, अनुमानखंडं. Name: Tarkaprakâśa, Anumâna-Khaṇḍa.

पत्राणि ४९, folios 49; पंक्तयः १२, lines 12; अक्षराणि ४६, letters 46.

शकः १७३८. Śaka 1738.

कर्ता, श्रीकंठः. Author, Śrîkaṇṭha.

आरंभः। प्रत्यक्षनिरूपणानंतरमुपजीव्योपजीवकभावसंगत्या अनुमानं निरूपयन्प्रतिजानीते॥

समाप्तिः । यथा धूमोस्तीति वाक्यस्य वह्निपरस्यापि अनुमानिकवह्निबोधमादाय तात्पर्यनिर्वाहस्तथा प्रकृतेपीति विभाव्यते तदा मानस एव तद्बोधइति रहस्यमत्रानुसंधेयं । किंचिज्जल्पितमत्र तद्बहुतरं कृत्वा हृदि ध्यायतां दोषैरावृतमस्ति युक्तिनिवहं वाक्यं मदीयं बुधाः ॥ चंद्रः किं न कलंकितोपि भवति श्लाघ्याग्रगण्यः सतां बाळत्वं यदि तत्र हेतुरधुना बाळीयमेतद्वचः ॥ १ ॥ इति श्री० अनुमानपरिच्छेदः ॥

---

**No. 327.** ग्रंथनाम, **तर्कप्रकाशः, उपमानखंडं.** Name: Tarka-prakâśa, Upamâna-Khaṇḍa.

पत्राणि ५, folios 5; पंक्तयः १३, lines 13; अक्षराणि ४८, letters 48.

कर्ता, **श्रीकंठः.** Author, Śrikaṇṭha.

आरंभः । अनुमाननिरूपणेनानुमानजिज्ञासानिवृत्तौ अवश्यवक्त [व्य] त्वमुपमानेस्तीत्यवसरसंगत्योपमानं निरूप्यते ॥

समाप्तिः । एवं शाब्दोपमितिस्थले शाब्दान्यत्वोपमित्यन्यत्वाभ्यां निवेशाद्गौरवमिति तेषां न मानसांतर्भाव इति सुष्ठूक्तं चत्वारि प्रमाणानीति दिक् ॥ इति श्री० उपमानपरिच्छेदः ॥

---

**No. 328.** ग्रंथनाम, **तर्कप्रकाशः, शब्दखंडं.** Name: Tarkaprakâśa, Śabda-khaṇḍa.

पत्राणि ६८, folios 68; पंक्तयः ११, lines 11; अक्षराणि ४८, letters 48.

कर्ता, **श्रीकंठः.** Author, Śrikaṇṭha.

आरंभः । जटाजूटलसद्गंगजलभूषितमस्तकः ॥ पुनातु गिरिजाप्रेमपात्रमेकमनेकधा ॥ १ ॥ उपजीव्योपजीवकभावसंगत्या उपमाननिरूपणानंतरं शब्दं निरूपयञ्शिष्यावधानाय प्रतिजानीते ॥

समाप्तिः । धातोस्तत्र लुप्तत्वेन लक्षणासंभवादनायत्या उपसर्गे शक्तिरत आह । व्यतिसेति । लुप्तो धातुरिति । स्मृतः सन्निति शेषः । अग्रे ग्रंथः खंडितः ॥

---

**No. 329.** ग्रंथनाम, **तर्कसंग्रहस्य टीका वाक्यवृत्तिः.** Name: Vâkya-vṛitti, a Commentary on the Tarka-Saṅgraha.

पत्राणि १४, folios 14; पंक्तयः १२, lines 12; अक्षराणि ४६, letters 46.

**शकः १७८४.** Śaka 1784.

आरंभः । शिवया सहितं नत्वा शिवमंबां गुरूनपि ॥ वाक्यवृत्तिं संग्रहस्य कुरुते बालसिद्धये ॥ १ ॥ ग्रंथस्य निर्विघ्नपरिसमाप्तये कृतं मंगलं शिष्यशिक्षायै निबध्नाति ॥

समाप्तिः । सर्वेषामिति । सर्वेषां प्रमाणादीनामित्यर्थः । तथा च काणादन्यायमतयोरविरोध इति भावः । तदेवाह काणादेति । इति तर्कसंग्रहटीका वाक्यवृत्तिः समाप्ता ॥

---

**No. 330.** ग्रंथनाम, **तर्कामृतं.** Name: Tarkâmṛita.

पत्राणि २१, folios 21; पंक्तयः ८, lines 8; अक्षराणि २८, letters 28.

कर्ता, **जगदीशभट्टाचार्यः.** Author, Jagadîśabhaṭṭâchârya.

आरंभः । ब्रह्माद्या निखिलाश्चिताख्रिदशसंदोहाः सदाभीष्टदाः स्वाज्ञानप्रशमाय यत्र मनसो वृत्तीः समस्ता दधुः ॥ श्रीविष्णोश्चरणांबुजं भवभयध्वंसैकबीजं परं हृत्पद्मे विनिधाय तन्निरुपमं तर्कामृतं तन्यते ॥ १ ॥ अथ श्रुतिः श्रूयते । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः ॥

समाप्तिः । विशेषणसंगतस्यायोगव्यवच्छेदः । यथा शंखः पांडुर एवेति । विशेष्यसंगतस्यान्ययोगव्यवच्छेदः । पार्थ एव धनुर्धर इत्यादौ । एवं दिशा सर्वं बोध्यमिति ॥ इति श्रीजगदीशभट्टाचार्यविरचितं तर्कामृतं समाप्तं ॥

---

**No. 331.** ग्रंथनाम, **दीपिकाप्रकाशः.** Name: Dîpikâprakâśa.

पत्राणि ४५, folios 45; पंक्तयः ११, lines 11; अक्षराणि ३५, letters 35.

कर्ता, **नीलकंठभट्टः.** Author, Nîlakaṇṭhabhaṭṭa.

आरंभः । वंदे गुरुं शिवं सांबं दक्षिणामूर्तिमव्ययं ॥ यद्वंदनेन मंदोपि——रुसमानतां ॥ १ ॥ प्रारिप्सितस्य ग्रंथस्य निर्विघ्नपरिसमाप्तये समाचरितं मंगलमीश्वरनत्यात्मकं शिष्यशिक्षायै निबध्नंश्चिकीर्षितं प्रतिजानीते ॥

समाप्तिः । अधिकमस्मदीयाभिनवर्चितामणिव्याख्यायामनुसंधेयं तर्ककर्कशविचारचातुरीधुरीणैरिति । कौंडिन्यगोत्रसंभूतो नीलकंठाख्यपंडितः ॥ कृतिमार्पिपदेतस्मै चंद्रचूडाय मंगलं ॥ १ ॥ इति श्रीमत्पाण्योपनामकवंशपयःपारावारराकाचंद्रायमाणपदवाक्यप्रमाणपारावारीणश्रीमद्भट्टतनूजश्रीनीलकंठभट्टविदुषा विरचितस्तर्कसंग्रहदीपिकाप्रकाशः समाप्तः ॥

---

**No. 332.** ग्रंथनाम, **मथुरानाथी.** Name: Mathurânâthî.

पत्राणि ६५, folios 65; पंक्तयः १५, lines 15; अक्षराणि ४८, letters 48.

कर्ता, **मथुरानाथः.** Author, Mathurânâtha.

आरंभः । न्यायांबुधिकृतसेतुं हेतुं श्रीराममखिलसंपत्तेः ॥ तातं त्रिभुवनगीत्तं तर्कालंकारमादरान्नत्वा ॥ १ ॥ श्रीमता मथुरानाथतर्कवागीशधीमता ॥ विशदीकृत्य दर्श्यंते द्वितीयमणिफक्किकाः ॥ २ ॥ आन्वीक्षिकीपंडितमंडलीषु सतांडवैरध्ययनं विनापि ॥ मदुक्तमेतत्परिचिंत्य धीरा निःशंकमध्यापनमातनुध्वं ॥ ३ ॥ यद्यपीदं बहुषु बहुभिर्बहुधा चर्चितं ज्ञायते ॥

समाप्तिः । साध्यसमानाधिकरणाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदका यावंतो धर्मा यद्धर्मावच्छिन्नाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदकास्तद्ध– । अग्रे ग्रंथः खंडितः ॥

---

**No. 333.** ग्रंथनाम, **लघुतर्कचंद्रिका.** Name: Laghu-Tarka-chandrikâ.

पत्राणि ५१, folios 51; पंक्तयः ९, lines 9; अक्षराणि ३६, letters 36.

कर्ता, **वैजनाथभट्टः.** Author, Vaijanâthabhaṭṭa.

आरंभः । श्रीकंठचरणौ स्मृत्वा तत्प्रसादावलंबनात् ॥ रहस्यं तर्कशास्त्रस्य विशदीकर्तुमीश्महे ॥ १ ॥ यज्ज्ञानात्तार्किकोक्तिश्च स्फुटीभवति तत्वतः ॥ तद्रहस्यं वैजनाथः प्रकाशयितुमुद्यतः ॥ २ ॥ सत्येकस्मिन्नपि बाधके साधकसहस्रस्याप्यकिंचित्करत्वेन कार्यमात्रं प्रति प्रतिबंधकाभावो हेतुः ॥

समाप्तिः । अतिरिक्तमणित्वावच्छिन्नं प्रति प्रतियोगिताकाभावत्वेनैव कारणत्वमित्यतिरिक्ताभावसिद्धेरावश्यकत्वादिति कृतं पल्लवितेन ॥ श्रीरस्तु विदुषां सम्यग्रम्यवाणीविलासीनां ॥ येनोपकुर्वते ह्यंते दानिनां सद्गिरो यथा ॥ १ ॥ इति श्रीगाड्गिळोपनामकरामकृष्णभट्टात्मजवैजनाथभट्टविरचिता लघुतर्कचंद्रिका समाप्ता ॥

---

**No. 334.** ग्रंथनाम, **ललितासहस्रनाम.** Name: Lalitâsahasranâma.

पत्राणि ३८, folios 38; पंक्तयः ७, lines 7; अक्षराणि १८, letters 18.

आरंभः । अगस्त्य उवाच । अश्वानन महाबुद्धे सर्वशास्त्रविशारद ॥ कथितं ललितादेव्याश्चरितं परमाद्भुतं ॥ १ ॥ पूर्वं प्रादुर्भवो मातुस्ततः पट्टाभिषेचनं ॥ भंडासुरवधश्चैव विस्तरेण त्वयोदितः ॥ २ ॥ इत्यादिः ।

समाप्तिः । कीर्तय त्वमिदं भक्त्या कुंभयोने निरंतरं ॥ तेन तुष्टा महादेवी तवाभीष्टं प्रयच्छति ॥ ६७ ॥ सूत उवाच ॥ इत्युक्त्वा श्रीहयग्रीवो ध्यात्वा श्रीललितांबिकां ॥ आनंदमग्नहृदयः सद्यः पुलकितोभवत् ॥ ६८ ॥ इति ललितासहस्रनामस्तोत्रं संपूर्णं ॥

---

**No. 335.** ग्रंथनाम, **वात्स्यायनीयं कामसूत्रं.** Name: Kâma-Sûtra.

पत्राणि ५२, folios 52; पंक्तयः १०, lines 10; अक्षराणि ४०, letters 40. ग्रंथसंख्या १३००.

कर्ता, **वात्स्यायनः.** Author, Vâtsyâyana.

आरंभः । श्रीगणेशाय नमः । धर्मार्थकामेभ्यो नमः । शास्त्रे प्रवृत्तत्वात्तत्समयावबोधकेभ्यश्चाचार्येभ्यस्तत्संबंधात्प्रजापतिर्हि प्रजाः सृष्ट्वा तासां स्थितिनिबंधनत्रिवर्गस्य शासनमध्यायानां शतसहस्रेण प्रोवाच ॥

समाप्तिः । रक्षन् धर्मार्थकामांस्त्रीन् पश्यँल्लोकस्य वर्तनं ॥ अस्य शास्त्रस्य तत्वज्ञो भवत्येव जितेंद्रियः ॥ तदेतत्कुशलो विद्वान् धर्मार्थावपि योजयेत् ॥ नातिरागात्मकः कामी प्रयुंजानः प्रसिध्यति ॥ इत्यौपनिषदिके सप्तमेऽधिकरणे द्वितीयोध्यायः ॥ नष्टरागप्रत्यानयनं । वृद्धविधयः । चित्राश्च योगाः । इत्यादिः षट्त्रिंशः ॥ समाप्तं चेदं वात्स्यायनीयं कामसूत्रं ॥

---

**No. 336.** ग्रंथनाम, **अश्वपरीक्षणं.** Name: Aśva-Parîkshaṇa.

पत्राणि ५, folios 5; पंक्तयः ९, lines 9; अक्षराणि २६, letters 26. ग्रंथसंख्या, ६५७५.

कर्ता, **नलराजः.** Author, Nalarâja.

आरंभः । श्रीगणेशाय नमः ॥ अश्वैर्हस्तगता पृथ्वी श्रीरश्वैर्विपुलं यशः ॥ विजयश्च भवेदश्वैरश्वाद्बहु विभूषणं ॥१॥ आवर्त्तास्तु (?) तुरं (र) गाणां ध्रुवाः शुभाश्चाशुभाश्च ते त्रिविधाः । तेषां ध्रुवा दश मताः स्थानानि दशैव कथितानि ॥

समाप्तिः । अ (?) श्वः कृष्णः श्वेतवक्षाः सितदशनशफः श्वेतकेशाक्षिपृष्ठो ज्योतिष्मान्नाम धन्यः सकलवसुमतीराज्यदः स्वामिनोसौ ॥ यः कृष्णः श्वेतवर्णैस्त्वथ कनकनिभैर्मंजुगुंजानिभैर्वा केशैः स्निग्धैस्तुरंगस्त्वथ कमलमुखो राज्यदः सौख्यदश्च ॥ ५९ ॥ इति नलराजविरचितं अश्वपरीक्षणं समाप्तं ॥

---

**No. 337.** ग्रंथनाम, **धनुर्विद्या.** Name: Dhanurvidyâ.

पत्राणि ३; folios 3; पंक्तयः १३; lines 13; अक्षराणि ३२, letters 32. ग्रंथसंख्या ३९.

आरंभः । स्थानान्यष्टौ विधेयानि योजयेद्भिन्नकर्मणां ॥ स्युः प्रत्यालीढमालीढसमपादमनुक्रमं ॥ १ ॥ वैशाखमंडले स्थानपंचकानि धनुर्भृतां ॥

समाप्तिः । ——— तदवधानेन तीक्ष्णधीः ॥ एतच्च दुष्करं कर्म- ॥ इति शब्दवेधित्वं ॥

YC123298